निःश्रेण्यभिनिवेशे तु क्लीबमूर्ध्वगतौ तथा ॥ २९६ ॥
छर्दिः प्रवृत्तिवातश्चाप्यन्तर्धिरपवारणम् ।
स्यादुदाहरणं क्लीबमभिधाने निदर्शने ॥ २९७ ॥
सत्सत्येभ्यर्हिते साधौ विद्यमानप्रशस्तयोः ।
त्रिषु स्त्रियां दक्षपुत्र्यां भृती भरणवेतने ॥ २९८ ॥
धतूरे ना त्रिषु प्राज्ञे धूर्तो वञ्चकदीव्यतोः ।
खातं वाप्यां रोपिते स्याद्वाच्यलिङ्गं विदारिते ॥ २९९ ॥
सेतुर्ना वृक्षभित्सीमा तरणोपाय एव च ।
लता प्रियङ्गुर्वीरुच्च ज्योतिष्मत्यपि शारिवा ॥ ३६० ॥
हारादिसरिकायां च व्रततावतिमुक्तके ।
प्रसक्तासादितौ प्राप्तावाप्तौ संप्राप्तबान्धवौ ३६१ ॥
अविसंवादकः पक्षी पतन्गच्छंल्लुठन्नधः ।
यन्ता हस्तिपके सूते भर्तारौ पतिधारकौ ॥ ३६२ ॥
यानपात्रे शिशौ पोतः प्रेतः सत्त्वान्तरे मृते ।
निर्वाणे मोचने मुक्तिर्युक्तौ श्लिष्टसमञ्जसौ ॥ ३६३

वह्नित्रये युगे त्रेता लिप्ता कालेऽञ्जिते त्रिषु ।
ग्रहभेदे ध्वजे केतुः पार्थिवे तनये सुतः ॥ २६४ ॥
क्षत्ता स्यात्सारथौ द्वाःस्थे क्षत्रियायां च शूद्रजे ।
श्लेष्मादिरस्थिरक्तादि महाभूतानि तद्गुणाः ॥ २६५ ॥
इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः ।
कासूसामर्थ्ययोः शक्तिर्मूर्तिः काठिन्यकाययोः ॥ २६६ ॥
अर्तिः पीडाधनुष्कोटचोः सातिर्दानावसानयोः ।
उदयेऽधिगमे प्राप्तिरीतिर्डिम्बप्रवासयोः ॥ २६७ ॥
रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः ।
त्यक्तकम्पितयोर्धूतं भूतिर्भस्मसुधर्द्धयः ॥ २६८ ॥
श्रुतिः श्रवसि वेदे च स्वरांशे श्रवणे स्त्रियाम् ।
श्रुतं शास्त्रावधृतयोर्युगपर्याप्तयोः कृतम् ॥ २६९ ॥
निःसारारोग्ययोर्वार्त्तं नीरुग्वृत्तिमतोस्त्रिषु ।
वार्त्ताकृवर्तनोदन्तपाशुपाल्यादिषु स्त्रियाम् ॥ २७० ॥
वृत्तमध्ययने पद्ये चरित्रे वर्तने मृते ।
अल्पाशये त्रिलिङ्गः स्यादतीते निस्तले दृढे ॥ २७१ ॥
प्रियङ्गुयोषितोः कान्ता त्रिषु प्रियमनोज्ञयोः ।
जातिश्छन्दसि सामान्ये मालतीगोत्रजन्मसु ॥ २७२ ॥
काव्यालंकारभेदे च स्वभावे च स्त्रियामयम् ।
सेनाविशेषे पत्तिः स्त्री गतौ च पदगे पुमान् ॥ २७३ ॥
वैदर्भ्यादावारकूटे प्रचारस्यन्दयोस्तथा ।
मर्यादायां च रीतिः स्त्री रूप्ये श्वेतं सिते त्रिषु ॥ २७४ ॥
श्वेता स्त्री सूर्यभार्यायां राजभेदे पुमानयम् ।
शर्कराभित्सिता शुक्ले बद्धावसितयोस्त्रिषु ॥ २७५ ॥
छन्दोविशेषः पङ्क्तिः स्त्री दशसंख्यावलिस्तथा ।
क्षये निवासे मेदिन्यां क्षितिः कान्तिप्रभे द्युती ॥ २७६ ॥
त्रिषु प्राप्ते विस्तृते च ततं वाद्ये नपुंसकम् ।
ब्राह्मण्यां क्षत्रियात्सूतस्त्रिषु क्लीबं तु पारते ॥ २७७ ॥

रथकारे सारथौ ना वन्दिन्थीपथ्ययोस्तथा ।
मानभेदे प्रशंसायां हस्तः करभभेदोस्तथा ॥ ३०६ ॥
असाराश्वगजे शान्ते वीतमङ्कुशकर्मणि ।
सांख्यसाधर्म्यहेतौ च विगतच्छन्नयोस्त्रिषु ॥ २७९ ॥
लुप्तवर्णपदं ग्रस्तं त्रिषु ग्रासीकृते तथा ।
तिक्ता स्यात्कटुरोहिण्यां शुभगन्धे रसे त्रिषु ॥ २८० ॥
नतं नितम्बे तगरे कुटिलेधःकृते त्रिषु ।
जन्तौ क्ष्मादौ पिशाचादौ भूतं न्याय्योपमानयोः ॥ २८१ ॥
प्राप्ते त्रिषु युतं युक्ते वियुक्ते च तथा त्रिषु ।
गुप्तिः कारा च रक्षा च दीर्णे च विवरं भुवः ॥ २८२ ॥
मूर्छाले कठिने मूर्तौ वस्तिर्वस्त्राञ्चले द्वयोः ।
अपानमार्गे तत्कर्मण्यश्वप्रस्रवणे तथा ॥ २८३ ॥
लूता तु स्यादूर्णनाभे व्याधिभेदे पिपीलके ।
रतिः स्मरकलत्रे स्याद्रताभिष्वङ्गयोरपि ॥ २८४ ॥
चित्तावस्थानशृङ्गारभावकामफलेष्वपि ।
वित्तं स्याद्द्रविणे हेम्नि त्रिषु ख्याते विचारिते ॥ २८५ ॥
धूपे दीपशिखायां च वर्तिर्गात्रानुलेपने ।
आलेख्यभाण्डे दीपस्य दशायां चक्षुरञ्जने ॥ २८६ ॥
प्राप्तिसंबन्धयोराप्तिर्गमने पद्धतौ सृतिः ।
वर्तने विवृतौ वृत्तिः कैशिक्यादौ मनस्कृतौ ॥ २८७ ॥
काव्याङ्गे कामभार्यायां प्रीतिः प्रेमप्रमोदयोः ।
पक्तिः पाके व्यवहतौ वीतिर्याने तुरंगमे ॥ २८८ ॥
विच्छित्तौ सेवने भक्तिर्भित्तिः कुड्यप्रदेशयोः ।
चितिश्चित्सङ्गचित्याश्च द्रुतं शीघ्रविलीनयोः ॥ २८९ ॥
दन्तौ रदाद्रिकटकौ मृत्युयाचितयोर्मृतम् ।
जातं जन्म प्रकारश्च त्रिषु संपन्नपुत्रयोः ॥ २९० ॥
व्यक्तं स्फुटे बुधे व्यक्तः शिती शारासितौ त्रिषु ।
यतिर्विरामव्रतिनोरूतिः स्यात्स्यूतिरक्षयोः ॥ २९१ ॥



वह्नित्रये युगे त्रेता लिप्ता कालिते च त्रिषु ।
कुङ्कुभेदे ध्वजे केतुः पार्थिारुणयोस्त्रिषु ॥ २९२ ॥
मत्तः करी मदकलो मदेनाव्यक्तवाक्त्रिषु ।
अवस्थायां गतिर्यात्राधीनतोपायवर्त्मसु ॥ २९३ ॥
शुक्तं स्यात्परुषेम्ले च ग्रीष्मादौ स्त्रीरजस्यृतुः ।
विनाशान्तिकयोरन्तः स्वरूपेंशावसानयोः ॥ २९४ ॥
माता गौर्जननी देव्यो रेवत्याद्या बहुस्त्रियाम् ।
मर्यादायां स्थितिः स्थाने भास्वद्दीप्रविवस्वतोः ॥ २९५ ॥
भूभृद्भूमिधरे भूपे स्यादर्हज्जिनपूज्ययोः ।
सूर्याश्वेषु हरित्पुंसि नीले त्रिषु दिशि स्त्रियाम् ॥ २९६ ॥
महद्राज्ये सांख्यबुद्धौ न स्त्री बृहति तु त्रिषु ।
छन्दोभिज्जगती भूश्च जगज्जङ्गमलोकयोः ॥ २९७ ॥
समित्सभासंगरयोः पित्सन्पातेच्छुपक्षिणोः ।
क्लीबे बिन्दौ पृषन्ना तु हरिणे पृषतोनयोः ॥ २९८ ॥
हल्या भूर्जानकी सीते एतौ शारासितौ त्रिषु ।
धाता ब्रह्मा च धर्ता च क्षिप्रेस्तः पश्चिमाचले ॥ २९९ ॥
गुणे शीतं त्रिषु तद्वन्ना श्लेष्मातकवेतसौ ।
यातरो भ्रातृजायाः स्युर्गतिशीले भवेत्त्रिषु ॥ ३०० ॥
मुक्तास्फोटे हयावर्ते शुक्तिर्मानखौषधी ।
पूतः पवित्रे निःशूके धारिते सुस्थिते धृतम् ॥ ३०१ ॥
शान्तिः शमे निर्वृतौ च तथा कुशलकर्मणि ।
संक्रान्ताक्रान्तयोः क्रान्तो मरुतौ पवनामरौ ॥ ३०२ ॥
देवसूर्यौ विवस्वन्तौ सरस्वन्तौ नदार्णवौ ।
पक्षिताक्ष्यौं गरुत्मन्तौ शकुन्तौ भासपक्षिणौ ॥ ३०३ ॥
स्थपतिः कञ्चुकी तक्षा बृहस्पतिसवेष्टवान् ।
जातहर्षे प्रतिहते रोमाञ्चविषये तथा ॥ ३०४ ॥
विस्मिते हषितः स्यात्त्रिष्वमृतं मोक्षवारिणोः ।
अयाचिते यज्ञशेषे देवान्नसुधयोरपि ॥ ३०५ ॥

दुरालभामलक्योः स्त्री गुडूचीपथ्ययोस्तथा ।
परस्यां वाच्यर्करश्मिसमाधानभिदोस्तथा ॥ ३०६ ॥
दूर्वादुरालभाभूमिष्वनन्ता क्लीबमम्बरे ।
पुमान्नागाधिपे विष्णावनाशेनवधौ त्रिषु ॥ ३०७ ॥
प्रियं सत्यं च वचनं कल्याणमपि सूनृतम् ।
कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु ॥ ३०८ ॥
वृत्तान्तः स्यात्प्रकरणे कार्त्स्न्ये वार्त्ताप्रकारयोः ।
निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत् ॥ ३०९ ॥
जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रिता उत्थितास्त्वमी ।
वृद्धिमत्प्रोद्गतोत्पन्ना आदृतौ सादरार्चितौ ॥ ३१० ॥
विविक्तौ पूतविजनौ मूर्छितौ मूढसोच्छ्रयौ ।
प्रख्यातज्ञातदृष्टेषु प्रतीतं त्रिषु संस्कृतम् ॥ ३११ ॥
कृत्रिमे लक्षणोपेते पिण्डितं गुणिते घने ।
वनिता जनितात्यर्थानुरागा स्त्र्यङ्गनापि च ॥ ३१२ ॥
पलितं जरसा शौक्ल्यं केशादेः कर्दमं तथा ।
समञ्जसे स्यादुचितमभ्यस्ते च त्रिलिङ्गकम् ॥ ३१३ ॥
कुङ्कुमे शोणिते क्लीबमरुणे त्रिषु लोहितम् ।
शक्ते निवारिते पूर्णे पर्याप्तं त्रिष्वपीप्सिते ॥ ३१४ ॥
आनर्तः समरे नृत्तस्थाननीवृद्विशेषयोः ।
मिथ्योक्तावाहतं क्लीबे ताडिते गुणिते त्रिषु ॥ ३१५ ॥
आचितः स्यात्त्रिषु व्याप्ते पलानामयुतद्वये ।
दुर्जातं व्यसनेसम्यग्जातवस्तुनि तु त्रिषु ॥ ३१६ ॥
त्रिष्वव्यक्तमस्फुटे स्यात्पुमांस्तु परमात्मनि ।
त्रिषु प्रणीतो विहिते संस्कृतेग्नौ प्रवेशिते ॥ ३१७ ॥
विप्रलब्धे विप्रकृते निकृतस्त्रिष्वथोद्धृतम् ।
भुक्तोज्झिते तोलिते च सुकृतं शुभपुण्ययोः ॥ ३१८ ॥
आयस्तं लेशितोत्क्षिप्ते कोपिते तेजिते त्रिषु ।
निरस्तं त्रिष्वधिक्षिप्ते त्यक्ते च त्वरितोदिते ॥ ३१९ ॥

विश्वास्ये त्रिषु विश्वस्तो विधवायां पुनः स्त्रियाम् ।
लिङ्गे स्वभावे प्रकृतिर्धात्वमात्यादियोनिषु ॥ ३२० ॥
सभासंगतियुद्धेषु समितिर्निर्वृतिः पुनः ।
स्वस्थतायामस्तमये निकृतिः शठशाठ्ययोः ॥ ३२१ ॥
दुर्गतिर्नरके दौःस्थ्ये पद्धतिः पङ्क्तिवर्त्मनोः ।
काये रूपे चाकृतिः स्यात्प्रसूतिर्जन्मपुत्रयोः ॥ ३२२ ॥
वसतिः स्थितियामिन्योः प्रवृत्तिर्वृत्तिवार्त्तयोः ।
ऋक्षे लाङ्गलिदारेषु रेवत्याख्यापि मातृषु ॥ ३२३ ॥
स्तिमितेतरलक्लिन्ने निशान्तं गेहशान्तयोः ।
अनृते कुकृतासत्ये वाशिता करिणीस्त्रियोः ॥ ३२४ ॥
उदितावुद्गतप्रोक्तावर्दितं पीडितेर्थिते ।
द्विजातिर्विहगे विप्रे जीवातुर्जायुजीवयोः ॥ ३२५ ॥
निमित्तं लक्षणे हेतौ जीमूतौ मेघपर्वतौ ।
देवताडद्रुरुत्तप्तं शुष्कमांसं वितापितम् ॥ ३२६ ॥
सिकता वालुकायां च देशे च सिकतान्विते ।
विस्तारवल्ल्योर्व्रततिः कलितं विदितात्तयोः ॥ ३२७ ॥
संख्याते तुलिते क्षिप्ते शब्दिते च भवेत्त्रिषु ।
बृहती क्षुद्रवार्ताकी छन्दोभेदे महत्यपि ॥ ३२८ ॥
गर्जितं स्तनितेभ्राणां पुंसि स्यान्मत्तकुञ्जरे ।
प्रार्थितं प्रार्थनालभ्येभियुक्ते सान्त्विते त्रिषु ॥ ३२९ ॥
विततं प्रस्तुते व्याप्ते विस्तृते च भवेत्त्रिषु ।
परंपरायां पुत्रे च विस्तारेपि च संततिः ॥ ३३० ॥
संमतिः स्यादनुज्ञानमभिलाषेपि च स्त्रियाम् ।
रूप्ये हारे च रजतं शुक्ले स्याद्वाच्यलिङ्गकः ॥ ३३१ ॥
पारावते कपोतः स्याद्विहगान्तरवर्णयोः ।
संवित्तिः प्रतिपत्तिः स्याद्व्यवस्था चाविवादिता ॥ ३३२ ॥
ऋज्विन्द्रास्त्रं रोहितं ना मत्स्यभिद्यरुणे त्रिषु ।
प्रतिपत्पक्षतिः पक्षमूलं च द्वीपवाद्यदे ॥ ३३३ ॥

अवधी नदी स्त्री दृष्टान्त उदाहरणशास्त्रयोः ।
स्यादायतिर्दीर्घतायां प्रतापागामिकालयोः ॥ ३३४ ॥
विधूतः कम्पिते त्यक्ते नियती दैवसंयमौ ।
बीभत्से विकृतोऽस्वस्थे चाप्लुतः स्नातमात्रके ॥ ३३५ ॥
स्नातके चाप्यथोद्घात आरम्भे स्खलिते तथा ।
पाणिर्निकुब्जः प्रसृतः स्त्री जङ्घा विस्तृते त्रिषु ॥ ३३६ ॥
दान्ते ककुझान्स्त्री कट्यां परेतो दूरगे मृते ।
दैवतं देवता देवाः सरस्वन्तौ नदार्णवौ ॥ ३३७ ॥
मारजिच्छंकरे बुद्धे शान्तेथ भगवाञ्जिने ।
पूज्ये द्वयोरथोन्मत्तो धतूरे मादिनि त्रिषु ॥ ३३८ ॥
निर्ऋती यमदिक्पालौ क्षयलक्ष्मीराक्षसाम्बयोः ।
आवर्तो रोमभेदेम्भोभ्रमे पठनरूपयोः ॥ ३३९ ॥
एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ।
रजस्वला पुष्पवती माल्यधारिणि तु त्रिषु ॥ ३४० ॥
विवृतः कोशनिष्कृष्टे व्याकृतेपि प्रकाशिते ।
विकासिते वर्णपाठधर्मे च सुशिरे तथा ॥ ३४१ ॥
एषां भावे तु विवृतिः स्थगितासत्यभूतयोः ।
वर्णपाठगुणे गुप्ते संवृतो विवृतेतरे ॥ ३४२ ॥
एषां भावे संवृतिः स्यादेकान्तो निश्चयो रहः ।
गुणैकदेशयोरव्यभिचारिणि च पुंस्ययम् ॥ ३४३ ॥
प्रत्यन्तौ म्लेच्छदेशान्तौ देव्योषधिविशेषयोः ।
जयन्तीन्द्रात्मजे पुंसि स्त्र्यास्फोता गिरिकर्णिका ॥ ३४४ ॥
गिरिपर्णी शारिवा च भवेदर्कतरौ पुमान् ।
साक्षात्कृतोत्पादितयोराश्वस्ते भावितं त्रिषु ॥ ३४५ ॥
भक्तवासितयोश्चाथाहृतमानीतभुक्तयोः ।
परावृत्ते च लुठितं भ्रष्टे त्रिषु पदाच्युते ॥ ३४६ ॥
तिरोहिते स्रुते भुक्ते पतिते गलितं त्रिषु ।
छन्दोविशेषे गलिता निर्मुक्तो मुक्तकञ्चुके ॥ ३४७ ॥

त्यक्ते निर्ग्रन्थिके वाच्यलिङ्गो वसुमती भुवि ।
त्रिषु स्फीते चित्रकरे चित्रकृद्दस्रुले तथा ॥ ३४८ ॥
पर्याप्तिः पूर्णताशक्त्योर्गुडूचीशाकभेदयोः ।
जीवन्ती स्याद्वृक्षरुहा विनीतः शिक्षिते हये ॥ ३४९ ॥
सप्रश्रये निरस्ते च त्रिष्वथो यज्ञसूत्रके ।
कण्ठालम्बे प्रावृते च निवीतं वाच्यलिङ्गकम् ॥ ३५० ॥
स्वकर्महीने पतितो गते भ्रष्टेपि च त्रिषु ।
यवे स्यादक्षतः पुंसि क्षत्यभावे त्रिलिङ्गकः ॥ ३५१ ॥
कलधौतं रूप्यहेम्नोर्विष्णौ लक्ष्मीपतिर्नृपे ।
अग्रेकृताभ्यर्चितयोर्भवेत्त्रिषु पुरस्कृतः ॥ ३५२ ॥
दुष्टे त्रिष्ववगीतं स्यान्निर्वादे गर्हितेपि च ।
अभिनीतं संस्कृते च प्रापितेमर्षवत्यपि ॥ ३५३ ॥
प्रतिस्खलितविद्विष्टौ त्रिषु प्रतिहतावपि ।
सुकुमारेभिजातं स्यात्कुलीनबुधयोस्त्रिषु ॥ ३५४ ॥
नन्द्यावर्त ऋद्धवेश्मप्रकारे तगरद्रुमे ।
स्त्रियामपचितिर्हानौ निष्कृतावर्चने व्यये ॥ ३५५ ॥
अत्याहितं महाभीतिर्जीवे च निरपेक्षता ।
समाहितं समाधिस्थे तथा दत्तोत्तरे त्रिषु ॥ ३५६ ॥
उपाहितोनलोत्पाते भवेदारोपिते त्रिषु ।
उपस्थितः प्रतीहारे द्वारभेदे समाश्रिते ॥ ३५७ ॥
वाच्यलिङ्गो निन्दिते स्यादवध्वस्तोवचूर्णिते ।
अवसानं गते ज्ञाते निश्चितेवसितस्त्रिषु ॥ ३५८ ॥
विजृम्भितं विकसिते चेष्टायां प्रसृते त्रिषु ।
विज्ञाते वेष्टिते प्राप्ते भवेत्परिगतस्त्रिषु ॥ ३५९ ॥
मध्यप्राप्तं विस्मृतं च भवेदन्तर्गतं त्रिषु ।
अवदातः सिते पीते विशुद्धे वाच्यलिङ्गकः ॥ ३६० ॥
निराकृते प्रेषिते च प्रतिक्षिप्तं त्रिलिङ्गकम् ।
ऊर्ध्वाहिते भर्त्सिते त्रिष्वधिक्षिप्तो विनिन्दिते ॥ ३६१ ॥

नागानां नगरीनद्यौ भोगवत्यौ शतक्रतोः ।
चाप ऋज्वायते न स्त्री गजे त्वैरावतः पुमान् ॥ ३६२ ॥
अस्वाध्याये पुमान्स्त्री तु प्रत्यादेशो निराकृतिः ।
प्रतिमायां प्रतीकारे भवेत्प्रतिकृतिः स्त्रियाम् ॥ ३६३ ॥
अभिशापप्रार्थनयोरभिशस्तिः स्तुतावपि ।
जनंगमो दिवाकीर्तिर्नापितश्च भवेद्द्वयोः ॥ ३६४ ॥
प्रागल्भ्यगौरवारम्भाप्रबोधाः प्रतिपत्तयः ।
अग्न्युत्पातौ धूमकेतू वचा गौरी च काञ्चनी ॥ ३६५ ॥
गङ्गा हरीतकी हैमवत्यस्तज्जादिषु त्रिषु ।
वैजयन्ती पताका स्यात्तर्कारी च यमो मनुः ॥ ३६६ ॥
सौरः कर्णो रविसुतः सुग्रीवश्च निपातितः ।
मारितः साधितश्च स्याद्देवखातं ह्रदो गुहा ॥ ३६७ ॥
प्रजावती भ्रातृजाया प्रजायुक्ते भवेत्त्रिषु ।
स्पृक्का भूमिश्च कार्पासी समुद्रान्ता दुरालभा ॥ ३६८ ॥
राहुग्रस्तार्कशशिनोर्व्यसनार्तात्तरागयोः ।
उपरक्तोवगमितेपास्तनिद्रे प्रबोधितः ॥ ३६९ ॥
समाघातो वधे युद्धे प्रहारेथ विहंगमे ।
पतेच्छौ स्यात्पिपतिषंस्त्रिषु न्यस्ते समाहिते ॥ ३७० ॥
त्रिषु प्रणिहितं न्यासे समाधौ च नपुंसकम् ।
सक्ताक्षिप्तावभियुक्तौ भूपाले क्षत्रिये तथा ॥ ३७१ ॥
मूर्धाभिषिक्तोथाम्भोधौ वरुणे यादसांपतिः ।
समन्तादुच्यमाने स्यान्नियमे परिभाषितम् ॥ ३७२ ॥
आदिराजे पृथुर्दीर्घे त्रिषु कृष्णे च जीरके ।
द्वयोः स्याद्धिङ्गुपर्ण्यां च पृथ्वी धरणिवृत्तयोः ॥ ३७३ ॥
पर्वसंधानपिटकयन्त्रणा ग्रन्थयो नरि ।
अर्थोभिधेयविषयरैप्रयोजनवस्तुषु ॥ ३७४ ॥
सोपानपात्रयोस्तीर्थमर्हद्भिः सेविते गुरौ ।
स्यूतौ सन्निण्युपाये च प्रस्थोस्त्री सानुमानयोः ॥ ३७५ ॥

वृत्तवाग्भेदयोर्गाथा ग्रन्थो द्रविणशास्त्रयोः ।
आस्थान्याशादराश्वासयत्नेष्वास्थाथ ना स्पशे ॥ ३७६ ॥
संस्था व्यवस्थामरणयागोपस्करणेषु च ।
वीथी रूपकभेदः स्यात्पङ्क्तिवेश्माङ्गवर्त्मसु ॥ ३७७ ॥
सिक्थः पुलाके मदने क्लीबेथो वर्णकम्बले ।
द्वयोर्दर्भेषु च कुथः सक्तूनां द्रवताविधौ ॥ ३७८ ॥
मन्थानेक्षिगदे मन्थः सिद्धार्थौ बुधसर्षपौ ।
समर्थस्त्रिषु शक्तिस्थे संबद्धार्थे हिते तथा ॥ ३७९ ॥
क्षवथुस्तु क्षुते कास उपस्थस्त्वङ्गगुह्ययोः ।
निर्ग्रन्थो निष्परीवारे त्रिषु स्यात्क्षपणे पुमान् ॥ ३८० ॥
पाशयन्त्रकमुन्माथं न स्त्री ना वधघातयोः ।
वयःस्थामलकी क्षीरकाकोली यूनि तु त्रिषु ॥ ३८१ ॥
पथ्या कयस्था काकोल्यव्यथा पद्मा हरीतकी ।
कपित्थे मन्मथः कामे मधूकाभ्रमिभेदयोः ॥ ३८२ ॥
वानप्रस्थः क्षीणरागे दशमीस्थो वयोतिगे ।
राजरक्षिष्वनीकस्थो गजशिक्षाविचक्षणे ॥ ३८३ ॥
हृन्मनोवक्षसोः क्लीबे स्त्री भिक्षारणभेदयोः ।
वन्दी तु पणबन्धः स्यान्नारी चापि हठाहृता ॥ ३८४ ॥
व्यवसाये परित्राणे स्थाने वस्त्वपदेशयोः ।
पादतन्मुद्रयोश्चिह्ने पदं न्यासेक्षशब्दयोः ॥ ३८५ ॥
पादा रश्म्यङ्घ्रितुर्यांश ऋगंशाद्र्यन्तपर्वताः ।
वृक्षमूलं चाथ संवित्संकेते ज्ञानकालयोः ॥ ३८६ ॥
संभाषणे क्रियाकारे प्रतिज्ञाचारनामसु ।
दृशन्निष्पेषणशिला शिला चाथ विदारणे ॥ ३८७ ॥
उपजापे विशेषे च भेदः स्यात्तु गदो हरेः ।
भ्राता व्याधिश्चायुधे तु स्त्री संपच्छ्रीस्तयोच्छ्रयः ॥ ३८८ ॥
मूलसूरणयोः कन्दः पर्णोष्ठगरुतश्छदाः ।
ह्रदस्तोयाशयः स्रोतो बिन्दुर्वेदितृविप्रुषोः ॥ ३८९ ॥

दन्तक्षतेर्थप्रकृतौ शून्ये भ्रूमध्यतेजसि ।
त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ ॥ ३९० ॥
अभिप्रायवशौ छन्दावब्दौ जीमूतवत्सरौ ।
घर्मस्वेदनयोः स्वेदः सात्त्विके भावभिद्यपि ॥ ३९१ ॥
छेदो विरामे खण्डे च शादो जम्बालशष्पयोः ।
विमर्दचूर्णयोः क्षोदो नादः स्यात्प्राणशब्दयोः ॥ ३९२ ॥
स्त्री शरद्वत्सरर्त्वोः स्यात्क्रव्यान्मांसाशिरक्षसोः ।
सूदः सूपे सूपकारे देशे चोषरभूमिके ॥ ३९३ ॥
भ्रमे भवेत्पुमान्कुन्दः पुष्पभेदे नपुंसकम् ।
मन्दोपटौ शनैरर्थे मूढे च त्रिषु पुंसि तु ॥ ३९४ ॥
सैरेभजात्योः स्यात्क्षैव्ये गर्वे हर्षेभदानयोः ।
मदो मद्ये राजलिङ्गे पृष्ठाङ्गश्रेष्ठयोः ककुत् ॥ ३९५ ॥
दायादौ बान्धवसुतावामोदो हर्षगन्धयोः ।
निषादो लुब्धके गीतस्वरे संकरजन्मनि ॥ ३९६ ॥
प्रधाने राजलिङ्गे च पृष्ठाङ्गे ककुदोस्त्रियाम् ।
मर्यादा धारणासीम्नोर्विषदो व्यक्तशुक्लयोः ॥ ३९७ ॥
गोष्ठाध्यक्षे च विष्णौ च गोविन्दः कपिनागयोः ।
कुमुदो जलजे क्लीबं कुसूदं वृद्धिजीवने ॥ ३९८ ॥
कुसेवके त्रिषु ज्ञाने तिथौ च प्रतिपत्स्त्रियाम् ।
स्यात्प्रसादोनुग्रहेपि नैर्मल्यप्रीतिदानयोः ॥ ३९९ ॥
सारावे रुदिते त्रातर्याक्रन्दो दारुणे रणे ।
पश्चाद्राजविशेषे च गोष्पदे मानसेविते ॥ ४०० ॥
त्रिष्वधृष्टे नवे शुद्धे शारदोपि शरद्भवे ।
अस्त्री संवत्सरे सप्तपर्णे ना शारदी पुनः ॥ ४०१ ॥
लाङ्गली शारदा देवी कुविन्दौ भ्रमिवायकौ ।
प्रमदा तरुणी ना तु हर्षेधिकमदे त्रिषु ॥ ४०२ ॥
धर्मे रहस्युपनिषद्वेदान्ते च शतह्रदा ।
विद्युद्भेदे विद्युति च वह्नीन्द्वर्कास्तमोनुदाः ॥ ४०३ ॥

मर्यादासहितेभ्यर्णे समर्यादं त्रिलिङ्गकम्।
अववादो तु निन्दाज्ञे देशो जनपदो जने ॥ ४०४ ॥
गङ्गा विष्णुपदी क्लीवे हर्यङ्घ्र्याकाशविष्टपे।
अभिमर्दो युद्धपीडे धृष्टो ज्ञश्च विशारदः ॥ ४०५ ॥
त्रिषु कोकनदं रक्तकुमुदे रक्तवारिजे।
निर्वादे वादनोपाये परिवादोथ हेमनि ॥ ४०६ ॥
अष्टापदं शारिफले स्त्रियां तु पशुगर्भिणी।
अपवादस्तु गर्हायां बाधके बाधनेपि च ॥ ४०७ ॥
ऋद्धिरोषधिभिल्लक्ष्मीः प्रभावोतिशयः स्त्रियाम्।
कुष्ठाख्यायामोषधौ च व्याधिः पुंस्यामये तथा ॥ ४०८ ॥
वसन्तदैत्यभिच्चैत्रमधूका मधवो मधु।
मद्यं पुष्परसः क्षौद्रं मधुरे वाच्यलिङ्गकः ॥ ४०९ ॥
बन्धको व्यसनं चेतःपीडाधिष्ठानमाधयः।
विधुर्विष्णुः शशी बाधा द्वयोर्दुःखनिषेधयोः ॥ ४१० ॥
नददेशभिदोरब्धौ सिन्धुर्ना सरिति स्त्रियाम्।
द्वयोर्विधौ प्रकारे च गजान्ने वेतने विधा ॥ ४११ ॥
वधूर्जाया स्नुषा स्त्री च प्रियङ्गुस्पृक्कयोरपि।
निधी निक्षेपगूढार्थौ स्थानं श्रद्धादरः स्पृहा ॥ ४१२ ॥
क्लीवे तमोम्भसोरन्धमदृष्टौ वाच्यलिङ्गकः।
संधा प्रतिज्ञा मर्यादा मक्कोलामृतयोः सुधा ॥ ४१३ ॥
विधिर्विधायके वाक्ये दैवे स्रष्टृविधानयोः।
हव्यकव्यविधौ श्राद्धं त्रिषु श्रद्धासमन्विते ॥ ४१४ ॥
संधिर्भगे सुरुङ्गायां संधानगुणभेदयोः।
गोधा तले निहाकायां बुधा विद्वद्ग्रहामराः ॥ ४१५ ॥
राधा तु कृष्णजायायां शरव्ये कर्णमातरि।
मूलाधिकेर्थे वृद्धिः स्याद्वर्धनौषधिभेदयोः ॥ ४१६ ॥
सिद्धिरोषधिनिष्पत्त्योर्बन्धः स्नेहाधिबन्धने।
वृन्ते च रचनायां च वातादिनियतावधौ ॥ ४१७ ॥

अंसे महीपतौ स्कन्धस्तरुजङ्घासमूहयोः ।
लताविटपयोर्वीरुत्खण्डोर्धेर्धे समेंशके ॥ ४१८ ॥
दोषज्ञे सुगते बुद्धः शुद्धस्त्रिष्वेकपूतयोः ।
पण्डिते स्थविरे वृद्धस्त्रिषु साधुस्तु शोभने ॥ ४१९ ॥
वार्द्धुषौ सज्जने सिद्धो देवे निष्पन्नपूज्ययोः ।
विषलिप्ते शरे दिग्धो लिप्तमात्रे त्रिलिङ्गकः ॥ ४२० ॥
मुग्धं मनोहरे मूढे त्रिषु योषिति तु स्त्रियाम् ।
विद्धं सूच्यादिभिर्भिन्ने सादृश्ये ज्ञे त्रिलिङ्गकः ॥ ४२१ ॥
घ्राणग्राह्याल्पयोर्गन्धो द्रव्ये संबन्धमात्रके ।
लुब्धः स्पृहावान्मृगयुः क्षत्रियायां तु वैश्यजः ॥ ४२२ ॥
वन्दी च मागधः स्त्री स्यात्पिप्पली यूथिका तथा ।
व्यामो वटश्च न्यग्रोधो न्यग्रोधी चोपचित्रिका ॥ ४२३ ॥
प्रबोधौ जागरोद्घाटावुत्सेधौ वपुरुन्नती ।
पर्याहाराध्वभारेषु विवधो वीवधोपि च ॥ ४२४ ॥
परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ।
समाधिर्ध्याननीवाकनियमेषु समर्थने ॥ ४२५ ॥
प्रणिधी प्रार्थनचरौ परिच्छेदे बिलेवधिः ।
अगाधमतलस्पर्शे त्रिषु गर्ते नपुंसकम् ॥ ४२६ ॥
व्याजे रथाङ्गेप्युपधिर्विबुधौ सुरपण्डितौ ।
वाद्यं मृदङ्गाद्यानद्धं बद्धमात्रे त्रिलिङ्गकम् ॥ ४२७ ॥
उपाधिर्धर्मचिन्ता च कुटुम्बव्यापृतेपि च ।
विशेषणोपार्जनयोः प्रबुद्धो ज्ञानिजाग्रतोः ॥ ४२८ ॥
सम्यक्सिद्धौ स्वभावे स्त्री संसिद्धिः संनिधिस्तु ना ।
प्रत्यक्षे संनिधाने च निरोधो नाशरोधयोः ॥ ४२९ ॥
निषधः कठिने देशे राजभेदे नगान्तरे ।
तोये कबन्धं ना रक्षोभेदे शिरसि न स्त्रियाम् ॥ ४३० ॥
भृशार्थदोषावाबाधौ संबाधौ योनिसंकटौ ।
अतस्त्रिषु तु विस्रब्धो विश्वस्ते प्रोद्भटे तथा ॥ ४३१ ॥

आविद्धौ कुटिलोत्क्षिप्तौ प्रसिद्धौ ख्यातभूषितौ ।
विरुद्धौ वैरिविगुणौ दुर्विधौ खलदुर्गतौ ॥ ४३२ ॥
अविदूरस्त्ववष्टब्धो बद्धश्चाप्यवलम्बितः ।
ब्रह्मबन्धुरधिक्षेपे निर्देशे ब्राह्मणस्य च ॥ ४३३ ॥
दोषोत्पादेनुबन्धः स्यात्प्रकृत्यादेर्विनश्वरे ।
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ॥ ४३४ ॥
कर्णिकारः परिव्याधो जलवेतस इत्यपि ।
तमालः श्यामखदिरः कालस्कन्धोपि तिन्दुकः ॥ ४३५ ॥
इक्षुगन्धा विदारी स्यात्कोकिलो गोक्षुरोपि च ।
महौषधं प्रतिविषा लशुनं नागरं विषम् ॥ ४३६ ॥
अजमोदोग्रगन्धा स्याद्वचा गन्धोत्कटे त्रिषु ।
पृश्निरल्पतनू रश्मिवर्णभेदे गवि स्त्रियाम् ॥ ४३७ ॥
व्याधिभिद्यक्षयोर्यक्ष्मा मुनिर्बुद्ध ऋषिस्तथा ।
शुष्मा वह्निर्बले क्लीबे शृङ्गी प्रतिविषा विषम् ॥ ४३८ ॥
वृषाख्यौषधिभिद्दान्तपर्वतौ शृङ्गवांस्त्रिषु ।
हनुर्नखौषधिः सृक्क जटी प्लक्षतरुर्व्रती ॥ ४३९ ॥
घनो मेघे मूर्तिगुणे विस्तारे लोहमुद्गरे ।
मुस्ते च न द्वयोर्वाद्ये त्रिषु मूर्तिनिरन्तरे ॥ ४४० ॥
इनः सूर्ये प्रभौ राजा मृगाङ्के क्षत्रिये नृपे ।
त्वग्देहयोस्तनुः स्त्री स्यात्तद्गुणे त्रिषु पर्व तु ॥ ४४१ ॥
तिथिभेदे क्षणे ग्रन्थौ वर्त्म नेत्रच्छदेध्वनि ।
वेदस्तत्त्वं तपो ब्रह्म पुमान्विप्रे प्रजापतौ ॥ ४४२ ॥
पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेप्यणीयसि ।
आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च ॥ ४४३ ॥
देहप्रमाणयोर्वर्ष्म स्यादाकारेपि सुन्दरे ।
ग्रावाणौ शैलपाषाणौ पत्त्रिणौ शरपक्षिणौ ॥ ४४४ ॥
वृक्षोग्निः कुक्कुटो वर्ही शिखिनोथ तु सादिनौ ।
द्वौ सारथिहयारोहौ वाजिनोश्वेषुपक्षिणः ॥ ४४५ ॥

स्थितौ क्षेत्रवधौ मार्गे सीमा लक्ष्माय्यचिह्नयोः ।
गृहं देहस्त्विट् प्रभावो धाम धन्व स्थलं धनुः ॥ ४४६ ॥
पुमान्मरावथ स्वप्नः स्वापे सुप्तस्य संविदि ।
सूनं पुष्पे वधस्थाने स्त्रियां जिह्वातलेपि च ॥ ४४७ ॥
पुष्पिते त्रिष्वहिहरी चक्रिणौ रथतैलिकौ ।
भृतौ सुवर्णे भर्म स्याच्चर्म स्यात्फलके त्वचि ॥ ४४८ ॥
स्वामिनौ गुरुभर्तारौ जनौ लोकपृथग्जनौ ।
जनी वधूश्चन्द्रयुता रात्रिर्ज्योत्स्नी पटोलिका ॥ ४४९ ॥
अश्वकुत्सितयोरर्वा प्रेमाख्यी स्नेहनर्मणोः ।
मन्दस्वच्छन्दयोः स्वैरी श्येनौ श्वेतविहंगमौ ॥ ४५० ॥
गभस्तिव्रध्नयोर्भानुर्वनं काननंनीरयोः ।
समूहे पर्वते च स्यात्तानस्तात्पर्यगीतयोः ॥ ४५१ ॥
मणिप्रकृष्टयो रत्नं यानं गमनयुग्मयोः ।
गुणभेदे च नृपतेर्धेनुर्दोग्ध्र्यां तथा गवि ॥ ४५२ ॥
रूपे धने बले द्युम्नं वित्तं लब्धे विचारिते ।
सेवके याचके चार्थी स्थानं स्थित्यवकाशयोः ॥ ४५३ ॥
सादृश्ये गीतविषये स्याच्च योग्यप्रसङ्गयोः ।
वैयापृत्यकरो भोगी त्रिषु राजभुजंगयोः ॥ ४५४ ॥
ज्योत्स्ना ज्योतिष्मती रात्रिस्तथा चन्द्रमसः प्रभा ।
मानं प्रमाणे प्रस्थादौ पुमांश्चित्तसमुन्नतौ ॥ ४५५ ॥
दिग्वासास्त्रिषु नग्नः स्याच्च नग्ना वैतालिकादयः ।
संस्कृते दारिते भिन्नस्त्रिषु स्यादन्यवाचकः ॥ ४५६ ॥
शुष्के शुष्कफले वानं तथा सीवनकर्मणि ।
भगाकरौ द्वयोर्योनी कृती सुरिकृतार्थयोः ॥ ४५७ ॥
स्नानीये सवने स्नानं धनं गोसंघवित्तयोः ।
पताकालक्ष्मणोश्चिह्नं स्यादन्नं भुक्तभक्तयोः ॥ ४५८ ॥
छादिते रहसि च्छन्नं पानं पीतौ च रक्षणे ।
खण्डने रक्षणे दानं त्यागे गजमदे तथा ॥ ४५९ ॥

शुद्धिलून्योश्चोनगर्ह्यौ हीनन्यूनौ त्रिलिङ्गकौ।
जिह्वायां रसना क्लीबे ध्वनावास्वादने न ना ॥ ४६० ॥
कुहना दम्भचर्यायामीर्ष्यालौ तु भवेत्रिषु।
तरुशैलौ शिखरिणौ बली वेगी तरस्विनौ ॥ ४६१ ॥
विषाणिनौ करी शृङ्गी प्रीणने रक्षणेवनम्।
स्वच्छे तलिनमल्पे च गम्भीरे गहनं वने ॥ ४६२ ॥
रोदनं त्वस्रुणि क्रन्दे प्रज्ञानं बुद्धिचिह्नयोः।
भुवने विष्टपजले धावने गतिशोधने ॥ ४६३ ॥
त्रैवर्णिकेण्डजे दन्ते द्विजन्मा तारकासु च।
न ना तु परिहारे स्याद्वर्जनं त्यागहिंसयोः ॥ ४६४ ॥
कुले नाशे च निधनं सूचना स्त्रीनपुंसकम्।
व्यधनेभिनये संज्ञापैशुन्यक्रिययोरपि ॥ ४६५ ॥
जीवनं राजलभ्यांशे जीविते तोयवर्तने।
उद्वानमुद्गमे चुल्ल्यां शयनं रतशय्ययोः ॥ ४६६ ॥
शासनं लेखशास्त्राज्ञा वर्तनी वृत्तिमार्गयोः।
तोदनं व्यधने तोत्त्रे प्रसूनं फलपुष्पयोः ॥ ४६७ ॥
दले पतत्रे छदनं विलग्नो लग्नमध्ययोः।
मेषादौ च तनुस्थे स्यात्प्रभोराराधने भवेत् ॥ ४६८ ॥
सेवनं सीवने पाशे बन्धनं स्नेहवृन्तयोः।
अब्जाकरेब्जे नलिनी वाहिनी सिन्धुसेनयोः ॥ ४६९ ॥
मैथुनं रतसंबन्धौ मिथुने युग्मदंपती।
सेनान्यौ गुहसेनेशौ ह्रादिन्यौ वज्रविद्युतौ ॥ ४७० ॥
सल्लकी च नदी च स्यात्त्रिष्वयं नादवत्यपि।
द्वयोर्वज्रेशनिः शम्पा रक्षोवृक्षौ पलाशिनौ ॥ ४७१ ॥
अरत्निः कूर्परे हस्ते सप्रकोष्ठतताङ्गुलौ।
वाणिन्यौ नर्तकीदूत्यौ भोगिनी देवताभिदि ॥ ४७२ ॥
विहाय महिषीमन्या भोगिन्यो राजयोषितः।
प्रधानं धीमहामात्यप्रकृत्यात्मसु सत्तमे ॥ ४७३ ॥

अश्वादीनां च संनाहे जये च जयनं भवेत् ।
व्यञ्जनं लाञ्छनश्मश्रुनिष्ठानावयवेष्वपि ॥ ४७४ ॥
संस्कारके भवेत्क्लीवे वादित्रकरणे पुमान् ।
स्यात्कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम् ॥ ४७५ ॥
स्यादुद्यानं राजमार्गे वनभेदे प्रयोजने ।
क्रतौ करकुके चास्त्री वितानं त्रिषु तुच्छके ॥ ४७६ ॥
मन्दे शून्ये विस्तृतौ ना गृहान्ते तूद्यमे तथा ।
उत्थानं पौरुषे तन्त्रे संनिविष्टोद्गमेपि च ॥ ४७७ ॥
व्युत्थानं प्रतिरोधे च विरोधाचरणेपि च ।
अञ्जनं कज्जलं माता कपेः स्त्री दिग्गजे पुमान् ॥ ४७८ ॥
प्रभिन्नोनेकतां प्राप्ते गजे जातमदे तथा ।
नालिकेरे हलधरे लाङ्गली जननं कुले ॥ ४७९ ॥
जन्मन्यम्बा च जननी वृद्धौ छेदे च वर्धनम् ।
अर्जुनौ वृक्षभित्पार्थौ तृणे क्लीविर्जुनी गवि ॥ ४८० ॥
त्रिषु शुक्ले केतनं तु गृहे केतौ निमन्त्रणे ।
आपन्न आपदं प्राप्ते प्राप्ते च स्यात्त्रिलिङ्गकः ॥ ४८१ ॥
देहवायौ समानो ना सत्तुल्यैकेषु तु त्रिषु ।
व्योमयानं विमानोस्त्री सप्तभूमे च वेश्मनि ॥ ४८२ ॥
इन्द्रिये विषयि क्लीवे त्रिषु स्याद्विषयान्विते ।
तपनोर्कौ नरकभित्प्राचीनं प्रान्ततो वृतिः ॥ ४८३ ॥
पाठायां स्त्री प्राग्भवे त्रिष्वन्तर्द्वारे रहस्यपि ।
प्रच्छन्नं छादिते गूढे त्रिष्वथ श्वसनो मरुत् ॥ ४८४ ॥
श्वासयुक्ते मरुवके पूतना तु हरीतकी ।
भूतभेदे द्वयोर्लाला स्यन्दिनी निम्नगा तथा ॥ ४८५ ॥
द्राक्षायां गोस्तनी हारभेदे ना धमनी नडी ।
सिराग्न्युद्दीपनं भाण्डं नडे नाथ नभोगतौ ॥ ४८६ ॥
कर्णीरथे च डयनं मार्जनी पांसुशोधनी ।
उपस्पर्शोत्पुंसनयोः क्लीवे ना रोध्रपादपे ॥ ४८७ ॥

मार्जना वाद्यपिण्डयां स्यात्तत्परीक्षार्थवादने ।
कुण्डली भुजगे बद्धकुण्डले तु भवेत्त्रिषु ॥ ४८८ ॥
त्रिषु शान्तो वराकश्च तपस्वी स्त्री तु मल्लकी ।
संधिन्यकालदुग्धा गौर्वृषाक्रान्ता च हायनाः ॥ ४८९ ॥
वत्सरार्चिर्व्रीहिभेदाः क्रन्दने ध्वानरोदने ।
विपत्तावशुभे भ्रंशे पानस्त्रीमृगयादिषु ॥ ४९० ॥
दैवानिष्टफले सक्तौ व्यसनं क्रोधदूषणे ।
निवृत्तौ दापने सिद्धौ गत्तावनुगमे धने ॥ ४९१ ॥
उपायमृतसंस्कारवधमेढ्रेषु साधनम् ।
अयनं पथि सूर्यस्याप्युदग्दक्षिणतो गतौ ॥ ४९२ ॥
पाकस्थाने कुलालस्य पवनं ना प्रभञ्जने ।
सोमनिर्मथने स्नाने सवनं यजने तथा ॥ ४९३ ॥
वामनो दिग्गजे विष्णौ निखर्वे भेद्यलिङ्गकः ।
अन्तके शमनः क्लीबे वधेथ जघनं कटौ ॥ ४९४ ॥
पश्चादर्धे नितम्बाग्रे कौपीनं गर्ह्यगुह्ययोः ।
पुमानक्षे जिघांसायां क्रीडायामपि देवनम् ॥ ४९५ ॥
मधूच्छिष्टे स्मरे वृक्षे वसन्ते मदनः पुमान् ।
पिण्डीतके कपित्थे च धत्तूरे मदकारिणि ॥ ४९६ ॥
वेदनानुभवः पीडा यापने त्यागवर्तने ।
कल्पना कर्तने कूप्तावुद्देशे गजसज्जने ॥ ४९७ ॥
त्रिकल्पे स्यादाकलने विधानेपि विभाजने ।
समीरणः स्पर्शनः स्यात्क्लीबे तु स्पर्शदानयोः ॥ ४९८ ॥
हिंसात्मके सूचने च गन्धनं स्यात्प्रकाशने ।
संतानः संततौ देववृक्षे चापत्यगोत्रयोः ॥ ४९९ ॥
स्तननं कुत्सिते ध्वाने देवशब्देथ सज्जना ।
न नेभसज्जीकरणे त्रिषु साधौ नपुंसकम् ॥ ५०० ॥
पटगुल्मे चेतना धीः पुंसि प्राणिनि तेजनी ।
मूर्वा शाणोपलस्तेजोवती वेणौ शरे पुमान् ॥ ५०१ ॥

स्पृक्कायां पिशुना दुष्टे सूचके त्रिषु वेष्टनम् ।
उष्णीषे मुकुटे चाथ शकुनी पक्षिणि द्वयोः ॥ ६०२ ॥
शुभशंसिनिमित्ते तु क्लीबेथ वृजिनः कचे ।
चर्मकिल्बिषयोः क्लीबे भूतात्मा धातृदेहयोः ॥ ६०३ ॥
संस्थानमाकृतौ मृत्यौ संनिवेशे चतुष्पथे ।
समाप्तौ च विभक्ते च विच्छिन्नं त्रिष्वथासनम् ॥ ६०४ ॥
करिस्कन्धे च पीठे च मलिनं समलैनसोः ।
आराधनं साधने स्यात्तोषणोपासयोरपि ॥ ६०५ ॥
अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि ।
आतञ्चनं प्रतीवापे जवनाप्यायने तथा ॥ ६०६ ॥
आस्कन्दने रणाक्रान्ती शोषणप्रापणे तथा ।
सूर्यवह्नी चित्रभानू मूर्खनीचौ पृथग्जनौ ॥ ६०७ ॥
कुलेप्यभिजनो जन्मभूम्यां चाथ समापनम् ।
वधेन्ते चापदानं तु खण्डनेद्भुतकर्मणि ॥ ६०८ ॥
निर्वासनं मारणे स्यान्नगरादेर्बहिष्कृतौ ।
शक्रघातुकमत्तेभवर्षुकाब्दा घनाघनाः ॥ ६०९ ॥
अभिमानोर्थादिदर्पे ज्ञाने प्रणयहिंसयोः ।
स्यादावेशनमावेशे शालायामपि शिल्पिनाम् ॥ ६१० ॥
निसूदने निरसनं निष्कासे च विरोचनाः ।
चन्द्राग्न्यर्का विश्वकर्मा मार्ताण्डसुरशिल्पिनोः ॥ ६११ ॥
निर्यातनं वैरशुद्धौ दाने न्यासार्पणेपि च ।
अभिपन्नोपराद्धाभिग्रस्तव्यापन्नतद्गताः ॥ ६१२ ॥
आच्छादनं संवननमपवारणमित्यपि ।
आयोधनं निघातः स्याद्युद्धं चाथ सनातनम् ॥ ६१३ ॥
नित्ये त्रिषु पुमान्विष्णौ स्तनयित्नुर्बलाहके ।
तद्ध्वनौ च महासेनो गुहे सेनापतावपि ॥ ६१४ ॥
ब्रह्मा कामश्चात्मयोनी पिञ्जे विहननं वधे ।
संस्कारे प्रतियत्नः स्यादुपग्रहणलिप्सयोः ॥ ६१५ ॥

विपर्यस्तमपाचीनं त्रिषु क्लीबे त्वपागपि ।
मेखलायां सारसनमुरस्त्रे च नपुंसकम् ॥ ९१६ ॥
उत्पत्तिः स्यादुत्पतनमूर्ध्वगमनमित्यपि ।
ग्रहणे कलनायां च बन्धे चाकलनं धृतौ ॥ ९१७ ॥
विद्यात्प्रवचनं वेदे व्याख्याने सुवचस्यपि ।
प्रतिमानं प्रतिच्छायागजदन्तान्तरालयोः ॥ ९१८ ॥
सामिधेनी त्वृक्समिधोरग्यजन्मा द्विजोग्रजः ।
विनीते त्रिष्वनूचानः साङ्गे वेदे च पाठकः ॥ ९१९ ॥
काषायवस्त्रार्धवृद्धा स्यात्कात्यायन्युमापि च ।
दृष्टौ श्रुते निशमनं कार्यहेत्वोः प्रयोजनम् ॥ ९२० ॥
आवर्जनं दाननती तथा भ्रंशमनोहृती ।
संमार्जनी शोधनी स्यात्क्लीबे क्षालनलेपने ॥ ९२१ ॥
संस्कृतौ क्षीरिकोत्कृष्टभोज्ये राजादनं भवेत् ।
पियालेथोपधानं स्याद्दृष्टान्तप्रतिबिम्बयोः ॥ ९२२ ॥
गण्डके चाथ कारम्भा विश्वक्सेना हरौ गणे ।
पुमानथ क्रतुध्वंसी प्रोक्तः शर्वश्च दानवः ॥ ९२३ ॥
प्रसाधनी कङ्कतिका क्लीबे त्वाराधनार्जने ।
मण्डनायां कृष्णवर्त्मा हव्यवाहनपापयोः ॥ ९२४ ॥
उपासनं शराभ्यासे नमस्यासेवयोर्न ना ।
आम्रातके शिरीषे च प्लक्षे च स्यात्कपीतनः ॥ ९२५ ॥
उष्ट्राहितुण्डिकौ व्यालग्राहिणौ मातुलप्रिया ।
मातुलानी तथा भङ्गा विषौषध्योः प्रदीपनः ॥ ९२६ ॥
बोधने प्रतिदाने च भवेत्तु प्रतिपादनम् ।
कुङ्कुमे देववृक्षे च पुंसि वा हरिचन्दनम् ॥ ९२७ ॥
अन्तावसायी चण्डाले नापिते च द्विलिङ्गकः ।
वधेतिसर्जनं दाने शुद्धौ त्यागेपमार्जनम् ॥ ९२८ ॥
स्यादुपस्पर्शनं स्पर्शे स्नानाचमनयोरपि ।
विसर्जनीयाक्षरयोरभिनिष्टानमस्त्रियाम् ॥ ९२९ ॥

मेघवाहन इन्द्रः स्याद्वायुश्च शकुलादनी ।
कटुका लाङ्गली च स्याद्धरिद्रा वरवर्णिनी ॥ ६३० ॥
नायिका च तपस्वी स्यात्सर्पश्च पवनाशनः ।
प्रतिबिम्बे प्रतीकारे न पुंसि प्रतियातना ॥ ६३१ ॥
वेश्या नखौषधिर्हट्टविलासिन्यावपि स्मृते ।
ओड्रपुष्पे जपा मन्त्रावृत्तौ ना भयवेपथू ॥ ६३२ ॥
स्वरभिद्वरुणः कम्पो भावभेदश्च सात्त्विकः ।
ग्रन्थावृत्तौ पशौ शब्दे नाटकादिस्वभावयोः ॥ ६३३ ॥
सौन्दर्याकारयो रूपं रङ्गसीसकयोस्त्रपु ।
कल्पः शास्त्रे विधौ न्याय्ये संवर्ते ब्रह्मणो दिने ॥ ६३४ ॥
गर्तोदपानयोः कूपस्तथा स्याद्गुणवृक्षके ।
क्षेपणावज्ञयोः क्षेपो लेपो लेपनमृत्क्रिये ॥ ६३५ ॥
आक्रोशे शपथे शापः पुष्पमार्तवसूनयोः ।
द्वयोर्गोपी वल्लवी स्त्री शारिवा पातरीश्वरे ॥ ६३६ ॥
गोष्ठाध्यक्षे ग्रामवृन्दपतौ गोपो भवेत्त्रिषु ।
तल्पं शय्याट्टदारेषूपर्याधारेषु वेश्मनः ॥ ६३७ ॥
तापद्रव्यभिदौ धूपौ वपा विवरमेदसोः ।
वाष्पावूष्मास्तुणी सूपो व्यञ्जने सूपकारके ॥ ६३८ ॥
ग्रन्थिपर्णे तु शष्पं स्याद्व्रीहौ रूढे हरित्तृणे ।
शाखायां विस्तृतौ स्तम्बे विटपं पुंनपुंसकम् ॥ ६३९ ॥
आक्षेपौ भर्त्सनाकर्षावुडुपः प्लवचन्द्रयोः ।
आवाप आलवाले स्यात्प्रक्षेपे वलये तथा ॥ ६४० ॥
रूढप्रधानयोर्नीतितन्त्रे स्यादथ कल्पने ।
वेशे चाकल्प आच्छादनान्ने कशिपु ते पृथक् ॥ ६४१ ॥
कुतपो वाद्यविन्यासे दर्भकालप्रभेदयोः ।
छागरोममये वस्त्रे कूर्मी वीणा च कच्छपी ॥ ६४२ ॥
कलापः संहतौ बर्हे काञ्चीतूणीरयोरपि ।
प्रतापावातपख्याती सुरूपो बुधरूपिणोः ॥ ६४३ ॥

प्राप्तरूपाभिरूपौ चावलेपौ मदगर्हणे ।
परिच्छदे परीवापो वपने सलिलस्थितौ ।। ६४४ ।।
वृषाकपी विष्णुशिवावग्निरिन्द्रो दिवाकरः ।
हेमपुष्पी तु दुःस्पर्शा बिम्बिका पीतयूथिका ।। ६४५ ।।
श्रीवासः सिल्हकश्च स्याद्वृकधूपोथ वेतसे ।
जले च मेघपुष्पं स्यादुपक्षेप उपक्रमे ।। ६४६ ।।
कालादेरतिवाहे च रेफः स्यात्पापवर्णयोः ।
कम्बुर्ना वलये शङ्खे शालिधूलौ च मण्डले ।। ६४७ ।।
बिम्बोष्ठी प्रतिबिम्बे ना क्लीबे स्याद्बिम्बिकाफले ।
पूर्वोन्यलिङ्गः प्रागाह पुंबहुत्वेपि पूर्वजान् ।। ६४८ ।।
आद्यर्थे तु भवेत्क्लीबे डिम्बौ तु प्लीहविप्लवौ ।
शम्बः स्यान्मुसलाग्रस्थे लोहे श्रेयोन्विते पवौ ।। ६४९ ।।
कादम्बः सायकः पक्षी कदम्बः संहतौ द्रुमे ।
द्विजिह्वः सर्पखलयोर्नितम्बोद्रितटे कटौ ।। ६५० ।।
अन्तराभवसत्त्वेश्वे गन्धर्वो दिव्यगायने ।।
मृगभेदेथ हेरम्बो महिषे विघ्ननायके ।। ६५१ ।।
संविभज्ये जने गेहे कुटुम्बं स्यान्नपुंसकम् ।
नक्षत्रे भं प्रभायां स्त्री कुम्भी स्यात्कट्फले द्वयोः ।। ६५२ ।।
जलादिभाण्डे ना हस्तिकटराशिभिदोस्तथा ।
सावष्टम्भे ग्रहे कुम्भा शंभुरर्हन्विधिः शिवः ।। ६५३ ।।
विभुः स्वामी व्यापकश्च डिम्भौ तु शिशुबालिशौ ।
स्तम्भाः स्थूणागर्वभावाः स्वभूर्गोविन्दवेधसोः ।। ६५४ ।।
कुक्षिभ्रूणाशया गर्भा बालकाभ्यन्तरेपि च ।
जृम्भा विकासे प्रसरे व्यादाने वदनस्य तु ।। ६५५ ।।
त्रिषु गात्रविरामेजे शुभो भद्रे नपुंसकम् ।
क्षत्रिये विजिगीषौ च ना प्राण्यवयवे पुनः ।। ६५६ ।।
नाभिः स्त्री चक्रमध्येपि निभो व्याजे समे त्रिषु ।
संसद्गोष्ठ्योर्गृहे द्यूते सभा जम्भो रयेशने ।। ६५७ ।।

दैत्यभेदे मुखे शक्तस्वामिनोस्तु प्रभुस्त्रिषु ।
रम्भाप्सरोभित्कदली दण्डे स्याद्वैणवे पुमान् ॥ ९५८ ॥
वीणाप्रसेवे ककुभो गेयभेदेऽर्जुनद्रुमे ।
गीतस्वरे बलीवर्दे श्रेष्ठे च ऋषभः पुमान् ॥ ९५९ ॥
कनिष्ठामणिबन्धान्तरोष्ट्रयोः करभोऽथ गौः ।
सुरभिः स्त्री कामधेनुः सल्लकी चैलवालुकी ॥ ९६० ॥
सुरायां स्यात्सुगन्धौ तु मनोज्ञे त्रिषु ना मधौ ।
ना भेर्यां दुन्दुभिः स्त्री स्यादक्षबिन्दुत्रिकद्वये ॥ ९६१ ॥
स्यान्महारजने क्लीबे कुसुम्भं करके पुमान् ।
पुनर्नवायां वर्षाभूः स्त्री वर्षाभ्वी द्वयोः प्लवे ॥ ९६२ ॥
विस्तारे प्रतिबिम्बे च विष्कम्भो नाटकांशके ।
वल्लभो दयितेऽध्यक्षे हये च प्रणये पुनः ॥ ९६३ ॥
स्यादाश्वासे च विस्रम्भो वृषभो द्रव्यभिद्गवोः ।
आलम्भौ स्पर्शनवधावारम्भौ तु क्रमोद्यमौ ॥ ९६४ ॥
जनाभ्यन्तरयोः पुंसि विदर्भस्त्रिषु निष्कुशे ।
विप्रलम्भो विसंवादो विरहो वञ्चना तथा ॥ ९६५ ॥
कुत्साप्रश्नवितर्केषु किं मा लक्ष्मीप्रमाणयोः ।
लक्ष्मीर्हरिप्रिया संपच्छोभा ब्राह्मी तु मातृभित् ॥ ९६६ ॥
वागोषधिभिदौ ब्रह्मभवादौ तु भवेत्त्रिषु ।
रामा योषिद्दाशरथौ जामदग्न्ये हलायुधे ॥ ९६७ ॥
मृगभेदे च पुंसि स्यात्कृष्णे चारौ सिते त्रिषु ।
भार्गीश्रीपद्मचारिण्यः पद्मा अब्जेऽस्त्रियां पुमान् ॥ ९६८ ॥
संख्यानिधिव्यूहनागभित्क्लीबे गजबिन्दुषु ।
स्याद्धर्ममस्त्रियां पुण्ये क्लीबे तत्साधने पुमान् ॥ ९६९ ॥
स्वभावदेवभिन्न्याययमाचारेषु सोमपे ।
अहिंसोपमयोश्चाथ जामिः स्वसृकुलस्त्रियोः ॥ ९७० ॥
काम्ये स्वैरे च कामः स्यादभिलाषे मनोभवे ।
अव्ययं त्वभ्यनुज्ञाने सोम ओषधिभेशयोः ॥ ९७१ ॥

यमोन्तकः कर्म च यन्नित्यं सहजयोरपि ।
क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु ॥ ६७२ ॥
त्रिषु श्यामौ हरित्कृष्णौ स्त्रियां स्याच्छारिवानिशोः ।
कान्ता प्रियङ्गुः पालिन्दी वटभेदे तु पुंस्ययम् ॥ ६७३ ॥
समा वर्षेनुचनीचे त्रिषु सर्वसदृक्षयोः ।
गुल्मो रुक्स्तम्बसेनाभिद्रक्षास्थानेषु गह्वरे ॥ ६७४ ॥
उष्णे स्वेदाम्भसि ग्रीष्मे घर्मो भावभिदातपे ।
त्रिषु तोक्मं हरिन्मात्रे न स्त्रियां हरिते यवे ॥ ६७५ ॥
सीमावधौ स्थितौ क्षेत्रे विषये केशभूषणे ।
वृक्षमात्रे पारिजाते द्रुमश्चैद्यकुलोद्भवे ॥ ६७६ ॥
कुशलं क्षेममस्त्री ना त्वौषधे लब्धरक्षणे ।
ग्रामः संवसथे गेयभेदे वृन्दे सपूर्वकः ॥ ६७७ ॥
भ्रमिर्मोहस्तक्षभाण्डं स्यादतस्मिंस्तु तद्ग्रहः ।
भ्रमो मूर्छा तक्षभाण्डं छन्नमम्बुविनिर्गमः ॥ ६७८ ॥
रश्मिर्घृणिप्रग्रहयोः स्याद्गङ्गादुर्गयोरुमा ।
भीमो रुद्रे सभीष्मस्तु राजभेदे भयानके ॥ ६७९ ॥
अध्यात्मं सूक्ष्ममल्पे तु त्रिषु शीते हिमं त्रिषु ।
क्लीबे तुषारे भूमिः स्यात्स्थानं पात्रं धरा दशा ॥ ६८० ॥
वामा योषित्त्रिषु वल्गौ स्यात्सव्यप्रतिकूलयोः ।
वाम्यश्वा हार्यवस्त्वर्थवाहयुग्मकृतेपि सा ॥ ६८१ ॥
कुटिले मन्दके जिह्मो दमौ दण्डेन्द्रियग्रहौ ।
श्रमः प्रयत्ने खेदे च क्रिमिः स्यात्कीटरोगयोः ॥ ६८२ ॥
परिपाटी क्रमः कल्पः पादक्षेपः परंपरा ।
आनन्तर्यं पदसंधिः शमी शिम्बा द्रुभित्स्त्रियाम् ॥ ६८३ ॥
कूर्मी भवेद्द्वयोः प्राणी यमिनामासनेस्त्रियाम् ।
नेमिः स्त्री रथचक्रान्ते कूपाङ्गे तिनिशे तु ना ॥ ६८४ ॥
शान्तिर्हस्तः शमो राज्ञां व्यवस्था निजमण्डले ।
आमो रोगे त्रिष्वपक्के स्तोमः संघेध्वरे स्तुतौ ॥ ६८५ ॥

पाणेर्मध्याङ्गुलिर्दृष्टरजाः कन्या च मध्यमा ।
गीतस्वरे देहमध्ये देशराजभिदोः पुमान् ॥ ९८६ ॥
अन्यूनानतिरिक्ते च तथा मध्यभवे त्रिषु ।
भयसंवेगादरेषु संभ्रमोथ परिश्रमे ॥ ९८७ ॥
व्यायामः पौरुषे कृत्ये विद्रुमो वृक्षरत्नयोः ।
यन्त्रणायां प्रतिज्ञायां नियमो निश्चये व्रते ॥ ९८८ ॥
हेलाभ्रान्त्योर्विभ्रमः स्याच्छक्तौ क्रान्तौ च विक्रमः ।
तलिमः कुट्टिमे तल्पे शास्त्रे ग्रहण आगमः ॥ ९८९ ॥
गत्यभाववद्रुदुर्गेष्वगमो बुद्धस्तु गौतमः ।
मुनौ द्वयोः संगमस्तु नदीसंभेदसङ्गयोः ॥ ९९० ॥
आश्रमो ब्रह्मचर्यादौ मठे स्थाने तपस्विनाम् ।
वणिक्पथः पुरं वेदो निगमास्त्रिष्वतो वणिक् ॥ ९९१ ॥
नैगमो नागरो विप्रः श्रेष्ठः साधुश्च सत्तमः ।
आद्ये प्रधाने प्रथमोथाधमौ न्यूनगर्हितौ ॥ ९९२ ॥
बुध्नस्थश्चावमोप्येवमग्रिमोग्र्यप्रधानयोः ।
उत्कृष्टे परमश्चाप्यभ्यनुज्ञानेऽव्ययं पुनः ॥ ९९३ ॥
ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु ।
रत्ने शृङ्गे श्वेतगुणे तिलके स्याल्ललाम च ॥ ९९४ ॥
निष्क्रमो निर्गमो बुद्धिसंपच्चाथ परिश्रमः ।
व्यायामयत्नखेदेषु युद्धे त्वभ्यागमो भवेत् ॥ ९९५ ॥
आभिमुख्यागतौ चोपशमः शान्तिर्विनीतता ।
उपक्रमश्चिकित्सायामारम्भोपधयोरपि ॥ ९९६ ॥
अङ्गीकृतावुपगमः समीपगमनेपि च ।
जीर्णे च परिभुक्ते च यातयामं भवेत्त्रिषु ॥ ९९७ ॥
ज्या मौर्वी भूश्च नाके द्यौरन्तरिक्षे तथा स्त्रियाम् ।
ज्या गव्या गोसमूहे च रागद्रव्ये नपुंसकम् ॥ ९९८ ॥
गोक्षीरादौ त्रिषु पुनः स्यादर्यः स्वामिवैश्ययोः ।
कल्यं प्रातः सुरायां स्त्री कल्याण्यां वाच्यपि त्रिषु ॥ ९९९ ॥

सज्जनीरोगदक्षेषु काल्यं तु स्यादहर्मुखे ।
प्राप्तकाले त्रिषु भवेद्भाग्यं कर्म शुभाशुभम् ॥ ६०० ॥
यौतकादौ धने दायो दाने भोज्ये च पैतृके ।
विवाह्याया ज्ञातिभृत्या जन्याः स्निग्धा वरस्य च ॥ ६०१ ॥
निर्वादे जनके युद्धे क्लीबे कार्ये तु स त्रिषु ।
आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम् ॥ ६०२ ॥
उपायः कर्म चेष्टा च चिकित्सा करणं क्रियाः ।
धात्वर्थाख्यातसंस्कारा और्ध्वदेहिकमेव च ॥ ६०३ ॥
शाखापुरे न ना गृह्यं त्रिषु त्वस्वैरिपक्ष्ययोः ।
गृहासक्ताण्डजमृगे गृह्या तु स्याद्बहिर्भवा ॥ ६०४ ॥
आहते हेम्नि रजते वा रूप्यं रजतेपि च ।
त्रिषु प्रशस्तरूपे स्यान्माल्यं पुष्पेपि तत्स्रजि ॥ ६०५ ॥
हृद्भवं हृत्प्रियं हृद्यं हृदयाय हितं त्रिषु ।
वशीकरणमन्त्रे ना सत्यं शपथतथ्ययोः ॥ ६०६ ॥
भव्यौषधधने द्रव्यं गुणाधारगवोस्तथा ।
विशेष्ये परमाणौ च तिष्यपुष्यौ कलौ च भे ॥ ६०७ ॥
पुण्यं तु धर्मे सुकृते त्रिषु पूतमनोज्ञयोः ।
सौम्यो बुधे मनोज्ञे च त्रिषु स्यात्सोमदैवते ॥ ६०८ ॥
पूजार्थे द्रव्यमर्घ्यं स्यादर्घार्थार्घार्हयोस्त्रिषु ।
शरामान्तर्व्रणौ शल्ये प्राण्योषधिनृपेषु ना ॥ ६०९ ॥
स्पर्धाकाञ्च्योर्दन्तिमध्यरज्ज्वौ कक्ष्या गृहान्तरे ।
प्रतिज्ञायां तुलायां च पुंसः सारसनेपि च ॥ ६१० ॥
त्रिषु रथ्यो रथोद्वाहे स्त्रियां मार्गरथौघयोः ।
देहसंघातलक्ष्येषु कायस्त्रिषु कदैवते ॥ ६११ ॥
क्षयो निलयकल्पान्तरोगापचयमृत्युषु ।
त्रिषु सद्भावियोग्येषु भव्यः क्लीबे शिवे फले ॥ ६१२ ॥
मृतावनशने प्रायो बाहुल्ये सदृशे त्रिषु ।
धिष्ण्यं स्थाने गृहे भे ना दैत्याचार्याग्निभेदयोः ॥ ६१३ ॥

सर्वज्ञभिषजौ वैद्यौ स्याच्छय्या तल्पगुम्फयोः ।
तुरंगगरुडौ तार्क्ष्यौ पूज्यौ श्वशुरसज्जनौ ॥ ६१४ ॥
रिपुतस्करयोर्दस्युर्वर्यः प्रार्थ्यप्रधानयोः।
वामदक्षिणयोः सव्यमर्थ्यौ न्याय्यविपश्चितोः ॥ ६१५ ॥
अधमान्तभुवोरन्त्यो मध्यो न्याय्यावलग्नयोः ।
अन्तरेनधिकन्यूने मध्ये तूद्दिश्यवाचकः ॥ ६१६ ॥
इतरासदृशावन्यौ त्रिवेद्यां त्रितये त्रयी ।
रहस्योपस्थयोर्गुह्यं मन्युर्दैन्ये क्रतौ क्रुधि ॥ ६१७ ॥
पूजाव्रतक्रिये चर्ये गेयौ गातव्यगायनौ ।
ययुरश्वेश्वमेधाश्वे मूल्यं विनिमये धने ॥ ६१८ ॥
काव्यं ग्रन्थे ग्रहे पुंसि कुल्या नीरप्रणालिका ।
नदी च क्लीबमस्थ्नि स्याद्वाच्यलिङ्गं कुलोद्भवे ॥ ६१९ ॥
त्रिषु चोद्यं चोदनार्हे क्लीबे स्याच्चोदनेद्भुते ।
त्रिषु गोप्यं गोपनीये गोप्या दासस्य सूनवः ॥ ६२० ॥
प्रवीणोचितयोर्योग्यस्त्रिष्वभ्यासे भवेत्स्त्रियाम् ।
एकत्वादौ विचारे च संख्या क्लीबे तु संयुगे ॥ ६२१ ॥
प्राप्तव्येम्बुमये चाप्यं याप्ये नेतव्यगर्हिते ।
मुखं मुखान्तरं चास्यमासने स्त्री हरीतकी ॥ ६२२ ॥
पथ्यार्याभिच्चौषधे तु क्लीबे त्रिष्वगते पथः ।
पाक्यं काचे यवक्षारे विडे पाकार्हणे त्रिषु ॥ ६२३ ॥
छेदनीये त्रिषु भवेत्कृत्यो विद्विष्टकार्ययोः ।
स्त्रियां क्रियादेवतयोर्वाच्यं तु त्रिषु कुत्सिते ॥ ६२४ ॥
उपालभ्ये च चैत्यः स्यात्स्तूप उद्देशपादपे ।
प्राकारमूलबन्धे च संघसंचययोश्चयः ॥ ६२५ ॥
साध्या देवभिदः पुंसि भूम्नि शक्ये पुनस्त्रिषु ।
वन्या वनसमूहे स्त्री वने साधुनि तु त्रिषु ॥ ६२६ ॥
छाया स्यादातपाभावे प्रभाप्रतिमयोरपि ।
सूर्यप्रियायां गङ्गायां संवाहन्याय्ययोरपि ॥ ६२७ ॥

सद्योगे त्रिषु सोढव्य आरोग्ये तु नपुंसकम् ।
वीर्यं बलं प्रभावश्च रेतः स्याद्वीरकर्म च ॥ ६२८ ॥
देवीभेदे जयौषध्योर्द्वयोर्ना भारते गणे ।
उत्कर्षेऽभिभवे चार्या ज्येष्ठब्राह्मणसज्जनाः ॥ ६२९ ॥
छन्दोभित्स्त्री चिता चित्या स्यादग्निचयने न ना ।
सभ्यः सामाजिकेऽग्नौ च तथा प्रत्ययिते त्रिषु ॥ ६३० ॥
दूष्येभमध्यबन्धन्यां क्लीबे पटगृहे त्रिषु ।
दूषणीये बले सैन्यं त्रिषु तत्समवायिनि ॥ ६३१ ॥
माया स्याद्बुद्धजननी वञ्चनाविद्ययोरपि ।
तदधिष्ठातृदेव्यां च जात्यं कुलजकान्तयोः ॥ ६३२ ॥
आदित्यौ सूर्यगीर्वाणौ श्वशुर्यौ स्यालदेवरौ ।
त्रिषु हर्तुमशक्ये स्यादहार्यः पर्वते पुमान् ॥ ६३३ ॥
स्यान्नादेयी भूमिजम्बूस्तर्कारी जलवेतसः ।
त्रिषु नद्यां भवे पश्चाज्जघन्यं त्रिषु गर्हिते ॥ ६३४ ॥
अभिलाषविनिर्मुक्ते प्रणाय्यः स्यादसंमते ।
आधार आशयः स्याद्धृद्यभिप्रायेऽश्वसंहतिः ॥ ६३५ ॥
अश्वीयं स्यादश्वहिते त्रिष्वपत्यं तु पुत्रयोः ।
ब्राह्मण्यं ब्राह्मणत्वे च तथा तत्कर्मसंघयोः ॥ ६३६ ॥
मलयौ पर्वतारामौ भ्रातृव्यौ भ्रातृजद्विषौ ।
विस्रम्भयाञ्चाप्रेमाणः प्रणयाः संस्तवोऽपि च ॥ ६३७ ॥
संघाते संनिवेशे च संस्त्यायः स्याद्गृहे तथा ।
पश्चादवस्थायिबलं संनयो द्रव्यमेलनम् ॥ ६३८ ॥
कषायः सुरभौ स्निग्धे भाविते त्रिषु ना रसे ।
द्रवे वर्णे चित्तधर्मेऽवस्नेहे स्त्री पुनर्मले ॥ ६३९ ॥
काञ्चिकस्य द्वितीया तु जाया स्यात्पूरणे त्रिषु ।
स्थाने विहंगमावासे कुलायं पुंनपुंसकम् ॥ ६४० ॥
कशेरुहेम्नोर्गाङ्गेयं पुंसि भीष्मे गणाधिपे ।
त्रिषु वामे प्रसव्यः स्यात्प्रतिकूलानुकूलयोः ॥ ६४१ ॥

शोभायां नाम्नि कीर्तावप्यभिख्या क्षेत्रियस्त्रिषु ।
अन्यदेहचिकित्सार्हे त्रिपादौ क्षेत्रिजे तृणे ॥ ६४२ ॥
असाध्यरोगे दुःशोध्ये तृणादौ पारदारिके ।
विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि ॥ ६४३ ॥
आधारे ग्रामसंघे च व्यवायो व्यवधौ रते ।
हृदयं वक्षसि स्वान्तेभिप्रायाभ्यन्तरोण्डुके ॥ ६४४ ॥
चित्रादर्पौ विस्मयौ तु पर्यायोर्थसमे क्रमे ।
निकायः स्यान्निवासे च संघे राशीकृतौ तथा ॥ ६४५ ॥
समयाः शपथाचारकालसिद्धान्तसंविदः ।
प्रत्ययोधीनशपथज्ञानविश्वासहेतुषु ॥ ६४६ ॥
रन्ध्रे शब्दे प्रथायां च संवादे मेषकम्बलौ ।
ऊर्णायू स्यात्तु सौरभ्यं सौगन्ध्यं रम्यता तथा ॥ ६४७ ॥
मेघे तु सध्वनौ शक्रे पर्जन्यो मेघदैवते ।
हिरण्यं हेम्नि तन्मानभेदेर्थे स्यादकुप्यके ॥ ६४८ ॥
प्रलयौ मृत्युसंवर्तौ मूर्छा भावश्च सात्त्विकः ।
न नातिथ्यमतिथ्यर्थमतिथौ तु नपुंसकम् ॥ ६४९ ॥
व्यसनान्यशुभं दैवं विपदित्यनयास्त्रयः ।
क्लेशे दण्डे च दोषे च विनाशेतिक्रमेत्ययः ॥ ६५० ॥
पानीयं सलिले पेयरक्ष्ययोस्त्रिष्वथोदयः ।
पूर्वाद्रिरुद्गमो वृद्धिः स्थेये स्थानहिते पुरे ॥ ६५१ ॥
स्थानीयमुत्तरपदे त्रिषु स्यादुपमार्थकम् ।
छचायां पुंसि शालेयः क्षेत्रे क्लीवमथाभयम् ॥ ६५२ ॥
भयाभाव उशीरं च स्त्री पथ्या निर्भये त्रिषु ।
राजस्याले राष्ट्रियः स्यात्त्रिषु राष्ट्रभवादिके ॥ ६५३ ॥
शीर्षण्यो विषदे केशे शिरस्त्रे तु नपुंसकम् ।
शिरोभवे तद्धिते च प्रधाने चान्यलिङ्गकः ॥ ६५४ ॥
संचयः संग्रहे संघ आत्रेयी स्याद्रजस्वला ।
अत्र्यपत्ये त्रिषु फले मदनस्यापि कट्फले ॥ ६५५ ॥

कैडर्यै तूलवृक्षे तु ब्रह्मण्यो ब्रह्मणो हिते।
त्रिष्वन्वयो वंशवाक्यपदमेलनयोस्तथा ॥ ६५६ ॥
संबन्धेऽव्यभिचारे च चाम्पेयो नागकेसरे।
चम्पके चाथ विजयौ गणभेदेर्जुने गतौ ॥ ६५७ ॥
पराभिभूतौ देव्यां स्त्री हृषीके शेपसीन्द्रियम्।
हृच्छयौ मदनात्मानौ स्यादाम्नायोन्वये श्रुतौ ॥ ६५८ ॥
निलयः स्यात्क्षये स्थाने निचयौ संघसंचयौ।
पर्वतादेश्च वप्रं स्यादुच्चयोप्युञ्छसंघयोः ॥ ६५९ ॥
शाण्डिल्यो मुनिभेदे स्यात्पुंसि बिल्वमहीरुहे।
प्रचयौ स्वरभित्संघौ भूरिमायस्तु राक्षसः ॥ ६६० ॥
सृगालश्चाथ नलदे जलाधारे जलाशयः।
समवायौ श्लेषसंघौ मेरुस्वर्गौ सुरालयौ ॥ ६६१ ॥
देवागारेप्यथ सुरा सीरिभार्या हलिप्रिया।
नीपे नाथोपकार्या स्यात्पटकुट्यां तथा त्रिषु ॥ ६६२ ॥
संविभज्ये रणे संघे समुदायोपि संविदि।
आतिथेयी स्त्रियां पूजातिथिसाधौ भवेत्रिषु ॥ ६६३ ॥
युद्धायत्योः संपरायो वैरोन्नत्योः समुच्छ्रयः।
स्थूलोच्चयस्त्वसाकल्ये दन्तिनां मध्यमे गते ॥ ६६४ ॥
समुद्गमे समुदयः संग्रामनिकुरुम्बयोः।
दोषे द्वेषे चानुशयः पश्चात्तापानुबन्धयोः ॥ ६६५ ॥
पुंसां संघे पौरुषेयं त्रिषु तेन कृते वधे।
विकारे तस्य हुतभुक्पार्थयोः स्याद्धनंजयः ॥ ६६६ ॥
हलीन्दुजौ रौहिणेयौ सभास्थाने प्रतिश्रयौ।
भयंकरे प्रतिभयं त्रिषु भीतौ नपुंसकम् ॥ ६६७ ॥
भागधेयो बलौ भागे भाग्ये क्लीबे समाह्वयः।
रणे द्यूते वासतेयी रात्रौ तत्साधुनि त्रिषु ॥ ६६८ ॥
स्यादभ्यासे परिचयः संस्कारे मेलने तथा।
चन्द्रोदयो विताने स्याद्द्विजराजोद्गमे तथा ॥ ६६९ ॥

वक्ता प्रवचनीयः स्यात्प्रवाच्यश्च त्रिलिङ्गकः ।
वृषाकपायी श्रीगौरी स्वाहेन्द्राण्यृषिभार्ययोः ॥ ६७० ॥
राः स्वर्णधनयोः श्रीस्तु शोभालक्ष्मीसमृद्धिषु ।
प्रशंसायां पुरे पूः स्याद्गृहे काये स्त्रियामथ ॥ ६७१ ॥
धू रथावयवे स्त्री स्यात्तथा वोढव्यमात्रके ।
द्रुर्द्रुमे विटपे शौरी नारायणशनैश्चरौ ॥ ६७२ ॥
उरुर्महत्सु त्रिषु स्त्री भूश्रीरी स्याज्झिल्लिका मृगे ।
ना क्लीवे व्रतिनां वस्त्रे वारः काले क्रमे चये ॥ ६७३ ॥
छत्त्रोषधावातपत्रे क्लीवे पादे नखौषधौ ।
खुरः शरो नडे बाणे दधिसारेथ वायसे ॥ ६७४ ॥
वाल्यर्जुनजयन्तेषु स्यादिन्द्रिरथ राक्षसे ।
रुरुश्चित्रमृगे गुन्द्रा प्रियङ्गुः सैरिकैरका ॥ ६७५ ॥
अक्षमालाग्रफलके मेरुः सुरगिरौ तथा ।
अम्लवेतसवृक्षाम्लाम्लाश्रुकात्रिषु तद्रसे ॥ ६७६ ॥
रोमच्छेदककाण्डेक्षू क्षुरौ तीक्ष्णे भवेत्त्रिषु ।
शब्दोपतापिनोर्वर्णे षड्जोदात्तादिषु स्वरः ॥ ६७७ ॥
गौर्यजातरजाः कन्या पार्वती त्रिषु पाण्डुनि ।
पीतेरुणे च राष्ट्रोस्त्री विषये स्यादुपद्रवे ॥ ६७८ ॥
मित्रं सुहृदि पुंस्यर्के मरू धन्वधराधरौ ।
अद्रयो द्रुमशैलार्काः कारुः कारकशिल्पिनोः ॥ ६७९ ॥
गोत्रा भूर्गोसमूहश्च नाद्रौ क्लीबेभिधाकुले ।
तिलकालेख्याद्भुतेषु चित्रं त्रिषु तु कर्बुरे ॥ ६८० ॥
सुभद्रौषधिभेषु स्त्री क्षेत्रं पत्नीशरीरयोः ।
गणितव्यवहारे च तीर्थे केदारयोग्ययोः ॥ ६८१ ॥
ज्यैष्ठेयौ भार्गवे शुक्रः क्लीवे रेतोक्षिरोगयोः ।
गुरुः संस्कारके पुंसि पित्रादौ सुरमन्त्रिणि ॥ ६८२ ॥
दुर्जरालघुनोः स्थूल आराध्ये च त्रिलिङ्गकः ।
त्रिषु क्षुद्रोल्पकृपणक्रूरगर्ह्येष्वपि स्त्रियाम् ॥ ६८३ ॥

व्यङ्गा नटी शीलहीना सरघा कण्टकारिका ।
वरो विवाह्ये देवादेः प्रार्थिते स्वीकृतौ गवि ॥ ६८४ ॥
श्रेष्ठे त्रिष्वोषधौ स्त्री स्यान्मनागिष्टेऽव्ययं पुनः ।
क्लीबे च कुङ्कुमे पारी पात्रं पारा नदीभिदि ॥ ६८५ ॥
तीरात्तीरान्तरे क्लीबं समाप्तौ सर्वसंग्रहे ।
तन्त्रं प्रधाने सिद्धान्ते तन्तुवाने परिच्छदे ॥ ६८६ ॥
आयत्तश्लेषशास्त्रोक्तप्रक्रियाशब्दसिद्धिषु ।
स्वमण्डलादिचिन्तायामौषधादावुपस्करे ॥ ६८७ ॥
वीणादीनां गुणे नाड्यां तन्त्री स्यादात्मनः पृथक् ।
युक्तश्च दूरश्रेष्ठारिपूर्वान्या भेद्यवत्परा: ॥ ६८८ ॥
शारोऽनिले द्यूतभाण्डे त्रिषु वर्णे तु कर्बुरे ।
गर्तदूषणयोश्छिद्रं रन्ध्रं च विवरं तथा ॥ ६८९ ॥
मुक्ताशुद्धौ स्वरेऽत्युच्चे स्यात्तारः शुद्धमौक्तिके ।
देवीभनेत्रमध्ये स्त्री क्लीबे रूप्ये त्रिषूद्भटे ॥ ६९० ॥
अभ्युत्कर्षाम्बुवेगाश्वगतिभेदेषु संततौ ।
अग्रस्कन्धे तु सैन्यस्य धारोऽस्त्रांशौ गवि द्वयोः ॥ ६९१ ॥
दम्भराष्ट्रायुध - - चक्रं सेनारथाङ्गयोः ।
पुटभेदे चये शिल्पिभाण्डे चक्राह्वये पुमान् ॥ ६९२ ॥
परिच्छदाल्पमानेषु धने कर्णविभूषणे ।
तालाङ्केऽप्यक्षरांशे स्त्री मात्रं कात्स्न्र्येवधारणे ॥ ६९३ ॥
यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ।
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ॥ ६९४ ॥
पुरोऽधिकमुपर्यग्रं भिक्षाभेदप्रधानयोः ।
गजाग्रजङ्घयोः शक्तौ गात्रमङ्गे कलेवरे ॥ ६९५ ॥
उग्रः शूद्रासुते क्षत्रादुत्कटे त्रिषु ना शिवे ।
दीक्षितस्याधिदैवे च व्याघ्री प्राण्योषधी द्वयोः ॥ ६९६ ॥
नागानां जननी कद्रूः कद्रुस्तु त्रिषु पिङ्गले ।
विपुले नकुलेऽग्नौ च बभ्रुः स्यात्पिङ्गले त्रिषु ॥ ६९७ ॥

नेत्रं पट्टे मन्थगुणे तरुमूले विलोचने ।
वस्तिनाड्यां चाथ पोत्रं मुखाग्रे हलकोलयोः ॥ ६९८ ॥
जरा रुग्भङ्गयोरस्त्री वप्रः प्राकाररोधसोः ।
केदारे सीसके स्वर्णे क्लीबे पितरि ना पुनः ॥ ६९९ ॥
स्नुह्योषधौ विद्युति च वज्रोऽस्त्री हीरके पवौ ।
स्नुह्यां एक्कासुणोरस्त्रं पुंसि केशे दरो भये ॥ ७०० ॥
गर्ते दरी गुहाल्पार्थे त्वव्ययं पर्वते धरः ।
धरा भूमावथ क्रूरो नृशंसे कठिने तथा ॥ ७०१ ॥
भयंकरे चाथ सत्त्रं यज्ञेऽरण्ये च साधने ।
सदादाने च दम्भे च धन्राच्छादनयोरपि ॥ ७०२ ॥
धारार्तिकोणेष्वश्रिः स्त्री कारा बन्धे च तद्गृहे ।
राजग्राह्ये पुमान्भागेथाङ्घ्रिः पादद्रुमूलयोः ॥ ७०३ ॥
करिणां बन्धनोर्व्यां स्त्री वारिस्तोये नपुंसकम् ।
सारं न्याय्ये वस्तुनि च पुमान्मज्ज्ञि स्थिरे बले ॥ ७०४ ॥
त्रिषूत्कृष्टे वस्तुनि तु दुर्वहेतिशयान्विते ।
वीवधे द्विसहस्रे च पलानां भार इक्षुभित् ॥ ७०५ ॥
चित्रकं देशभेदश्च पुण्ड्रः पत्त्रं तु वाहने ।
पर्णे पक्षे चाथ धात्री स्तनदा क्ष्मामलक्यपि ॥ ७०६ ॥
योग्यभाजनयोः पात्रं नदीकूलद्वयान्तरे ।
स्रुगादौ नाट्यविषये शास्त्रं ग्रन्थनिदेशयोः ॥ ७०७ ॥
कृच्छ्रं दुःखं तपोभेदः शस्त्रमायुधलोहयोः ।
हस्तिभेदे वृषे भद्रो भद्रं शर्म सति त्रिषु ॥ ७०८ ॥
शालायां स्त्री शारिरक्षे पक्षिपर्याणभेदयोः ।
पीलौ गिरियकक्रीडागुलके पर्वते गिरिः ॥ ७०९ ॥
ताम्रं शुल्बे त्रिषु गुणे तन्द्री निद्राप्रमीलयोः ।
व्यापृताकुलयोर्व्यग्रस्त्रिषु भाण्डं हविश्चरुः ॥ ७१० ॥
चक्राद्यश्री शीघ्रगे च त्रिषु क्लीबे त्वरं द्रुतौ ।
बलौ मेघोपले हस्तिहस्ते पाणौ करोंशुषु ॥ ७११ ॥

शिशिरोऽस्त्री ऋतौ शीते त्रिषु क्लीबे हिमे भवेत् ।
वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना ॥ ७४० ॥
इक्षोर्विकारः सूक्ष्माश्मा रोगभेदश्च शर्करा ।
विष्टरः कुशमुष्टौ च पीठपादपयोरपि ॥ ७४१ ॥
गायत्री खदिरे मन्त्रे छन्दोभेदे त्रिलिङ्गकः ।
उदारो दातृमहतोर्दक्षिणोद्भटयोस्त्रिषु ॥ ७४२ ॥
शाक्वरोऽनडुहि च्छन्दोभेदे त्रिष्वथ रोगभित् ।
प्रदरः शरभङ्गौ च केदारः क्षेत्रतीर्थयोः ॥ ७४३ ॥
ओष्ठोऽधरोऽनूर्ध्वहीने त्रिषु दम्भे मृगेश्वरे ।
मायायां शम्बरः पुंसि जले क्लीबेऽथ गह्वरे ॥ ७४४ ॥
सृमरस्त्रिषु पुंस्येणे कलत्रं श्रोणिभार्ययोः ।
तमस्तमिस्रं सतमा रात्रिः स्त्री गजसज्जनम् ॥ ७४५ ॥
शृङ्गारो रसराजश्च तूवरोऽश्मश्रुणि त्रिषु ।
अजातशृङ्गे छागे च सामुद्रं देहलक्षणे ॥ ७४६ ॥
लवणादौ समुद्रस्याथाकाराविङ्गिताकृती ।
प्रकारे मुखरागादावाह्वाने वर्णभिद्यपि ॥ ७४७ ॥
अम्बरे वसनाकाशौ सुगन्धिद्रव्यमाश्रयः ।
वाप्यालवाले चाधारो विस्तारौ तज्ज्ञविस्तृतौ ॥ ७४८ ॥
विटपेऽस्त्री भास्वरा स्यात्पाठा त्रिषु तु भासुरे ।
औशीरं चामरे दण्डे सहिते शयनासने ॥ ७४९ ॥
इन्द्रध्वजे विशीर्णे च सच्छिद्रे चापि जर्जरः ।
उर्वरा सर्वसस्याढ्या भूस्तथा भूमिमात्रकम् ॥ ७५० ॥
खपुरो लसकः पूगो विहारः सुगतालये ।
परिक्रमक्रीडनयोः संस्कारः शास्त्रजो गुणः ॥ ७५१ ॥
वासना प्रतियत्नश्चाथाकरो निकरे खनौ ।
आसारः स्यात्प्रसरणे वेगाद्वर्षे सुहृद्बले ॥ ७५२ ॥
निकारः परिभावे च धान्यस्योत्क्षेपणेऽपि च ।
प्रस्तरा मणिपाषाणशय्यास्त्रिषु मनोहरे ॥ ७५३ ॥

स्वादौ च मधुरो नीचपरयोरितरस्त्रिषु ।
व्यायामे प्रसरो वेगे प्रपञ्चे प्रणये तथा ॥ ७५४ ॥
गोपुरं द्वारि पूर्द्वारि तथा दाशपुरौषधौ ।
दुर्भिक्षादिकृते दुःखे कान्तारं दुर्गमे पथि ॥ ७५५ ॥
माणिक्यमुज्ज्वलं शृङ्गमूर्ध्वाग्रं शिखरत्रयम् ।
गुहादम्भनिकुञ्जेषु गह्वरं स्यात्तु चत्वरम् ॥ ७५६ ॥
चतुष्पथे प्राङ्गणे च नरेन्द्रौ नृपदैशिकौ ।
उदरे जठरं क्लीबे कठिने वाच्यलिङ्गकः ॥ ७५७ ॥
कन्दे राजकशेर्वाख्ये शुण्ठ्यामपि च नागरम् ।
पूर्भवे वाच्यलिङ्गं स्यात्कुहरं गह्वरे बिले ॥ ७५८ ॥
शार्वरं त्वन्धतमसे घातुकेभे त्रिलिङ्गकः ।
वर्णे मोक्षे परब्रह्मण्यक्षरं त्रिषु चाक्षये ॥ ७५९ ॥
आण्डीरो बालके पुंसि सुवर्णे तु नपुंसकम् ।
मन्दिरं नगरे गेहे पिठिरं चरुपस्तयोः ॥ ७६० ॥
किंशारू व्रीहिशूकेषू विकारौ वैरवैकृते ।
ऋषौ मन्त्रे कुशे देवे पवित्रं पाविते त्रिषु ॥ ७६१ ॥
सुवर्णे कर्बुरं पापे कल्माषे तु त्रिलिङ्गकः ।
बन्धुरं संनते रम्ये खर्जूरं फलरूप्ययोः ॥ ७६२ ॥
ना द्रुमेनाकुले तु स्यादेकाग्रं तत्परे त्रिषु ।
आहारः स्वीकृतौ भुक्तौ छन्दःकाञ्च्योस्तु शक्करी ॥ ७६३ ॥
तुषारस्तु कणे क्लीबे तुहिने शीतले त्रिषु ।
कठोरः कठिनेपक्के संहारो नाशसंचयोः ॥ ७६४ ॥
प्रत्याहारे संग्रहे च तथा नारकभूभिदि ।
कर्पूरे पुंसि नासीरो भवेदग्रसरे त्रिषु ॥ ७६५ ॥
कालसूत्रं कृष्णसूत्रे तथा नारकभूभिदि ।
विद्याधरी देवभेदे द्वयोर्विद्यावति त्रिषु ॥ ७६६ ॥
विद्याधरः शक्तिधरः स्कन्दः शक्तिमति त्रिषु ।
तुण्डिकेरी तु कर्पासी बिम्बी च पितृकाननम् ॥ ७६७ ॥

करवीरः पुष्पभिच्चोपचित्रा पृश्निपर्णिका ।
दन्ती दण्डधरो राजा यमो दण्डभृति त्रिषु ॥ ७६८ ॥
चतुरश्चतुःसक्तिस्त्रिषु कालोपयुक्तिवित् ।
द्यूतयुद्धादिविश्रान्तौ ग्राहाभिख्ये च यादसि ॥ ७६९ ॥
निमन्त्रणोपनेतव्येवहारोथ परिच्छदे ।
प्रगाढगात्रिकाबन्धे पर्यङ्कारम्भयोरपि ॥ ७७० ॥
समूहे स्यात्परिकरः स्यात्तु प्रतिसरोस्त्रियाम् ।
हस्तसूत्रे चमूपश्चाद्भागे यागादिके पुमान् ॥ ७७१ ॥
आरक्षे मण्डने च स्यान्नियोज्ये वाच्यलिङ्गकः ।
उपकारस्तूपकृतौ कुसुमप्रकरेपि च ॥ ७७२ ॥
दुरोदरो द्यूतकरे पणे द्यूते नपुंसकम् ।
उदुम्बरो वृक्षभेदे देहल्यां चाप्यरुष्करः ॥ ७७३ ॥
व्रणकृद्वृक्षभेदश्च क्लीबे तु स्यात्सरोरुहे ।
शतपत्रं पुमान्दार्वाघाटे स्यादथ सागरे ॥ ७७४ ॥
अकूवारः कूवरे स्त्री भुवि विश्वंभरोच्युते ।
आडम्बरोस्त्री संरम्भे रवे च गजतूर्ययोः ॥ ७७५ ॥
अभिहारोभियोगे च चौर्ये संनहनेपि च ।
शिशुमारो जलोद्भूतजन्तौ तारागमाच्युते ॥ ७७६ ॥
परिवारः परिजने खड्गकोशेप्युपह्वरः ।
विविक्ते च समीपे च महामात्रो महर्द्धिके ॥ ७७७ ॥
हस्त्यारोहाधिपे चाभिसरः स्वबलसाध्वसे ।
युद्धे च व्यभिचारः स्याद्धिंसायामप्यसंभवे ॥ ७७८ ॥
संकरे व्यसने वृत्तान्तेपि व्यतिकरः कृतौ ।
तीर्थेवतारो देवादेरंशे स्यादवरोहणे ॥ ७७९ ॥
वर्धापके पूर्णपात्रं पात्रे पूर्णे जलादिना ।
प्रतीहारो द्वारि तत्स्थे द्वयोर्गुह्येप्यवस्करः ॥ ७८० ॥
वर्चस्के चापचारस्तु दुष्कृतभ्रंशयोरपि ।
आचारे परिचर्यायां प्राभृतारोपयोरपि ॥ ७८१ ॥

उपचारः सहचरी भार्यापत्योः परस्परम् ।
लताभेदे द्वयोर्मित्रे सार्धसंचारिणि त्रिषु ॥ ७८२ ॥
अर्धचन्द्रा तु पालिन्दी गलहस्ते पुमाञ् शरे ।
नखक्षतविशेषे च हंसभित्कौरवस्तथा ॥ ७८३ ॥
धार्तराष्ट्रः कृष्णशारः शबले त्रिषु ना मृगे ।
पारिभद्रः पारिजाते बदर्यां सुरदारुणि ॥ ७८४ ॥
ब्रह्मपुत्रो द्विजसुतो विषभिन्नारदादयः ।
सुकुमारस्त्रिषु मृदौ घृतभेदे नपुंसकम् ॥ ७८५ ॥
उपस्करो वेशवारो गृहभाण्डाद्यथाम्बुदे ।
पयोधरः स्तनेपि स्यादुपस्कारो गुणाहितौ ॥ ७८६ ॥
अध्याहारे वैकृते च दीर्घसूत्रश्चिरक्रियः ।
तन्तौ च विस्तृते क्लीबे दीर्घनिद्रा मृतिस्तथा ॥ ७८७ ॥
अतिस्वापरतिश्चाथ काव्यमण्डलवेश्मभित् ।
निम्बश्च सर्वतोभद्रो व्यूहः कल्याणवांस्त्रिषु ॥ ७८८ ॥
चूडा किरीटं केशाश्च संहता मौलयस्त्रयः ।
मातृभेदे क्षारकीटे काली दुर्गानवाब्दयोः ॥ ७८९ ॥
पालिन्दी पाटला कृष्णाजाजी कालापि नीलिनी ।
तिन्दुकेन्द्रौ यमे मृत्यौ समये नासिते त्रिषु ॥ ७९० ॥
मूलान्याद्यशिफाभान्ताः कलहेन्त्ययुगे कलिः ।
करोपहारदैत्येषु बलिर्ना गात्रजे स्त्रियाम् ॥ ७९१ ॥
स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः ।
दैत्यभेदे च बलिनि त्रिष्वोषधिभिदि स्त्रियाम् ॥ ७९२ ॥
भेद्यलिङ्गः शठे व्यालो द्वयोः शार्दूलसर्पयोः ।
कुटीग्रामकयोः पल्लिः त्र्यस्त्री शूलं रुगायुधम् ॥ ७९३ ॥
तच्छिखा बंधकं काष्ठं शूला वारविलासिनी ।
ज्वालाशङ्कू द्वयोः कीलौ कूर्परः प्रहतं रते ॥ ७९४ ॥
कर्णाधो भाजने प्रान्ते पालिः स्त्र्यश्र्यङ्कपङ्क्तिषु ।
कलनाकालशिल्पेषु वृद्धौ मूलधनस्य च ॥ ७९५ ॥

इन्द्वंशेशे तालगुरौ निवृत्त्यादौ छले कला ।
शक्तावव्यक्तमधुरे ध्वाने त्रिषु मनोहरे ॥ ७९६ ॥
आल्यनर्थे सखीपङ्क्त्योः सेतौ ना वृश्चिके फलम् ।
सस्यादौ फलके लाभ आयुधाग्रे कणेकृते ॥ ७९७ ॥
अब्ध्यम्बुविकृतौ वेला मर्यादा गिरिकालयोः ।
फालो हलाग्रोत्प्लवयोर्लोलश्चलसतृष्णयोः ॥ ७९८ ॥
लीला विलासेनुकृतौ दलं दण्डार्धयोश्छदे ।
स्रुगन्धपत्त्रोपादानहेत्वो रन्ध्रगुहे बिलम् ॥ ७९९ ॥
पण्यौषधिभिदो रागद्रव्ये नील्यथ झिल्लिका ।
नीला त्रिषु प्राणिगुणे कपिरत्नभिदोस्तु ना ॥ ८०० ॥
मलोस्त्री पापविट्किट्टे कृपणे मलिने त्रिषु ।
आणवादावशुद्धौ च कालिम्नि स्याद्रसादिषु ॥ ८०१ ॥
गवाक्षे कोरके वृन्दे दम्भे मत्स्यादिबन्धने ।
धूर्तकृत्ये च जालं स्याच्छीलं वृत्तस्वभावयोः ॥ ८०२ ॥
तलं गोधास्वरूपाधःपृष्ठेष्वस्त्री पुमान्द्रुभित् ।
चपेटे च वितस्तौ च व्याजस्खलितयोश्छलम् ॥ ८०३ ॥
चेलं वस्त्रे त्रिष्वधमे पलमुन्मानमांसयोः ।
त्रिषु स्थूलं जडे पीने हेलावज्ञाविलासयोः ॥ ८०४ ॥
गीतकालक्रियामाने मध्याङ्गुष्ठमिते तरौ ।
तालः करतले चाथ तुला सादृश्यमानयोः ॥ ८०५ ॥
गृहाणां दारुबन्धार्थपीठिका सदृशं तथा ।
जलोदञ्चनभाण्डे च राशिभेदे घटे द्वयोः ॥ ८०६ ॥
जलं तोयं त्रिषु जडे त्रिषु बालोर्भकाज्ञयोः ।
क्लीबे ह्रीवेरके नाङ्कुरुहे गोत्रे गृहे तथा ॥ ८०७ ॥
कुलं सजातीयगणे संघे शास्त्रशरीरयोः ।
क्लिन्नाक्षे त्रिषु चुल्लोक्ष्णि क्लीबे चुल्ली तु पाकभूः ॥ ८०८ ॥
खलं भूस्थानकर्णेषु क्रूरपामरयोस्त्रिषु ।
सैन्यस्य पश्चिमे भागे कूलमन्तिकतीरयोः ॥ ८०९

शिला द्वाराधरे दारु दृशाच करका तथा ।
प्राकारवृक्षयोः सालः सर्जे चाथ प्लवे किरे ॥ ८१० ॥
कोलः क्लीवे बदर्यां स्यात्कणा कोलाथ भूरिला ।
वास्त्वःस्त्री गौर्द्रुशाखायां गेहे गेहैकदेशयोः ॥ ८११ ॥
शाला स्याद्दर्दुरे भेलो भीरुके वाच्यलिङ्गकः ।
तूलिश्चित्रोपकरणे शलाकातूलशय्ययोः ॥ ८१२ ॥
खेला क्रीडा विलासाक्षे त्रिषु दोला तु दोलिनी ।
प्रेङ्खा स्थाली पाकभाण्डं पाटलास्त्री तु भाजने ॥ ८१३ ॥
शिली गण्डूपदी भेका शिलोञ्छेषु शिलश्च ना ।
प्राण्यङ्गे तृणकाण्डे च ना नाली धमनौ स्त्रियाम् ॥ ८१४ ॥
न ना नालाब्जादिकाण्डे त्रिषु स्याज्जलनिर्गमे ।
कमला श्रीर्मृगे पुंसि क्लीवे स्यात्पद्मतोययोः ॥ ८१५ ॥
सास्नायां नागभेदे चाप्यूर्णावाससि कम्बलः ।
वातूलः पुंसि वात्यायां वाते वातासहे त्रिषु ॥ ८१६ ॥
वातलो वातुलश्चैवमाभीलं भीमकृच्छ्रयोः ।
बहुलाः कृत्तिका गाव एलाः पुंस्यग्निपक्षयोः ॥ ८१७ ॥
प्रभूते च प्रायिके च शितौ च स्यात्त्रिलिङ्गकः ।
उपलेक्षुविकारे स्याच्छर्करायां च नाश्मनि ॥ ८१८॥
रत्ने चाथामृते तोये कीलालं मण्डरक्तयोः ।
छर्दिर्नेत्ररुजोः क्लीवे समूहे पटलं न ना ॥ ८१९ ॥
पुष्पादिभाण्डे नाध्याये प्रियङ्गुर्महिला वधूः ।
पातालमौर्वाग्निरसातलयोः शङ्कुभिश्चिते ॥ ८२० ॥
श्वभ्रे कुकूलं पुंसि स्यात्तुषाग्नावथ केवलम् ।
निर्णीते त्रिषु कृत्स्ने स्यादसहायेथ शिक्षिते ॥ ८२१ ॥
कुशलस्त्रिषु पर्याप्ते क्लीवे स्यात्क्षेमपुण्ययोः ।
वीणादण्डे प्रवालोस्त्री विद्रुमे नवपल्लवे ॥ ८२२ ॥
देवीभेदे करालोच्चे त्रिषु स्याद्व्याप्रभीमयोः ।
खण्डेस्त्री शकलं वल्के रागभेदेस्थिभिद्यपि ॥ ८२३ ॥

मृदौ स्निग्धे त्रिषु भवेद्दक्षे चारौ च पेशलः ।
मण्डली स्यान्न ना संघे देशबिम्बे च मण्डलः ॥ ८२४ ॥
त्रिषु वृत्ते स्थानके तु परिधौ तु नपुंसकम् ।
कर्माङ्गेप्युपलेपादौ कुष्ठं नीलाब्जमुत्पलम् ॥ ८२५ ॥
ऊषणा पिप्पली ना तु तरुवस्त्रच्छिदाभिदोः ।
क्लीबे जले स्यात्कुद्दालः खनित्रे कोविदारके ॥ ८२६ ॥
संकुलं व्याकुले व्याप्तेविस्पष्टार्थवचस्यपि ।
यवाग्वां तरला रत्ने पुंसि दीप्ते चले त्रिषु ॥ ८२७ ॥
पललं तिलकल्के स्यान्मांसे च जगलस्त्रिषु ।
मेचके पिष्टमद्ये ना मेखला खड्गबन्धने ॥ ८२८ ॥
काञ्च्यद्रिदेशमौञ्जीषु कपालं कर्परे त्रिषु ।
उत्तमाङ्गास्थ्नि भक्ष्ये तु शष्कुली कर्णपुत्रिका ॥ ८२९ ॥
तुमुलं व्याकुले शब्दे त्रिषु स्यात्संकुले रणे ।
पाटला त्रिषु वर्णे स्याद्व्रीहौ ना कुसुमे न ना ॥ ८३० ॥
जाङ्गलो निर्जले देशे पिशिते स्यान्नपुंसकम् ।
दुगूलं तनुवासः स्यात्क्षौमं च चपला तडित् ॥ ८३१ ॥
कुलटे स्याद्द्वयोर्ना तु पारते चञ्चले त्रिषु ।
तण्डुलो धान्यसारे स्याद्विडङ्गे कदली स्त्रियाम् ॥ ८३२ ॥
मृगभेदे ध्वजे रम्भास्तम्भे स्यादथ मञ्जुलः ।
मधुरे मेद्यलिङ्गो ना जलरङ्कुपतत्रिणि ॥ ८३३ ॥
काकोलो द्रोणकाके स्याद्विषे चाप्योषधौ स्त्रियाम् ।
धवलं सुन्दरे शुक्ले त्रिषु यूनि गवि द्वयोः ॥ ८३४ ॥
अचलोद्रौ स्त्रियां भूमौ देहोन्मानौ तु बाहुलौ ।
कार्त्तिकः कोमला वृत्तिः स्निग्धे तुल्ये त्रिषु त्रिषु ॥ ८३५ ॥
शृङ्खला पुंस्कटीकाञ्च्यां बन्धने चायसादिके ।
रसाला मधुरा भाषा भोज्यं ना त्विक्षुचूतयोः ॥ ८३६ ॥
निचुलो वेतसे चापादिकोशे — — —गला ।
न पुमान्यन्त्रणायां च कपिलागुरुशिंशपा ॥ ८३७ ॥

नमः पूजाप्रह्वतयोस्तत्त्वं मुख्यत्वमञ्जसा ।
कष्टे क्षतौ हशब्दः स्यादा - - र्थस्य सूचने ॥ १००५ ॥
दुःखे शोके विषादे [ हा ] - - - - - - - - - ।
हिशब्दः स्याद्विशेषा - - - - चावधारणे ॥ १००६ ॥
अह क्षेपे विनियोगेहह खेदेद्भुत - - ॥
अभ्यादानेभ्युपगमे तूष्णींभावे समर्चने ।
दानप्रतिग्रहादौ स्यादोंकारोपि च मङ्गले ॥ १००७ ॥

॥ इति मङ्खकोशः समाप्तः ॥

10



# EXTRACTS FROM THE COMMENTARY.



[ क ] चतुर्ष्वाद्येष्वर्थेषु कशब्दः पुंलिङ्गः। उत्तरेषु त्रिषु तु नपुंसकम्। कंपः को वा गुरुस्ते Dhv. 104, 10 इत्यादौ जले। कंपो वरुणः। कं कणविशेष इत्यादौ सुखे। कं सुखाय कं सुखं वा यथाद्यात् [ ? ]। तथा कणति शब्दायते। कमिति प्रकृत्य मस्तके च सुखेपि चेति अव्ययप्रकरणे मेदिनिः। कंशब्द अंकारान्तो [ ? ] वक्ष्यते। अयं च कशब्दः किंशब्दप्रकृतिश्च प्रातिपदिकं च भाष्यकारेण कस्येदित्यत्र स्थापितत्वात् c. Bh. Pâ. 4, 2, 25। ततश्च। कस्मै च काय चेत्यादि लक्ष्यसिद्धिः॥ एकाक्षरः॥ [ नाक ] नाकतटिनीत्यादावाकाशे। नाकौकसामित्यादौ त्रिदिवे॥ [ लोक ] आ० Su. 2594 इत्यादौ भुवने। मां° Ra. 14, 61 इत्यादौ जने॥ 10॥

[ श्लोक ] पद्ये। Ra. 14, 70॥ [ टङ्क ] दर्पे। दृष्टः स पैरैस्तरुगः सटङ्कः॥ [ अङ्क ] किं तस्य संख्येव नवा नवाङ्का इत्यादावेकादिगणनायाम्। उत्सङ्गे। Ra. 3, 26। चिह्ने। शशाङ्केनेव शर्वरी॥ 11॥

[ अर्क ] सूर्ये स्फटिके च। H. V. 1, 4॥ [ शल्क ] वार्क्षत्वचि। भूर्जशल्कं वसानाः॥ [ किष्कु ] ग्रामात्किष्कुशतं व्रजेदित्यादौ चतुर्विंशत्यङ्गुले हस्तप्रमाणे। किष्कुसंमिताः समिधः। द्वादशाङ्गुला वितस्तिप्रमाणाः॥ 12॥

[ निष्क ] सह अष्टभिर्वर्तते साष्टम्। बहु° Pâ. 5, 4, 73 इति डच्। सुवर्णं षोडश माषकाः। पलं सुवर्णकाश्चत्वारः। दीनैरर्यते दीनारो रूपकम्। निःशेषेण कस्यते निष्कः॥ 13॥

[ कल्क ] समले पापाशये। एनसि पापमात्रे॥ [ स्तोक ] दमे दमयुक्ते विनीते यथा। स्तोको गुर्वन्तिके भूयात्। पुत्रे। धन्यस्य गृहिणः स्तोको गृहे खेलति खेलनैः॥ [ पाक ] शावके। काकपाकैरटद्भिः॥ 14॥

[ लङ्का ] रावणनगर्याम् । Śi. 1, 68 । वृक्षशाखायाम् । द्रुमलङ्कां समाश्रित्य वानरः कुत्र संस्थितः ॥ 15 ॥

[ एक ] तथा च कात्यः । प्रधानान्यसहायेषु संख्यायां चैक इष्यते ॥ [पङ्क] द्वयेपि । पङ्कः पङ्कं व्यपोहति ॥ 16 ॥

[ भेक ] मण्डूके । Su. 843 । उभयत्रापि । भेकाः पान्थजना घनस्तनितत्र-द्भेकारवेत्राप्यलम् ॥ [ छेक ] छेकानुप्रास इत्यादौ सहृदयश्छेकाः [ sic ] ॥ 17 ॥

[ शङ्कु ] आयुधभेदे । शङ्कुः प्रहरणान्तरम् c. Śâśv. 385 । स्थाणौ । मु-ष्णन्ति शङ्कुः [ sic ] परितो निधाय । कीलके । Ra. 8, 92 । संख्याभेदे । शङ्कु° c. Mh. 2, 17 । मानभेदे । आयामत्रिभेद [ sic ] संख्यालक्षणया ॥ [ त्रिक ] कूपयन्त्रे । त्रिकक्रेंकारसूचिताः ॥ त्रिकानामित्यादौ हर्षचरिते गात्राङ्गवर्णने गात्राङ्गे । तत्र ि त्रिकदर्शनमित्यादौ त्रये ॥ 18 ॥

त्रयाणां संघः । त्रिकः । संख्याया॰ Pâ. 5, 1, 22 । त्रिलिङ्गः । त्रिकामन्त्र इत्यादावादिग्रहणात् ॥ [ राका ] नवरजसि कन्यायाम् । राका नान्यमुखं पश्येद्विना भर्तुः ॥ 19 ॥

[ शूक ] कण्टके । शूकैरिवाचितः कण्ठः । अनुक्रोशे । निःशूक किं भाषसे । शुङ्गे तुङ्गाङ्कुरे । नवचारुशूकविशदैः ॥ [ शलाका ] रत्नस्वरूपभिदि । Ku. 1, 24 । शस्त्रभाण्डे । Su. 3401 । अञ्जनतूलिकायाम् । Ku. 1, 47 ॥ 20 ॥

परीक्षायाम् । शलाकया कोपि भिनत्ति मन्त्रम् ॥ [ दैशिक ] सद्देशिकमुखाम्ना-यपारंपर्यक्रमागता इत्यादौ गुरौ ॥ देश्ये । अपूर्वो दैशिक इवासीत् ॥ [ तूलिका ] चित्रकृद्भाण्डे । Ku. 1, 32 । शलाकायाम् । गृहीत्वाञ्जनतूलिकाम् ॥ 21 ॥

[ वर्णक ] विलेपने चन्दने च क्लीबे । वर्णकं मेकं [ sic ] संसदि सोपठदित्या-दौ परीक्षोद्धृतवस्तुनि ना पुंलिङ्गः । वर्णकावृततत्त्वः स हि मत्तौ [ ? ] इत्यादौ तान्तवे विकारे वस्त्रविशेषे । वर्णका तान्तवे Pâ. 7, 3, 45, 7 इति हि वार्त्तिकमि-ति द्वयोः । शोधनाय निष्क्रम्य वर्णिका आदाय पुनः प्रविशतीत्यादौ रागे [ sic ] गैरिकादिषु स्त्रीपुंसयोः । ततः॰ M. M. 17, 1 इत्यादौ भूमिकायां स्वरूप-विपर्यासेन रागोपत्तरणात् ॥ 22 ॥

पर्यायादिषु । वर्णिकाभिः किमाभिः । किमेतैर्बहुभिर्वर्णनैरित्यर्थः । आदि-शब्दादर्हणीवृत्तिषु [ sic ] । वर्णयितरि । अहं तव वर्णको भवामि ॥ [ गणिका ] इभ्याम् । प्राप्तेषु परिजनेषु गणिकामारुह्य ययौ ॥ [गणक] दैवज्ञे । K. V. 9,6 ॥ 23 ॥

[ कलङ्क ] अपवादे । न जाने कोऽमुष्मिन्रघुकुलकलङ्के कविरभूत् ॥ 24 ॥

[ पृथुक ] भक्ष्ये खाद्यविशेषे चिवरी इति भाषया प्रसिद्धे खलभृष्टे ॥ [ आलोक ] दर्शने । Me. 82 ॥ 25 ॥

[ नालीक ] अब्जे । विवृत्तेनापि० Mh. 3, 52 ॥ [ पुलाक ] तुच्छ० । Sp. 4150 संक्षेपे । पुलाककारी विपुलाशयः स्यात् । भक्त० । स्थालीपुलाकन्यायेन ॥ 26 ॥

[ करक ] कमण्डलौ नालिकेरास्थिभवे । करककरः जगाम मस्करी ॥ करककुसुमताम्र इत्यादौ दाडिमे । करिका मद्यभाण्डं प्रसिद्धम् ॥ 27 ॥

[ करङ्क ] करङ्कशेषात् रित्यादौ मांसरहिते ॥ ताम्बूलादिभाजने । आजुहाव च करङ्कवाहिनीम् ॥ 28 ॥

[ वृश्चिक ] राशिभेदे प्रसिद्ध एव । मदनिकायाम् । एता० Mh. 3, 91 । शूकप्रधानः कीटः कण्टकी क्रिमिः । गोमयाद्वृश्चिको जायते इत्यादौ ॥ [प्रतीक] मरुत्प्रतीकवाहीत्यादौ प्रतिकूले ॥ अंशे । नाममालाप्रतीकमपश्यम् c. V. K. I, 3, 6, C. । दीपे । प्राज्यप्रतीकजालाभिः शार्वरे शकलीकृते ॥ अङ्गं प्रतीकोऽवयव इत्यादावंशाभिप्रायेणैव c. AK. 148, 70 ॥ 29 ॥

[ दीपक ] दीपे । Su. 2490 ॥ 30 ॥

[ कौशिक ] गाधिजे । Ra. 11, 1 । उलूके । M. M. 176, 7 । गुग्गुलौ । अगुरु० Mh. 3, 29 । इन्द्रे । Śi. 1, 53 । आहितुण्डिके गारुडिके । उरग इव च कौशिकात्त्स बिभ्यत् ॥ [क्षुल्लक ] के अन्ये [ sic ] राजानः क्षुल्लका इत्यादौ कनिष्ठादिषु यथायोगं योज्यम् ॥ 31 ॥

[ पिण्याक ] सिल्हके । पिण्याकगन्ध इव तुष्टिकृदत्र सोऽभूत् ॥ [ वर्तिका ] वर्तका शकुनौ प्राचामित्यत्र वार्त्तिकविकल्पेनेत्त्वस्मरणाद्वर्तकापि c. Pâ. 7,

3, 45, 8 ॥ [ वर्तक ] वर्तकक्षुण्णपाद इत्यादावश्वखुरे ॥ [ सायक ] शरे । Ra. 2, 31 । खड्गे । आकृष्य सायकमुपाद्रवदेकवीरः ॥ 32 ॥

[ व्यलीक ] कामजे दोषे । मेहे [ sic ] न गोत्रस्खलितव्यलीकम् ॥ न किंचिदूचे किल स व्यलीक इत्यादौ विलक्षे । विलक्षः सलज्जः । अप्रिये । मया॰ Mh. 3, 86 । विपर्यये । पृष्टो॰ Mh. 3, 86 । रोगे । चिरं व्यलीकेन जगाम शान्तिम् । अकार्ये । सुजनो॰ Mh. 3, 86 ॥ 33 ॥

[ गैरिक ] स्वर्णे । जगाल गैरिकं पाकात् ॥ [अलीक] त्रयेपि । Sp. 2606 ॥

[ अनूक ] द्वयोरपि । वरस्यानूकवृत्तानि प्रेक्ष्य कन्या प्रदीयते ॥ 34 ॥

[ धेनुका ] क्षुरिकायाम् । बन्धालिधेनुकैः ॥ भक्तजनकामधेनुधेनुक इत्यादावुमायाम् । करेण्वाम् । आरुह्य वरधेनुकाम् ॥ [ कालिका ] देव्याम् । विज्ञेयः कालिकामते [ sic ] । नियतकाले निर्वाह्यो लाभः कालिकाख्या वृद्धिः । तथा च कारि[ता] कालिका चेत्यादि नारदादौ । स्वर्णमले । विना निकषणं हेम्नः कालिका केन लक्ष्यते । मेघ॰ । Ra. 11, 15 ॥ 35 ॥

[ कारिका ] यातनायाम् । सद्या॰ Mh. 3, 18 । वृत्तौ । भंधोक्तकारिकेयम् [ sic ] । क्रियायाम् । कां कारिकामकार्षीः ॥ [ कारक ] भृत्ये । कारकेषु ततः शौचम् । कारके [ sic ] । स कर्ता नाम कारकम् c. Kât. p. 497 ॥ [ कर्णिका ] कर्ण॰ Pâ. 4, 3, 65 इति कर्णभूषणे तालपत्रादौ । कर्णिकाकिरणबन्धुरितस्येत्यादौ ॥ 36 ॥

करिहस्ताङ्गुलौ पद्मबीजकोश्यां च । स्थिता श्रीः पद्मे च भ्राम्यन्मधुपकर्णिके । स्त्रिया नार्या गदे कर्णिका भगव्याधिरित्यायुर्वेदप्रसिद्धो गदः ॥ [ वाह्लीक ] कुङ्कुमे । वाह्लीक॰ Mh. 3, 87 । हिङ्गौ । वाह्लीकार्द्रकसैन्धवैः सुरभिणी ॥ 37 ॥

[ कौतुक ] मङ्गलद्रव्ये । Ra. 8, 1 । कुतुके । कौतुकाक्षिप्तचित्तः ॥ [ वालिका ] सिन्धुर्वीचिकरानुवाह बहलप्रौढोन्मिषद्वालिकानित्यादौ श्लेषेण वालुकोर्मिकयोः ॥ 38 ॥

कङ्कणे । वालिकालंकृतप्रकोष्ठः ॥ [ वालक ] अङ्गुलीयकेवैरयोः प्रसिद्धः ॥ [ प्रियक ] मृगभिदि । Śi. 4, 32 ॥ 39 ॥

[ उदर्क ] उत्तरकाले । सुखोदर्का वनभुवः । उत्तरकालिके फले । कुशलोदर्कं तर्कयामि ॥ [ मेचक ] शिखि° । मेचकिकुलकोलाहला । मेचकिनः शिखिनः ॥ 40 ॥

[ गोलक ] गुले । गुग्गुलुगोलकहिङ्गुवचाभिः । गुलं मस्तिष्कम् ॥ पिण्डे । भूगोलः ॥ [ तिलक ] त्रिश्लोक्याम् । युगलकतिलकचक्कलकानि ॥ 41 ॥

विशेषके वृक्षभिदि च । Ra. 9, 41 ॥ [ आतङ्क ] निरातङ्कः पङ्क इत्यादौ तापे । आतङ्कः कुसुमायुध इत्यादौ द्वयोरपि । निरातङ्कः प° M. M. 195, 1 इत्यादौ भीरेव ॥ 42 ॥

[ रेणुका ] भार्गवाम्बायाम् । Bâ. II, 37 ॥ [ पुण्ड्रक ] इक्षौ । स्फुरति च रुचिमत्ता पर्वणां पुण्ड्रके स्यात् ॥ [ पुलक ] प्रस्तरे श्लक्ष्णेश्मविशेषे । पुलकमृष्टधौताम्बराः । क्रिमिभेदे । वर्त्मनां° Mh. 3, 61 ॥ 44 ॥

[ कण्टक ] क्षुद्र° । निष्कण्टकं राज्यमथो चकार । रोमाञ्चे । Ku. 6, 15 । तरोरङ्गे । A. S. 60, 4 । अत्र कण्टकं तीक्ष्णलतापत्रं ॥ 45 ॥

[ सरक ] इक्षुशीधौ । वरतनुवक्त्रसङ्गसुगन्धितरं सरकम् । शीधुपाने । सरककेलिमत्ताः स्त्रियः ॥ [ तारक ] दैत्यभेदे । Ku. 2, 1 ॥ 46 ॥

[ तारिका ] देवीभेदे । तारिका भवसमुद्रतारिका ॥ [ क्षारक ] पिटकं भाण्डविशेषः । क्षारकाङ्कितकूर्परा इत्यादौ । कोरके । क्षारकैः कुसुमचापसायकैः । कोरकं मुकुलिका ॥ [ जीवक ] विषयविषहतानां जीवकस्त्वं पुराण इत्यादौ प्राणके ॥ 47 ॥

जीवकदर्शने सर्वचैतन्यवाद इत्यादौ क्षपणे ॥ [ जीविका ] द्वयोः । कां जीविकां बिभर्षि ॥ [ पर्यङ्क ] उभयत्रापि । यदैव पर्यङ्कतले विमुक्ते त्वमिष्टया भावनयापगूढः ॥ 48 ॥

[ बन्धकी ] इभ्याम् । बन्धकीनिकटमगमन्नृपतिः ॥ [ बन्धक ] आधौ । न वृद्धिर्बन्धके नष्टे सर्वनाशे न रुद्धम् । विनिमयस्थाप्यं वस्तुरूपमाधिः । बन्धकारिणि । संसारबन्धिका माया ॥ 49 ॥

[ वार्धक ] वृद्धसंघाते । वार्द्धकमतानुसारी न व्यापदमेति हन्त तरुणोपि। वृद्धत्वे । Ra. 1, 8 । वृद्धकर्मणि । तरुणोपि शास्त्रदृष्ट्या वार्द्धक एव प्रवर्तते प्राज्ञः ॥ [ दर्शक ] प्रतीहारे । दर्शक° Mh. 3, 47 ॥ **50** ॥

[ स्थासक ] चर्चायामुपलेपने । चन्दनस्थासकाङ्कः । हारभेदे । कुचयोः स्थासकमौक्तिकार्चिराभात् । बुद्बुदे । स्थासकावलिनिभेन हसन्ती नर्मदा ॥ [ अंशुक ] मलयज° K. Pr. 345, 5 । तथा । शुचिनी चीनांशुके बिभ्रतीत्यादौ शुक्लवस्त्रे c. V. Ś. III, 16 । शुक्लांशुकोपरचितं घनसारेत्यादौ वस्त्रमात्रे । उत्तरीये । Ku. 1, 14 ॥ **51** ॥

[ मधुक ] मधुका वन्दिनः केपि c. Śâśv. 453 इति शाश्वतोक्त्या वन्दिभिदि पुंलिङ्गः ॥ **52** ॥

[ खनकी ] शिल्पिनि ष्वुनि c. Pâ. 3, 1, 145 । खनकी ॥ [ खनिका ] जलाधारे । वनिका खनिका रथ्या प्रपा सत्त्वावरोहणम् । खनिराकरः खनिरेव खनिका ॥ **53** ॥

[ कार्मुक ] चापे । क्रेंकारः स्मरकार्मुकस्य किमपि c. K. Pr. 160, 4. A. S. 37, 7 । कार्मुकः कस्य न प्रिय इत्यादौ कर्मण्ये शक्तमात्रे च ॥ [ कञ्चुक ] निर्मोकवारवाणयोः । Su. 1219 । कवचे । संनद्धकञ्चुकोचण्डवक्षसस्ते धनुर्धराः ॥ **54** ॥

[ अलका ] धनदपुरि । Ku. 6, 37 ॥ [ अलक ] स्त्रीकचे । Me. 88 ॥ [ अनीक ] रणे । सहस्र° V. K. 2, 1, 14, C. । सैन्ये । Ra. 18, 9 ॥ [ वञ्चक ] उभयत्रापि । वञ्चकैरावृता—स्ते दुर्गमा वत भूभृतः c. Mh. 3, 84 ॥ [ अन्तिका] चुल्याम् । न दुष्येदन्तिकास्थितम् ॥ **55** ॥

[ विपाक ] पचने । विपाके कटु शीतं च । स्वेदे । आमज्वरे विपाकं प्रयुञ्जीत ॥ स्नेहस्य तस्याद्य विपाक एष इत्यादौ परिणाम उपचारात् ॥ [ कृषक ] फाले । लाङ्गलं कृषकाङ्कितम् ॥ [ कनक ] मातुलं धतूरबीजम् । स्वर्णे । Me. 74 ॥ [ राजिका ] रेखायाम् । अराजिके भूर्जपत्त्रे । आसुर्याम् । राजिकाः सर्षपास्तथा । आसुरी शाकविशेषबीजम् ॥ **56** ॥

[ लुब्धक ] शाकुनिके । किमिव° Bh. Ś. 73 ॥ [ नायक ] नेतरि मध्यमणौ च । H. Ch. 9, 10 । नाट्योत्तमपात्रयोः प्रसिद्धः ॥ 57 ॥

[ खेटक ] गिरिखेटकेत्यादौ ग्रामे । कांस्यधातुकृतखेटकं कटकमित्यादौ फलके । फलकं चर्म ॥ [ पेटक ] भाण्डे । कनकपेटकं तस्करः ॥ [ जालिक ] जालेन चरति जालिकः । ऐन्द्रजालिकः । जालं व्याजः । जालिकाकृष्टनक्र इत्यादौ धीवरे ॥ 58 ॥

[किञ्जल्क ] पुष्परेणौ । किञ्जल्कपुञ्जैः परिपिञ्जरासु स्थलीषु c. Vik. Ch. 10, 11 ॥ [ उष्ट्रिका ] भाण्डभेदे । नहि भवति पञ्चानामुष्ट्रिकानां पूरणो घटः ॥ 59 ॥

[ विटङ्क ] वितर्दिकायाम् । निर्विघ्नमङ्घ्रिप्रहता विटङ्काः । वलभ्याम् । यस्यां शशी निशि स्फुटङ्कविटङ्कलग्नः । उन्नते देशे । Kâd. I, v. 4 ॥ [ पिनाक ] शूले । Ku. 5, 53 । धनुषि । Ku. 3, 10 ॥ 60 ॥

[ जालक ] जालाभे । Ra. 9, 68 । आनने विलग्नं जालकं जालाकृतिर्यस्य तं स्वेदं वनानिल आचचामेति ह्यत्रार्थः ॥ क्षारके । Me. 95 । अलिजालक इत्यादौ संघे । मर्कटे । जालक इव निवेशितसूत्रः ॥ [ जालिका ] मुखावृतौ । तां जालिकापहरणे मरु— न्यमीलत् ॥ [ सेवक ] सेवाजीवे । वद कोन्यः सेवकादधमः c. Sp. 4217 । प्रसेवे । वीणापि सेवकवियोगवशान्न सीदेत् । प्रसेवकः ककुभाख्यं वीणापुटम् ॥ [ सूतक । सूतिका ] ग्रहे । धूपः सूतकनाशनः ॥ 61 ॥

सूतार्थे सूतिकायां सूतिका सूतका च । वा सू° Pâ. 7, 3, 45, 10 इति विकल्पेनेत्त्वविधानात् । अथ गावो महिष्यश्च ब्राह्मणी चैव सूतिका इत्यादि लक्ष्यम् । जनने । तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकम् । रसे पारते । सूतकं गन्धमृत्तिकारसेन संमृद्य ॥ [ पुत्रक । पुत्रिका ] दीक्ष्यभेदे । समयी साधकश्चैव आचार्यश्चापि पुत्रकः । दीक्ष्यो दीक्षणीयः शिष्यः ॥ 62 ॥

सा° Ku. 1, 29 इत्यादौ कृत्रिमादौ द्वयोः स्त्रीपुंसयोः स्त्रियां तु द्वैरूप्यं पुत्रका पुत्रिका च । वा सूतकेति Pâ. 7, 3, 45, 10 विकल्पेनेत्त्वविधानात् । बालिका° Mh. 3, 68 इत्यादौ लक्ष्यम् । अभ्रातृपितृकपूर्णदायायां कन्यायाम् । M. 3, 11 ॥ 63 ॥

[ कुम्भिका ] जलधान्याम् । प्रपां शीतलकुम्भिकाम् । वलनं क्रोडीकरणम् । नरकास्पदे । पच्यन्ते कुम्भिकासु ते ॥ [ कुम्भक ] प्राणरोधे । ये० Pr. P. 2। तथा । रेचकः पूरकश्चैव तृतीयः कुम्भकस्तथा ॥ [ कुलक ] श्लोक० । Kd. 1, 13 ॥ 64 ॥

श्रेष्ठिनि । कुलकः कुलवर्धनः । श्रेष्ठी शिल्पाजीवी प्रधानात् । श्लोकसंचय-साहचर्यात्सुगन्धद्रव्यसंचयेपि कुलकम् ॥ [ क्रमुक ] क्रमुकः फलेप्युपचाराद्वर्तते नपुंसकं तु ॥ 65 ॥

[ कैशिक ] केशाश्वादन्यतरस्यामिति पाक्षिके ठकि केशसमूहे c. Pâ. 4, 2, 48 । रागभेदः स्वरविशेषः । गीतविषयः । रचितकैशिकमध्यमश्रीरित्यादौ ॥ [पद्मक] हस्ति० । विकसत्पद्मकः करी ॥ 66 ॥

[ सैनिक ] सेनारक्षितरि । भूभृदर्जुन इवास्त सैनिकः ॥ 67 ॥

सेनासमवेतेषु योद्धृषु । Ra. 3, 61 ॥ [ पुष्पक ] नेत्ररोगे पुंसि प्रसिद्धः ॥ [ पौष्पक ] पुष्पाणि शिल्पमस्याः पौष्पिकी ॥ 68 ॥

[ वातिक ] रोगिणि । प्राक् पिबेच्छ्लैष्मिको मद्यं भुक्तस्योपरि पैत्तिकः । वातिकस्तु पिबेन्मध्ये समदोषो यथेच्छति ॥ मान्त्रिके । असुरविवरमिति वातिकैः H. Ch. 108, 5 c. A. S. 47, 10 । मान्त्रिकोत्रासुरविवरव्यसनी c. H. Ch. 47, 17. 223, 4 ॥ [ भावुक ] कुशले । ददातु वो० K. Pr. 140, 11 ॥ 69 ॥

[ रुचक ] भूषाभेदे । स्वस्तिकाकृतिरुपमृद्य रुचकाः क्रियन्ते ॥ अधररुचक इत्यादौ ललामनि c. Kâd. 73, 1 । ललाम रत्नम् । अधररत्नमित्यर्थः । सौवर्चलं कृष्णलवणम् ॥ [ उण्डूक ] अन्तरङ्गमान्तरोवयवविशेषः । उत्करे केशोण्डुकादौ c. Vyutp. 139, 25 । फेनोण्डूकविपाण्डुकीर्तिलहरीनिर्धौतदिग्भित्तय इत्यादावुत्करेपि ॥ 70 ॥

[ मल्लिका ] दीपपात्रे । मल्लिकाङ्कितकरा विविशुस्ताः । शेफालिकायाम् । Ra. 16, 50 । वाद्यभेदे । मल्लिका झल्लरीध्वनिः ॥ [ मोचक ] मोक्तरि । तपसा पापमोचकः ॥ 71 ॥

तद्धेतौ मोचयितरि। भवपाशमोचकः ॥ [ अम्बिलका ] एष्वोषधिद्रव्यविशेषेष्वम्बिलकाशब्दः ॥ [ पदिक ] इयेपि। पदिकाः पदिका इवासते प्रभुकार्योद्यतमानसा रणे ॥ 72 ॥

[ उल्मुक ] इयेपि। उल्मुकेन द्रुमं प्राप्य संकुचत्पत्त्रसंपदम् ॥ [ मड्डुक ] वाद्यभेदे। Śi. 5, 29। फलकमुष्टौ। Śi. 18, 21 ॥ 73 ॥

[ खजाक ] दारुहस्ते। एताः शिरोधृतखजाकविभूषणाङ्ग्यः प[रि]भ्रमन्ति शिवरात्रिमुखेद्य वृद्धाः। मन्थदण्डे। गोप्यः खजाकपरिकर्षणकम्पिताङ्ग्यो मथ्नन्ति मानसमलं सहसैव यूनाम् ॥ [ पदक ] पदाध्येतृमध्यमण्योः। शिष्याणामिव मुक्तानां भात्यस्यास्त्रिवलीतटे। गुरुणा पदकेनेदमङ्कितं मण्डलं महत् [ c. H. Ch. 9, 10, C. ] । चरणत्रं प्रसिद्धम् ॥ 74 ॥

[ पादिक । पादिका ] क्रीताद्यर्थे। ग्राम्यः कामी विपणिसरणौ पादिकीर्वेशयोषाः स्वीकृत्योच्चैर्विलसति लसद्गर्वसर्वस्वपूर्णः ॥ उपानहि रसतुर्येण पारतचतुर्भागेन स्वर्णादिवेधे च। भस्त्रा पूषाश्मजुषस्तारक्रियया विलुप्ततारस्य। जन्मप्रवृत्तयाचे [ sic ] पादिकया चर्मपादिका नास्ति c. Mh. 2, 417 ॥ 75 ॥

[ चालक ] इयेपि। निर्धूतवीतमपि चालक° Śi. 5, 47 ॥ [ चन्द्रक ] वर्हम°। Śi. 5, 19। तोयस्थ°। Śi. 5, 40 ॥ 76 ॥

[ मोदक ] इयेपि। मुदितामोदकमुदितरवीन्दुकवलैकगृध्नुम् c. Mh. 3, 76 [ कीचक ] विराटस्य स्याला राजपुत्रभेदाः। सस्वनेषु वंशेषु। Ku. 1, 8 ॥ 77 ॥

[ सिंहिका ] राहुमातृसिंहपोतिकयोः। K. Pr. 335, 9. 10 ॥ [ लाक्षिक ] इयेपि। अधररुचकरूपं लाक्षिकं येन पीतम् ॥ 78 ॥

[इक्ष्वाकु] राजभेदे। Ra. 1, 72 ॥ [ श्यामिका ] कालिमनि। Ku. 5, 21। स्वर्णव्याजे। Ra. 1, 10। लोहमले। श्यामिकालिप्तहस्ताग्रा लोहकारा विभान्त्यमी ॥ 79 ॥

[ गण्डक ] उपधाने शय्योपकरणविशेषे खड्गाख्ये प्राणिनि च। शय्येव विन्ध्यवनभूः पृथुगण्डकश्रीः। छेदे। गण्डिकाभिस्तथेक्षोः ॥ शिखण्डिगण्डिकापद्मरागमणेररुणांशुजालकैरित्यादौ रक्षायां छेदोपचारात् c. H.Ch. 24,6 ॥ 80 ॥

[ क्लीतकिका ] एते ओषध्यौ क्लीतकिकाशब्दवाच्ये ॥ [ अश्मन्तक ] चुल्ल्याम् । अश्मन्तकान्तिकचलाचलकुम्भदासी । वृक्षे यमलपत्त्राख्ये । M. M. 305, 1 तृणभेदे । M. 2, 43 । एवमित्याहुः शिम्बिसंबन्धात् ॥ 82॥

[ जैवात्रिक ] आयुष्मति । बालोस्तु जैवात्रिकः । चन्द्रे । राजीवजैवात्रिकः । जीवेरात्रिकन् [ ? ] वृद्धिश्च c. Uṇ. 1, 81 ॥ 84 ॥

[ पिप्पलक ] शस्त्रीसीवनसूत्रयोश्चर्मकारे प्रसिद्धः ॥ 85 ॥

[ लालाटिक ] यः सेवकः कोपप्रमादचिह्नाय प्रभोर्ललाटमेव पश्यति यश्च प्रभोः कार्याक्षमः कार्यं कर्तुमक्षमः अशक्तः स लालाटिकः । भावदर्शीति च पाठः। लालाटिकः सदालस्यप्रभुभावनिरीक्षक इत्यजयः c. AK. 290, 17, C. ॥ 89॥

[ पुण्डरीक ] व्याघ्रे । पुण्डरीकै–हरिणैः ॥ 91 ॥

[ प्रतिपादक ] बोधके । शिक्षणां [ sic ] प्रतिपादकः । खट्वाया अङ्घ्रयश्चत्वारः । तदाधारे क्लीबे ॥ 93 ॥

[ ख ] स्वर्गे । तस्मिन्गते खं सुकृतोपलब्धम् c. Ra. 18, 21 । इन्द्रिये । M. 5, 138 । आकाशे । Ku. 7, 49 ॥ [ मुख ] आदौ वक्त्रे च । Sp. 1311। उपाये । नृपतिर्मन्त्रमुखेन संस्पृशेत् ॥ [ शिखा ] अग्रे । आरूढः स खुपर्वपर्वतशिखाम् । ज्वालायाम् Sp. 2497 । केकिचूडायाम् । Me. 101 । शाखायाम् । वृक्षशाखावलम्बिनम् [ sic ] c. Ra. 15, 49 । शिफायाम् । विटपिनां वातावधूताः शिखाः । शिफा कन्दः ॥ 94 ॥

[ शङ्ख ] निधौ । Me. 77 । ललाटास्थिन । Ku. 7, 33 ॥ न खलु शङ्खधवलं शङ्खपालकुलं मलिनीकरोमीत्यादौ शङ्खपालशब्ददर्शनाद्भीमोपि भीमसेनवदित्यतः शङ्खपालाख्यो नागः शङ्खः ॥ दिनांशे । स शङ्खमात्रशेषेह्नि । कम्बौ । Ku. 1, 23 ॥ [ नख ] एवमिति नखौषधावस्त्री चेति तथेत्यस्त्रीत्यर्थः ॥ 95 ॥

[ व्युङ्ख ] मन्त्रे षडोंकाराः । मन्त्रषडोंकारम् । ते व्युङ्ख इत्युच्यन्ते । मनोज्ञे । दिव्यत्वव्यभिचारमेति न सखे व्युङ्खियमस्याकृतिः । मनोज्ञो व्युङ्ख इत्याकारोपि [ ? ] ॥ [ लेख ] दैवतलेख्ययोः । सलेखवर्गस्य विमुद्रमाननम् ॥ [ लेखा ] नवलेखेत्यादि चन्द्रांशे । आभोगे । Ra. 7, 24 ॥ 96 ॥

[ रेखा ] व्याजे । Bâ. I, 16 । आभोगे । आसीत्° Mh. 2, 24 ॥ उल्लेख्ये । चित्रेपि° Mh. 2, 24 । अल्पके । Ra. 1, 17 ॥ [ उखा ] यज्ञभाण्डे । उखां सिकताभिः पूरयित्वा ॥ [ शाखा ] द्रुमांशे । Ra. 13, 24 ॥ 97 ॥

हस्तावयवे । पञ्चशाखेन पाणिना । अङ्घ्र्यवयवे । मुकुट° Mh. 2, 26 । द्वारावयवे । दृढतरशाखमिदं द्वारम् ॥ [ सखि ] मित्रे । Śi. 2, 36 । सहाये । Ra. 14, 87 ॥ [ प्रमुख ] आदौ । श्लाघ्याः कस्य न ते सन्तः प्रमुखप्रियभाषिणः । प्रधाने । Ku. 7, 71 । अग्रे । Ku. 8, 5 ॥ 98 ॥

[ वैशाख ] धानुष्क° । वैष्णवं° Mh. 3, 105 ॥ [ गोमुख ] लेपने । Śi. 3, 48 ॥ 99 ॥

[ विशिखा ] प्रतोल्याम् । विशिखायां सौवर्णप्रचारः । खनित्र्याम् । मुनिभिर्विशिखानिखातमृद्भिः । खनित्री मुनीनां मृदवदारणभाण्डं शस्त्रप्रायम् ॥ निश्चूडे । Ṛigv. 6, 75, 17 ॥ [ विशाखा ] राधा विशाखेति नक्षत्रे स्त्री । अत्र च स्त्रीत्व एकत्वे चामरसिंहेनोक्तम् c. AK. 19, 22 । विशाखयोश्चेति Pâ. 1, 2, 62 द्वित्वनपुंसकत्वं पाणिनिना । कृत्तिकासु विशाखासु मघासु भरणीषु चेति बहुत्वं स्त्रीत्वं च ज्योतिःशास्त्रे स्थितमिति लक्ष्यादनुसर्तव्यम् ॥ 100 ॥

[ मयूख ] त्विषि । मणिमयूखजालैः । करेषु रश्मिषु । Ku. 3, 65 । ज्वालायाम् । अभ्युद्गता° Mh. 3, 104 ॥ [ शिलीमुख ] उभयत्रापि । K. Pr. 26, 7 ॥ [ अग्निशिख, °खा ] भालं वह्निशिखाङ्कितं दधदित्यादावुभयत्रापि c. Râj. I, 2 । ओषधौ निघण्टुप्रसिद्धः ॥ 101 ॥

[ सर्वतोमुख ] जले । प्रभासे° Mh. 5, 9 । ब्रह्मणि । Ku. 2, 3 ॥ [ मकरमुख ] मकराकारधारिणि जानुभागे च । H. Ch. 80, 13 ॥ 102 ॥

जानुभागे जलनिर्गमनद्वारे च । हिमकरमहसैव निर्मितौ यौ मकरमुखप्रसृतामृतप्रवाहौ c. H. Ch. 25, 13. 157, 15 ॥ [ गो ] स्वर्गे । स गोपतिर्व्रजविघट्टनेन । इषौ । गोभिः स विद्धकवचः । धेनुलक्षणे पशौ रश्मौ च । Sû. 9 । लक्ष्यदृष्ट्या पशौ पुंसि । सुखं स्वपिति गौर्गडी c. Sp. 2135 । वाचि । Ra. 2, 59 । वज्रे । गोघातेनैव शैलेन्द्राः । दिशि । गोभ्यः संभृतसद्वित्तः । नेत्रे । गोजलार्द्रितकपोलतलास्ताः । भूमौ । Ra. 5, 26 । जले । गावो वहन्ति

विमलाः शरदि स्रवन्त्याम् ॥ नपुंसकत्वं यत्किंचिदक्षिजलविषयमुक्तं तदर्थयुक्तम् ॥ 103 ॥

[ सङ्ग ] श्लेषे । Ku. 1, 53 । रोधे । Ra. 2,42 ॥ [ भग ] एतदर्कयोनिर्वर्जितं भगवानित्यत्र भगविषयमेव व्याख्यानमर्हति ॥ 104 ॥

[ मृग ] मृगीदृशामित्यादौ कुरङ्गे स्त्रियामपि । पशुमात्रे । Ki. 6, 34 ॥ मृगपति० H. Ch. 87, 6; Su. 622 इत्यादौ पशुमात्र एव ज्ञेयः । ये त्वेवमादौ हरिणपर्यायं मृगशब्दं मन्वाना दृष्ट्वैणीरेणपतिरित्यादि प्रयुञ्जते । ते नाद०ं Bh. Ś. 66; Su. 995 इत्यादिवत्सामान्ये शेषाणां स्वीकार इत्यदूरविप्रकर्षे समर्थयन्त इत्याहुः ॥ 105 ॥

[ सर्ग ] स्वभावे । सर्ग एष महतामविक्रियः । निर्मोक्षे । सुवृष्टिसर्गादिव सस्यसंपदः । निश्चये । Ra. 3, 51 । अध्याये । Kd. 1, 14 । अध्यायः परिच्छेदः । सृष्टौ । Ra. 10, 43 ॥ 106 ॥

[ भोग ] पालने । राजानो भोगिनो वैद्याः । भोगो पालनं विद्यते येषामिति व्युत्पत्त्या । अभ्यवहारे । Sp. 4637 । पणस्त्रीनिर्वेशे । पण्यवनिताभोगैः ॥ वित्ते भोगप्रत्यययोः c. Pâ. 8, 2, 58 इत्यत्र वित्ते उक्तः । सुखे । Sp. 4631 । अहिफणकाययोः । तान्भोगिनः कुण्डलिनो वदन्ति c. Mh. 3, 359 ॥ 107 ॥

[ योग ] संनहने बन्धने । जटाहियोगादचलोर्ध्वजूटः । उपाये । प्राप्ते योगवासनां रहस्यदुर्गस्य । ध्याने । Ki. 3,28 । संगतौ । Ra. 1, 46 । युक्तौ । तस्या दृशोः कार्मणचूर्णयोगः । अलब्धलाभे । योगक्षेमार्थमीश्वरमधिगच्छेत् । भैषज्ये । योगेन रोगान्स भिषग्निहन्ति । विस्रब्धघातिनि शरे । H. Ch. 131, 1 ॥ 108 ॥

[ मार्ग ] मासे । मार्गबहुलपञ्चम्याम् । अन्वेषणेध्वनि च । सतां मार्गे मार्गो भवति यदि च । मृगमदे । शिलातले मार्गसुगन्धिनि स्थितः ॥ अदृष्टेनापि मार्गेण मार्गेणैव न्यवेद्यत इत्यादौ यौगिकत्वान्मृगसमूहेपि ॥ [ नाग ] गजे । Ku. 1, 36 । विगलन्नागवेटक [ ? ] इत्यादौ सीसकरङ्गयोः । रङ्गं त्रपु । ज्योतिःशास्त्रे करणभेदेपि ॥ 109 ॥

[ पूग ] पूगीफलमित्यादौ स्त्रियामपि ॥ [ राग ] क्लेशादिके । रागद्वेषौ मनुष्यस्य खादितारौ वृकाविव c. Sp. 2350, Kâś. Pâ. 5, 3, 115 । सङ्गे । रागः

प्रतिष्ठां हृदये करोति । पानके । तर्षोपकर्षे रागेण गमितः । लौहित्ये । Sp. 5857 । आदिग्रहणाल्लाक्षादिद्रव्याणि गान्धर्वविषया भिन्नषड्जादयोपि ॥ 110 ॥

[युग] यानाद्यङ्गे काष्ठविशेषे । Ra. 3, 34 । युग्मे कृतादिषु च । H. Ch. 50, 8 । चतुर्हस्तप्रमाणे । विचरेद्युगमात्रदृक् । एषु त्रिषु नपुंसकम् ॥ [ खग ] शरविहगयोः । खगपीतासृजो योधाः । अर्के । खगमयूखैररुणिताः ॥ 111 ॥

[लिङ्ग ] प्रकृतिबुद्धौ । लिङ्ग० Mh. 2, 46 । चिह्ने । K. K. S. 1, 42 ॥ व्यक्तौ स्त्रीपुंनपुंसकादौ च । शिवमूर्तिभेदे च लीनं गमयतीति पृषोदरादिः ॥ [ अङ्ग ] उपकारिणि । अङ्गेनातिप्रसङ्गेन । उपाये । सर्वाङ्गमाराधितशंकरस्य । गात्रे । Ku. 3, 23 । अधिकृते । Pâ. 2, 3, 20 ॥ 112 ॥

[ रङ्ग ] नृत्तखले । M. M. 8, 1 । युद्धखले । संग्रामरङ्गे हतः । संग्रामो युद्धम् । भूमौ तूपचारात् खलशब्दः स्थानपर्यायः । रागे लौहित्यादौ । पञ्चरङ्गः कुरङ्गः । त्रपुणि । रङ्गस्य तु पलान्यष्टौ ॥ [ शार्ङ्ग ] धनुर्मात्रे । Ra. 4, 62 । विष्णुचापे । Me. 107 ॥ 113 ॥

[ शृङ्ग ] स्वाम्ये । शृङ्गारूढविभूतयः । स्वाम्यं प्राधान्यम् । अद्रिकूटे । Me. 14 । परवङ्गे । Ku. 3, 36 ॥ [ भाग ] भाग्ये । महाभाग रमणीय एष वः संनिवेशः c. M. M. 57, 5 । एकदेशे । Ku. 3, 59 ॥ 114 ॥

[ भङ्ग ] भेदे । M. St. 14 । ऊर्मौ । रङ्गद्भङ्गां स गङ्गाम् । भक्तौ विच्छित्तौ । Vik. 115 । कौटिल्ये । Śâ. 7 । भये । संसारभङ्गेन तरङ्गिताङ्गः ॥ [ वेग ] प्रवाहे । वाष्पो० Mh. 2, 47 । जवे । Ku. 2, 25 ॥ [ भङ्गि ] भक्तौ विच्छित्तौ । K. Pr. 222, 2 । तरंगे । Me. 60 ॥ चीनांशुकं भङ्गियुतं दधान इत्यादौ तरंगोपचारात् । भक्तिर्यत्र विभागवर्त्मनि वेशपर्यायो विवक्षितः ॥ 115 ॥

[ भर्ग ] भास्करे । S. P. 10 ॥ [वर्ग] पक्षे दुश्रये [?] । आर- स्ते वितकवचा -ि वर्गाः सहेलम् । कवर्गो भूवर्ग इत्यादौ पक्ष — — । समूहे । Ku. 7, 2 ॥ [त्याग] त्यजने । Ra. 12, 10 । दाने । Ra. 1, 22 ॥ 116 ॥

[ वङ्ग ] त्रपुणि । वङ्गपञ्चरचनाविचित्रिताः । राजनि पुंसि । वङ्गो भङ्गं गमितः । तद्देशतत्पुत्रयोः पुंभूम्नि । Ra. 4, 36 ॥ [ भृगु ] प्रपाते । आत्मानं

घातयेश्वस्तु भृग्वग्यनशनादिभिः [ sic ] । मुनौ । वन्द्योसौ भृगुनन्दनः । तत्पुत्रे पुंभूम्नि । भृगौ च जामदग्नय [ ? ] ॥ 117 ॥

[ तुङ्ग ] पुंनागो नागकेसरवृक्षभेदः । तुङ्गात्मनां० Su. 259 तत्र तुङ्गा इत्यादावुच्चे त्रिषु । अत्र तु तुङ्गेति स्त्रियाम् ॥ [फल्गु] अल्पे । अफल्गु वित्त व्यतरद्विजेभ्यः । मोघे निःसारे । अवल्गु फल्गु भाषसे । काकोदुम्बरिका ओषधिभेदः । तस्यां तु पुंसि c. Mh. 2, 35 । सौवीरवदरांकोल्लवल्गुश्लेष्मातकोद्भेव [ sic ] इत्यादौ पुंसि ॥ [ इङ्ग ] इङ्गिते । इङ्गो न ज्ञायते मुनेः । अभिप्रायसूचकव्यापारे पुंसि ॥ 118 ॥

जगति । इङ्गमङ्ग सफलीकृतं त्वया ॥ [ रक्ताङ्ग ] अङ्गारके । रक्ताङ्गे पञ्चमस्थे ॥ [ आशुग ] वायौ । आशुगापहृतपुष्पसंततिः । विशिखे । तीव्रघातिनममुञ्चदाशुगम् ॥ [ भुजंग ] शिङ्गे विदग्धकामुके । महानयं भुजंग आसीत् c. H. Ch. 87, 13. 97, 3. Vâs. 273, 3 । सर्पे । M. M. 196, 6 । स्त्रियां तु भुजंगी ॥ 119 ॥

[ आयोग ] गन्धमाल्योपहारे । आयोगयोगविहिताखिलदेवपूजः । व्यापृतौ । आयोगो रथकर्मणि ॥ [ पराग ] कौसुमे रेणौ । परागपटलीसंलीनभृङ्गावली । स्नानीये । परागोद्वर्तितैरङ्गैः । आदिशब्दात्पटवासादौ । दृष्टा केशवगोपरागहृतयेत्यादौ रजोमात्रेपि ॥ 120 ॥

[ कलिङ्ग ] शाकभेदे । कलिङ्गे चारुचि—टम् । देशे । Ra. 4, 38 ॥ [ सारङ्ग ] चातके । Me. 21 । हरिणे । Sp. 778 ॥ 121 ॥

[ पतंग ] शालिभेदे । पतंगास्तपनीयाश्च ये चान्ये शालयः शुभाः । शलभे । Ku. 3, 64 । सूर्ये । Śi. 9, 18 ॥ [ निषङ्ग ] सङ्गे । गहनवननिषङ्गो मोक्षते [ sic ] न कस्य c. Mh. 3, 113 । तूणे । Ra. 3, 64 ॥ 122 ॥

[ वराङ्ग ] मस्तके । गङ्गां वराङ्गे दधतः पुरारेः । त्वचे । वराङ्ग० Mh. 3, 120 ॥ [प्लवग] कपौ । प्लवगसैन्यमु० V. K. 2, 1, 13, C. ॥ 123 ॥

[ प्रियङ्गु ] कङ्गौ लताभेदे । प्रियङ्गुश्यामाङ्गः प्रकृतिसुभगः ॥ [ निसर्ग ] निर्माणे । जगन्निसर्गसंहारकारकः परमेश्वरः । स्वभावे । Śi. 1, 8 ॥ [ पुंनाग ] उभयत्रापि । विभूषितकुलोद्यानस्त्वं पुंनागः ॥ 124 ॥

[ विसर्ग ] उभयत्रापि । विहितरसविसर्गः साधुशब्दैकपात्रे ॥ [ उत्सर्ग ] सामान्यविधौ । Ku. 2, 27 । प्रचारे पुरीषादित्यागे । उत्सर्गे मानमाचरेत् [?] । त्यागे । Me. 19 ॥ **125** ॥

[ समङ्गा ] मञ्जिष्टायाम् । रङ्गत्समङ्गारुचिः ॥ [उद्वेग] खेदे । महानुद्वेगोऽयं शिशिरकिरणे यत्किल मलम् । उभयत्रापि । आत्मानमेव जनयत्युत्सर्व [ sic ] उद्वेगबहुलोयम् ॥ **126** ॥

[ त्रिवर्ग ] धर्मकामार्थेषु । Su. 2919 । स्थानवृद्धिक्षयेषु । तेषां सा त्रिलसत्त्रिवर्गविषया सन्मन्त्रिणां शेमुषी ॥ [अभिषङ्ग] पराभवे । Ku. 3, 73 ॥ **127** ॥

आक्रोशे संवेगे । कोपाभिषङ्गविगलत्सकलाङ्गसंधिः । शापे । चचाल तस्मादभिषङ्गभङ्गात् ॥ [अपवर्ग] क्रियाफले । Ki. 1, 14 ॥ [उपराग] उपरक्तौ विधुंतुदे राहुभेदे च । रत्युपरागवशा— तिर्भेदमुपैति का गणना तु स्फटिकमणेः ॥ **128** ॥

व्यसने । द्वेषोपरागकलुषीकृतमानसस्य ॥ [ उपसर्ग ] त्रयेपि । तुहिनोपनिपातैरप्यस्खल — — संधिनि । विद्वानिदपसर्ग—ं यं काव्यं तु कवेरिव [?] ॥ **129** ॥

[ उपयोग ] भोगे । मासोपयोगात्स सुखी जीवत्यब्दशतत्रयम् । विद्याग्रहणे । आप्यातोपयोगः [ sic ] ॥ [ कथाप्रसङ्ग ] द्वयेपि । Ki. 1, 24 ॥ **130** ॥

[ ओघ ] वृन्दे । Śi. 1, 18 । अम्बुवेगे । Ku. 2, 25 ॥ [अघ] दुःखे । हन्त्यघं विपदुद्रवम् । अंहसि पापे । Śi. 1, 26 । व्यसने । अनघापि हि संभ्रयक्रमे गर्गग्निपतनाय [ sic ] वल्लरी ॥ [ लघु ] अल्पे । ये गुणा लङ्घने प्रोक्तास्ते — — लघुभोजने । इष्टे । Ra. 11, 12 । असारे । Me. 20 ॥ **131** ॥

[ अर्घ ] मूल्ये पूजाविधौ च । Ku. 1, 58 । तम० Śi. 1, 14 इत्यादौ पूजोपकारके द्रव्ये प्रचरे [ sic ] चेति शेषः । यथा कालिकाः कलयोति [ sic ] नूतनविकासिनीर्मधुलिहामर्घः । इत्यादौ ॥ [ परिघ ] आयुधे । भुजपरिघदगग्रहणम् [ sic ] । घाते । Ra. 11, 88 ॥ **132** ॥

[ प्रतिघ ] द्वेषे । उद्दामप्रतिघानलप्रतिहतप्रज्ञा । शत्रौ । तस्य निष्प्रतिघभावनाविधिं तन्वते ॥ [निदाघ] ग्रीष्मे । Su. 1693 । स्वेदे । निदाघमम्भो मरुताम— —म् । तापे । बहलनिदाघग्लपितैः । तापके त्रिषु । Śi. 1, 24 ॥ [अमोघा] पाटला लताभेदः [ ? ] ॥ **133** ॥

12

[ प्राच् ] दिशि । प्राचीवालविडाललोचनदशां [ रुचां ? ] जाताचपत्रं [sic] ककुप् । देशकालयोः । Sû. 12 । आदिग्रहणेन प्रत्यगुदगवागित्यादयः ॥[ त्वच् ] वल्के । Ku. 1, 7 । चर्मणि । Ra. 3, 31 । त्वचं सुगन्धद्रव्यभेदः । खलापत्रं त्वचो वंश इत्यादौ [ sic ; c. Mh. 1, 7] । एष्वर्थेषु अकारान्तस्त्वच्शब्दोपि ॥ [ वाच् ] वाण्याम् । Śi. 1, 25 । वाचके । Ra. 1, 1 । उभयत्रापि । इत्यत एव वागलंकाराः कैश्चिदुदाहृताः c. Kd. 2, 7 । वागलंकाराः शब्दालंकारा अर्थालंकाराश्चेत्यर्थः ॥ 134 ॥

[रुच्] दीप्तौ । नाभीसरोजस्य रुचं जहार । उभयत्रापि । Ra. 8, 94 v. l. ॥ [ कूर्च ] मर्मभिदि । तस्योर्ध्वं द्व्यङ्गुले कूर्चः [ ? ] ॥ परिहृतकारे कुचीकूर्चाकूता इत्यादौ दम्भे दष्टमन्यत् [ sic ; c. Mh. 2,56 ] ॥ 135 ॥

[ शुचि ] पावके । शुचिज्वालाजालाविलजलधिः ॥ 136 ॥

मासि आषाढे । Ku. 5, 20 । अमात्येत्युपधे परीक्षिते । व्यवहारान्नृपः पश्येद्धर्मज्ञैः शुचिभिः सह c. M. 8, 1 । धर्मार्थकामभयमुखेन सचिवपरीक्ष [sic] तामतिक्रान्तोत्युपधः । यत्कौटिल्यः । उपधाभिः शौचाशौचपरिज्ञानममात्यानामिति ॥ [ रुचि ] इच्छायाम् । M. St. 7 ॥ 137 ॥

[ अर्चा ] आकृतौ प्रतिमायाम् । आभ्यां लिङ्गेर्चितः शंभुरर्चायां भवता पुनः ॥ [ काच ] शिक्ये । आदाय काचमथ पान्थजनः प्रतस्थे । शिक्यं रज्जुयन्त्रम् । मृद्भेदे । Bh. Ś. 3 । मृद्भेदो धातुविशेषः । यद्यकाचा [ ? ] घटिकादिविकारः ॥ [ सूचा ] व्यधने । सूचाग्रमपि नो — —त् । अभिनये । अयं सूचाक्रमोपि ॥ [ वीचि ] स्वल्पेन्वेष्यः ॥ 138 ॥

[ चर्चा ] देव्यां चण्डिकाभेदे । चर्चाव्रतं सुरुचिरं सुचिरं विचार्य ॥ [ नीच ] उभयत्रापि । Sp. 2606 ॥ [पिचु] पार्यौ । विज्ञानमेतत्पिचुवस्त्रनिर्गतम् । उपहासविषयमेतत् ॥ 139 ॥

[मोचा] कदल्याम् । मुमोच मोचारसम् ॥ [चोच] विसेक्षचोचं [sic] मोचेत्यादौ पालेवते फलविशेषे । मोचचोचदलैर्युक्तमित्यादौ द्वयेपि ॥ [काञ्ची] उभयत्रापि । या लग्नकाञ्चीविषयेण कान्तिः N. Ch. 1, 43 । द्वयेपि । काञ्च्यां करः पातितः॥[ प्रपञ्च] उभयत्रापि । विश्वप्रपञ्चरचनाचतुराय तस्मै c. Su. 92 ॥140॥

[ संकोच ] विकासविपर्यये । इत्याशादर्शनाहितमहासंकोचा ॥ [ विकच ] द्रव्यभेदे निघण्टौ प्रसिद्धः ॥ 141 ॥

[ तुच्छ ] लाघवेल्पे च । तुच्छश्च पुच्छच्छटयेव वाचा [?] ॥ [कच्छ] गहने देशे । कूलकच्छस्थलेषु । तुन्याख्या ओषधी रागद्रव्यभेदः ॥ 142 ॥

[ गुच्छ ] स्तवके । तापिच्छगुच्छविहितैः ॥ [ अच्छ ] निर्मले । Sp. 7001 । उभयत्रापि । प्रातरच्छजलबिन्दुवारिभिः ॥ [पिच्छ] विषदविपरीते गुणे । सुपिच्छः स्तिमितो गुदः [?] । लोमादि॰ Pâ. 5, 2, 100 । इति दर्शनात् ॥ 143 ॥

[ अब्ज ] धन्वन्तरौ । अब्जोपदिष्टैरगदैः स्थिरायुः ॥ [ न्युब्ज ] ˉज-मवं चकारेत्यादौ [ sic ; c. Mh. 2, 70 ] । न्युब्जः कुणिरित्यादौ कुब्जेधोमुखे च ॥ [ बीज ] रेतसि । Ku. 2, 5 ॥ 144 ॥

हेतौ । अस्ति किंचिन्मन्त्रबीजम् । अङ्कुरकार्ये । Ku. 3, 18 । अङ्कुरः कार्यो यस्य । अङ्कुरस्य कार्यमित्यपि च ॥ [द्विज] विप्रेण्डजे च । सत्पक्षो द्विजराज एषः । विप्रश्चात्रोपलक्षणं तेन क्षत्रियवैश्ययोरपि ॥ [ व्याज ] दोषे । व्याजः सत्यं द्विजस्य यदि । दम्भे । Nâg. 1 । अपदेशे । Bâ. I, 6 । अपदेशश्छलम् ॥ 145 ॥

[ अज ] ब्रह्मणि । Ku. 2, 5 । विष्णौ । Ra. 10, 24 । ईशे महेश्वरे । जयत्यजः प॰ Mh. 2, 64 ॥ [ व्रज ] गोष्ठे । Śi. 2, 64 । अध्वनि । व्रजेषु सर्वेषु निरुद्धसंचरः ॥ [ आजि ] समे क्ष्मांशे । उपवनाजिममी नृपसूनवो जगुः ॥ [ प्रजा ] संततौ । Ra. 1, 77 । जने । Ra. 1, 18 ॥ 146 ॥

[ ध्वज ] चिह्ने । Ku. 3, 62 ॥ [ निज ] द्वयेपि । Śi. 1, 37 ॥ [ गञ्जा ] खनावाकरे । गञ्जाजातो मणिरिव शिशुः क्लृप्तसंस्कारचारुः । सुरागृहे । गञ्जासंजातमदः ॥ [ गञ्ज ] भाण्डागारे । गञ्ज॰ Mh. 2, 67 ॥ 147 ॥

[ कुञ्ज ] खमुखकुञ्जेभ्यो दे वक्तव्ययवति [ sic ] हस्तिदन्ते कुञ्जशब्दः c. Pâ. 5, 2, 107, 1 ॥ [ गुञ्जा ] काकचिञ्चिका रक्तिकाफलम् । पटहे । विरहिणीप्राणाध्वगुञ्जा इमाः ॥ [ वणिज् ] वाणिज्ये शिल्पकर्मणि । वणिक्पथप्रस्थितः ॥ 148 ॥

[ सहज ] निसर्गे । विशेषतः सहजलङ्घनस्य कुमारीजनस्य c. H. Ch. 28, 4-6 । सहोत्थे भ्रातरि । सहजकालकूटशिक्षितक्रौर्येव लक्ष्मीः ॥ [ सामज ] द्वयेपि । विस्फूर्जत्सामजस्वरैः ॥ 149 ॥

[ बलज ] क्षेत्रे । प्रत्यक्षमिक्षुबलजे क्षपितेक्षुयष्टिः । पुर्द्वारे । रुरुधुर्बलजं बलाद्बलानि । वल्गुदर्शने भद्राकृतौ । वन्यास्ते साधवो बलजाः ॥ [ अङ्गज ] मन्मथे शोणिते च । अङ्गजरञ्जितगात्रो विलपन्वनितानाम् । पुत्रे । तस्याङ्गजो-जनि जयन्तसमानसारः ॥ 150 ॥

[ अहिभुज् ] द्वयेपि । अहिभुजावृतचित्रपत्त्रशोभा ॥ [ अग्रज ] भ्रातरि । M. 3, 171 । विप्रे । अग्रजेभ्यो ददौ वसु c. Ra. 17, 17 ॥ [ क्रिमिज ] कौ-शेयं० AK. II, 6, 111 इत्युक्त्या पट्टसूत्रे नपुंसकम् ॥ 151 ॥

[ करज ] नखे । Dhv. 229, 3 ॥ [ अम्बुज ] पद्मे । P. St. 3, 1 ॥ [ द्विजराज ] वीनां प्रवरो विप्रवरो द्विजाग्रश्रेष्ठश्च । त्रयेपि । सत्पक्षो द्विजराज एषः ॥ 152 ॥

[ धर्मराज ] द्वयेपि [ sic ] । धर्मराज० । Mh. 4, 55 ॥ [ ग्रहराज ] द्वयेपि । अस्मिन्विग्रहराजे काले कश्चक्षुषामुदयः ॥ [ जघन्यज ] द्वयेपि । तत्किं० Mh. 4, 54 ॥ 153 ॥

[ ज्ञ ] सूरौ । Ra. 10, 56 ॥ [ अज्ञ ] मूर्खे । Sp. 105 । अर्भके । जानन्नेवं परिणतवया अज्ञवद्भाषसे किम् ॥ सति पादत्रये ज्ञाज्ञौ भिषजावत्र कारणम् । इत्युदाहरणम् । पूर्वसूत्रे सूरावत्र मूर्खे स्पष्टम् ॥ [ प्रज्ञा ] धियि । Ra. 1, 15 ॥ [ संज्ञा ] चिति चेतनायाम् । त्वग्भेदाच्छोणितस्रावादा मांसव्यथनादपि । संज्ञां न लभते यस्तं विद्याद्गम्भीरवेदिनम् c. Mall. on Ra. 4, 39, Śi. 5, 49 । नाम्नि । सर्वज्ञं तदुपज्ञमज्ञ इति तु ख्याता वयं संज्ञया । सूचनायाम् । Ku. 3,41 ॥ 154 ॥

[ सर्वज्ञ ] शिवे । सर्वग सर्वज्ञ शर्व सर्वात्मन् । बुद्धे । प्रणम्य सर्वज्ञमभीतिविप्लवम् ॥ [ दोषज्ञ ] वैद्ये विदि पण्डिते च । बुद्धिगमलरोगदोषज्ञः । खले । गुणदोषौ दोषगुणौ दोषज्ञो वेत्ति नैव गुणी ॥ [ क्षेत्रज्ञ ] प्रवीणे । क्षेत्रज्ञः कुरुते किंचिन्नाविचार्य हिताहिते ॥ 155 ॥

[ कूट ] मायायाम् । कूटयुद्धविकल्पेपि Ra. 17, 69 v.l. । निश्चले । कूटस्थोक्षर उच्यते । यन्त्रे । Ra. 13, 39 । मायाकैतवानृतानां बाहुल्येनेकार्थतामाहुः । राशौ । भक्तानामा० Mh. 2, 83 । अयोघनः । अयःसंस्कारको भाण्डविशेषः । सीराङ्गं दारुमयं यस्य लोके कूटमिति प्रसिद्धिः ॥ 156 ॥

हस्तिनखेश्वशालानिःसरणमार्गे अवाचीने ॥ [ घण्टा ] किङ्किण्याम् । M. M. 159, 4 ॥ [ तुटि ] क्षणलवमुहूर्ततुटीत्यादौ कालेल्पे । संशये । तुटिं प्राप्ते जीवे सपदि जलजे जातविभवे ॥ 157 ॥

[ कोटि ] त्रयेपि । Su. 2631 ॥ [ जटा ] मूले लग्नकचे च । क्वचिदाश्रितजटावल्कलाः कपिलाः c. H. Ch. 56, 5. A. S. 40, 1 ॥ [ नट ] पत्तोर्णो नडी च तृणवृक्षभेदौ ॥ 158 ॥

[ व्युष्टि ] फलं सस्यसंपत् । उभयत्रापि । व्रीहीणां व्युष्टिरिष्टेयम् ॥ [दृष्टि] ज्ञानाक्ष्णोः । K. K. S. 1, 3 । दर्शने नयनव्यापारे । तीक्ष्णाः क्षणं दृष्टयः ॥ [ इष्टि ] यागे । Ra. 10, 4 । इच्छायाम् । इष्ट्युपसंख्यानवती Kâś. I., 2॥ [ स्पष्ट ] अत्रोदाहरणमन्वेष्यम् ॥ 159 ॥

[ कट ] शवे त्रस्तमारणे । प्रचलितकटपूतनोत्तालवेताल c. M. M. 182, 2 । कट इति श्रोणौ । कलिञ्जे । कटं करोति भीष्ममुदारं शोभनं दर्शनीयम् । कलिञ्जः कुनालक इति प्रसिद्धः । अविकटमित्यादौ भृशे संघाते । अवीनां कटः । अविकटः c. Pâ. 5, 2, 29 ॥ [ कटु ] रसे ऊषणे ॥ तत्कटु॰ Pa. 1150 इत्यादौ तिक्तेपि । अकार्ये । कट्वाचारो हि दुर्जनः । मत्सरे । खलानां॰ c. Mh. 2, 81 । तीक्ष्णे । Su. 692 ॥ 160 ॥

[ चटु ] पिचण्डे । अस्याश्चटुमर्दनैकनिरते । सद्गुणवर्णने । भूयो भूयः प्रियचटुशतैः प्रार्थ्यमानापि तैस्तैः ॥ [ कष्ट ] कृच्छ्रे । M. M. 183, 4 । गहने । कष्टं व्याकरणं कष्टं तपः ॥ [ कृष्टि ] कर्षे । Sp. 2463 । बुधे । येषामिष्टाः कृष्टयस्तेपि मन्ये ॥ 161 ॥

[ त्वष्टृ ] देवशिल्पिनि । Ra. 6, 32 । अर्के । सूर्योर्यमा भगस्त्वष्टा ॥ [ पटु ] चतुरे । Su. 692 । अरुजि । औषधविशेषयोगान्नियतं पटुतां प्रयाति विकलोपि । अगुरौ लघौ । जीर्णान्ते पटुयूषभुक् । लवणे त्रिकटु त्रिपटु श्रेष्ठेत्यादौ नपुंसकम् ॥ 162 ॥

[ दिष्ट ] दैवे भाग्ये । Ra. 9, 79 । काले । कष्टैरनिष्टबहलैर्गच्छति दिष्टो विनष्टमतेः ॥ [ कुट ] कुम्भे । आहूतैः कुटकारकैः । गृहे । Sû. 2 ॥ [अट्ट] अत्यर्थे । सर्वस्वापहृतौ । हि कामुकजनस्याट्टायते कुट्टिनी । अट्टमत्यर्थमाचरतीति । गृहे । वितीर्ण॰ Ra. 16, 11 । सिद्धान्ने मण्डिकादौ अट्टस्थितोपचारादित्यर्थः । अत्यर्थवणिक्पथयोः । H. Ch. 50, 9 ॥ 163 ॥

[ पोटा ] दास्याम् । नखमुखपाटितपोटाकुचतटसंघर्षहर्षरभसेन । पोट इत्यादौ द्विलिङ्गायाम् । उभयव्यञ्जना पोटेत्युक्तत्वात् c. Kâś. Pâ. 2, 1, 65 ॥ [ सृष्टि ] सर्गे । Śâ. 1 । स्वभावे । स्त्रीणां सृष्टिर्हि । चापलम् ॥ [ पुट ] व्याघ्रनखे । Ra. 17, 12 । अभिन्नमन्त्रस्तं यत्पुटं तच्च रक्षार्थं बालानां गले क्रियत इति प्रसिद्धिः । ऊर्णामयः कार्पासो वा कङ्कण इत्यक्षराम्नातम् । करपुटमुकुटाटोपभुग्नोत्तमाङ्ग इत्यादौ हस्तादिसंपुटे ॥ 164 ॥

[ मुष्टि ] खड्गो मुष्टिविनष्ट इत्यादौ त्सरौ । विक्रये द्रव्यविशेषे पणः । यदाहुः । शाणं पाणितलं मुष्टिं कुडवं प्रस्थमाढकम् । नीवारमुष्टिंपच इति वा c. Bâ. IV, 35. X, 92 । पाणिबन्धे । Sp. 4677 ॥ [ पट्ट ] पर्यन्ते । तवाष्टमीचन्द्रसहोदरोयं ललाममुक्तः किमलीकपट्टः । वस्त्रे कौशेये । वात्याघट्टितपट्टवस्त्रनिचया यान्ति द्रुतं योषितः ॥ [ घट्ट ] शुल्कदेशे । अलिप्सूनन्तरङ्गांश्च स्वान्घट्टेषु नियोजयेत् । तरोपाये । घट्टालङ्घितजाह्नवीजलभराः संप्राप्तपारास्ततः ॥ [ घटी ] अरघट्टघटीयन्त्रन्यायादित्यादौ भाण्डे घटीशब्दः स्त्रीपुंसयोः ॥ 165 ॥

[ घटा ] गोष्ठ्यां सहृदयासनबन्धे । घटाबन्धं प्रविष्टैस्तैः । हस्तिपङ्क्तौ । विकटकरिघटाकवाटपाटनपटोः । घटनायाम् । एतदत्र घटामुपैति यत् ॥ [दिष्टि] परीमाणे द्वादशाङ्गुले । दिष्टिमात्रास्तु समिधः । आनन्दने प्रियनिवेदने । दिष्ट्या वर्धसे । कैश्चित्तु तृतीयान्तं प्रतिरूपमिष्यते ॥ 166 ॥

[ विष्टि ] आज्ञां वेगे । विष्टिगामी । वेतनं भृतिः । करणं दैवज्ञशास्त्रोक्तम् । विष्ट्या शतसहस्रं तु इत्यादौ । कर्मकृति भारिकादौ । विशन्तु विष्टयः शीघ्रं रुद्रा इव महौजसः c. V. A. 21, 27 ॥ [ म्लिष्ट ] अविस्पष्टे वचसि । रोगावृत॰ Mh. 2, 94 । म्लाने विच्छाये । म्लिष्टं चित्रममुत्र वासभवने वक्ति त्वदीयं यशः । केचित्त्वत्र वदनगताविस्पष्टत्वोपचारान्म्लिष्टत्वमाहुः ॥ 167 ॥

[ इष्ट ] यज्ञाय दाने । M. M. 12, 2 । तेन क्रतुभिरिष्टं स्यात्सहस्रदक्षिणैरित्यादौ यागेपि ॥ [ दृष्ट ] ऐहिके इहलोकोपभोग्यफले । दृष्टादृष्टतरः साधुः । दृष्टौ नयनव्यापारे प्रसिद्धम् । ज्ञाते । दृष्टानि विप्रियशतान्यथ शीलितेयम् । अवतारिते प्रचारिते । Pâ. 4, 2, 7 ॥ 168 ॥

[ खेट ] ग्रामभेदे गह्वरप्राये । एतैः खेट० Mh. 2, 85 । मलेन्वेष्यम् । कुत्सिते । अरिखेटनिराकृते ॥ [ रिष्ट ] द्वयेपि । भवेन्न कस्यापि हि रिष्टमिष्टकृत् ॥ [ घृष्टि ] घर्षे । वृक्षैर्विभिन्नैरिभकुम्भघृष्टचा । किरे । वनावनिं घृष्टिनिखातमुस्ताम् ॥ 169 ॥

[ हृष्ट ] वातवर्षप्रतिहते । शीतहृष्टवदनः सवेपथुः । विस्मिते । दृष्ट्वा कष्टं विधिविनमितं हृष्टबुद्धिः स साधुः । हर्षिते संजातहर्षे । प्रियं० Mh. 2. 100 । एषु त्रिषु । रोमाञ्चविषये । हृष्टैर्लोमभिरेष रञ्जिततनुर्धत्ते कदम्बश्रियम् । केशेषु । दाहव्यापच्छमनविधये कृप्तशीतोपचारैर्हृष्टाः केशा विरहशिखिनो धूमतां यान्ति तस्याः ॥ 170 ॥

[ झाट ] शुष्यज्जम्बीरझाटेत्यादौ गहने ॥ [ सटा ] सिंहकुन्तले । Su. 995 । जटायाम् । Ku. 8, 46 ॥ [ मृष्ट ] स्वादुनि । मृष्टान्नदाता तरुणाग्निहोत्री । शुद्धे । उन्मृष्टपाणिपादास्यो भुञ्जीतान्नं समाहितः । क्षान्ते । मृष्ट एकोपराधस्ते ॥ 171 ॥

[ शिष्ट ] साधौ । Ra. 1, 28 । खसिते । शिष्टमिष्टैः सहाश्नीयात् । विहिते । यच्च शिष्टाप्रतिहतम् ॥ [त्रोटि] पक्षिचञ्च्वाम् । त्रोटि० Mh. 2, 89 । वस्तुद्विधाभावे । कुचतटात्त्रोटिमापद्य हारः ॥ 172 ॥

[ अरिष्ट ] आसवे । अरिष्टमिष्टैः सह सेवेत । मृत्युसूचके लक्षणे । षण्मासिकमरिष्टं तत् । सूतिगेहे । Ra. 3, 15 । अशुभे । अरिष्टो जन्मकार्येषु वर्जनीयः प्रयत्नतः । अरिष्टाः सन्तु नः पन्थान इत्यादौ शुभे तद्वति च त्रिषु ॥ 173 ॥

दैत्यविशेषे । दुष्टारिष्टकठोरकण्ठवलनाः । अरिष्टैरिव मूर्तैस्तैररिष्टैर्वलितं गृहमित्यादौ काकेपि । लशुननिम्बफेनिलक्षीरवृक्षा आयुर्वेदप्रसिद्धाः ॥ [चिरण्टी] सुवासिनी गूढा गृहिणी वृद्धापि चिरण्ट्युच्यते । द्वितीयवयास्तरुणी स्त्री सर्वैव चिरण्टीशब्दवाच्या ॥ 174 ॥

[ परीष्टि ] परिचर्यायामन्वेषणे च । इष्टा परीष्टिः शिष्टानां दुष्टकर्मविपाटनी ॥ [ उत्कट ] द्वयेपि । उत्कटकरिकवाटपटुपाटनबद्धरतिः ॥ [ कृपीट ] उदरे । शूलोद्भिन्नकृपीटपीठमकरोदन्धासुरं यः शिवः । जले । कृपीटयोनेरुदियाय धूमः c. Ra. 7, 23 । अङ्गचो° M. 9, 321 इत्याम्नायः ॥ 175 ॥

[ विकट ] उभयत्रापि । व्यादाय विकटमास्यम् ॥ [ अवट ] अवटवटा-

करघटितघटीत्यादौ कूपे । गर्ते । अवटाटनपटुगतिः । प्रमत्ते । अवटातङ्कसंकेतनिकेतनसमाश्रयम् ॥ [ करट ] कटु रटत्करटेत्यादौ काके ॥ 176 ॥

[ चिपिट ] खाद्यप्रभेदे खलभृष्टादौ । पिच्चितविस्तृते मर्दितविपुले यथा चिपिटनास इति ॥ [ अदृष्टि ] अज्ञाने । अदृष्टिकलुषीकृते हृदयवारिधौ मज्जते । अदर्शने आन्ध्ये असौम्ये क्रोधाद्युपप्लुते अक्षिण च । विवेकाञ्जनदानेन ममादृष्टिं निवारय ॥ 177 ॥

[ कवाट ] इभगण्डे । Su. 2461। द्वारपट्टे। Ra. 3, 34 ॥ 178 ॥

[ उच्छिष्ट ] भुक्तशेषे । उच्छिष्टभोजी विप्रोसौ । क्षते । रेवतीवदनोच्छिष्टमदपूर्णपुटे दृशौ c. Śi. 2, 16; S. K. 72, 25 ॥ 179 ॥

[ करहाट ] देशभेदे वृक्षभेदे अम्बुजाङ्कुरे प्रसिद्धः ॥ 180 ॥

[ शिपिविष्ट ] दुश्चर्मणि चर्मरहितशेपसि पुरुषे ॥ [ प्रतिशिष्ट ] प्रत्याख्याते । अप्रियाणि॰ Mh. 4, 63 । मैत्रीं प्रति प्रयततः प्रतिशिष्टदूत इत्यादौ प्रेषिते द्वयोरपि त्रिषु ॥ 181 ॥

[ तुलाकोटि ] उभयत्रापि । अमूल्यस्य मम स्वर्णतुलाकोटिद्वयं कियत् । इतीव कोपादाताम्रं॰ Vik. Ch. 8, 8 ॥ [ कोष्ठ ] अन्तर्जठरे । कोष्ठे मृदुः । कोष्ठागार इत्यादौ कुसूले । अन्तर्गृहे । कोष्ठात्॰ Mh. 2, 103 ॥ 182 ॥

[ काष्ठा । काष्ठ ] दिशि दारुणि च । काष्ठावस्थितमाश्रयं ज्वलति ते तीव्रः प्रतापानलः । उत्कर्षे । Ku. 3, 35 । मर्यादायाम् । Ku. 5, 28 ॥ [ कण्ठ ] समीपगलयोः । Ku. 7,51 । शब्दे । Ra. 8, 63 । समीपशब्दयोरत्र रूढिलक्षणया वृत्तिमाहुः ॥ 183 ॥

[ ज्येष्ठ ] ज्येष्ठे मासि निरभ्रेतेत्यादौ मासभेदे c. Mh. 2, 104 । वृद्धतमे । ज्येष्ठो भ्राता समः पित्रा M. 4, 184 । प्रशस्यतमे । वर्णज्येष्ठान्कुलश्रेष्ठान् ॥ [ गोष्ठ ] अङ्गने । गोष्ठेश्व इव सेवकः ॥ 184 ॥

[ निष्ठा ] निष्पत्तौ । निष्ठां गतं तस्य तपो विलोक्य । नाशे अन्ते च । Râj. 4, 637 ॥ [ हठ ] द्वयेपि । हठैरनुसृतो हगात् ॥ 185 ॥

[ श्रीकण्ठ ] देशभेदो हर्षचरिते व्याख्यातः c. H. Ch. 104-107 ॥ [अम्बष्ठ] संकरोद्भवे । M. 10, 8 ॥ 186 ॥

[ प्रतिष्ठा ] आस्पदे । Ra. 6, 21 । मर्यादायां शिष्टाचारे । धृतप्रतिष्ठाः क्व न सन्ति सन्तः । देवादिस्थापने । इष्टे प्रतिष्ठासमये पुरारेः । आदिग्रहणान्मठादौ ॥ 187 ॥

[ कमठ ] मानभिन्नमाणविशेषः । कूर्मे । Su. 36 ॥ [ नीलकण्ठ ] शिवे । Ku. 5, 57 । बर्हिणि । Me. 76 ॥ [ कलकण्ठ ] कलकण्ठपञ्चमरवेण शुश्रुवामित्यादौ पिके रूढः ॥ 188 ॥

[ कुण्ड ] पत्यौ० M. 3, 174 इत्युक्त्या जारजाते द्वयोः । परिमालकपादानामुत्सवे चोपयुज्यते । दर्वीबृसीपटलिकाकुण्डभाण्डकरण्डकमित्यादौ भाजने पात्रभेदे स्त्रीपुंनपुंसकेषु ॥ 189 ॥

वह्न्याधारे । क्रियाशक्तिस्तु वै कुण्डं ज्ञानशक्तिर्हुताशनः ॥ [ क्ष्वेडा ] वंशाङ्कुरे । क्ष्वेडाचर्वणतृप्तसिन्धुरवधूतर्षप्रहर्षापहः । सिंहनादे । एष० Mh. 2, 111 ॥ [ क्ष्वेड ] विषे शब्दमात्रे च । तस्य० Mh. 2, 110 ॥ 190 ॥

[ विपाठ ] इषौ । तत्र पेतुर्विपाठाः ॥ [ मण्ड ] द्रवे । मण्ड० Mh. 2, 124 । [ काण्ड ] तरुस्कन्धे । आदाय काण्डात्तरुमुज्जिहानम् । लतायाम् । Śi. 5, 50 ॥ 191 ॥

दण्डे । दोःकाण्डकण्डूजुषः । बाणे । आसीच्छ्लाघ्यमस्य शत्रुविजये कोदण्डकाण्डाहतौ । अर्वति कुत्सिते । Śi. 1, 38 c. Gaṇ. 45, 12 । वर्गे । षण्डे तरूणां मृगकाण्डमेतत् । अवसरे । H. Ch. 60, 6 । वारिणि गवेषणीयम् ॥ [ भाण्ड ] अश्वाभरणे पर्याणादौ । भाण्डत्रासी हयः । पात्रविशेषे । Ch. I, 54 । तरीषु० Śi. 3, 76 इत्यादौ मूलवणिग्धनोपचारात् ॥ 192 ॥

[ दण्ड ] तुर्योपाये दण्डनायके । पतिमथ कुलनारी दण्डभीत्याभ्युपैति Sp. 3734 । राजबले । दण्डेन पीडयति शत्रुसमूहमेषः । लगुडे । Ku. 2, 23 । मथि मन्थकाष्ठे । AK. 2, 9, 53 ॥ [ गुड ] गोले वर्तुले पिण्डे । भक्षितो वाप्ययोगुडः ॥ 193 ॥

[ पिण्ड । पिण्डी ] संघाते । Sp. 4952 । ग्रासे । Ra. 2, 59 । पिण्डीमात्रोपहतवदनस्ताडितोपि प्रचण्डमित्यादौ ग्रासोपचारात् । कलेवरे । Ra. 2, 57 ॥ [ गण्ड ] विस्फोटे । समाश्लिष्यत्युच्चैः पिशितघनगण्डौ० Su. 3388 ॥ [मुण्ड]

13

के शिरसि । आस्वादयामि यदि रोहितमुण्डखण्डम् । मुण्डिते कृत्तकचे । M. 2, 219 ॥ 194 ॥

स्थाणौ । क्यालैरा॰ Mh. 2, 125 । शाबलेयबाहुलेयखण्डमुण्डेत्यादावजातशृङ्गे गवि । अकृतचूडे । जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥ [ खण्ड ] शकले । खण्डेन्दुचूडामणिः । इक्षुभेदे । खण्डस्य षोडश पलानि शशिप्रभस्य c. AK. 2, 9, 44, C. । शाबलेयो बाहुलेयः खण्डो मुण्ड इत्यादौ स्फुटितशृङ्के गवि द्वयोः । स्त्रियां तु खण्डेति ॥ 195 ॥

[ शौण्ड ] वृषभे । Bh. S. 88 । समर्थे । अक्षशौण्डः । मधुसक्ते । शौण्डः पिबति पानागारे ॥ 196 ॥

[ रण्डा ] विधवायाम् । पञ्चाक्षरी जयति रण्डिकया प्रयुक्ता ॥ [ अण्ड ] कठिने । खण्डी॰ Mh. 2, 108 । मुष्के । निरण्डास्ते हयाः शूराः । खगादिकोशे । M. 1, 44 । आदिग्रहणात् । अव्यक्तादण्डमभूदण्डाद्ब्रह्मेत्यादौ ब्रह्मकोशे ॥ [ क्रोड ] उरसि । Sp. 1969 ॥ मुकुल॰ Sû. 2, a इत्यादावुपचारात् ॥ 197 ॥

[ पीडा ] द्वयोरपि । Bh. Ś. 56 । कृपा हि परार्थे दुःखानुभवनम् ॥ [ नीड ] स्थानमात्रे । स बद्धकक्ष्यः परनीडपीडने । तत्रागत्य॰ K. K. S. 1, 61 इत्यादौ द्वयोरपि पुंनपुंसकयोः ॥ [ नाडी ] कायसिरायाम् । M. M. 158, 1 । नाले पद्मादिषण्डे । आसेतुरुन्नाडिनि पुण्डरीके । षट्क्षणे काले घटिकाख्ये । नाडिकाविच्छेदध्वनिरुदचरत् ॥ 198 ॥

[ शुण्डा ] सुरायां तत्पानमदस्थाने च । शुण्डायां॰ Mh. 2, 125 । वक्त्रैकदेशे चिबुके । शुण्डा॰ Mh. 2, 126 ॥ [ गडु ] कुब्जे । असौ गडुर्जानुनिविष्टहस्तः । पृष्ठगले । गडुलश्चापलमाचरत्यसौ ॥ 199 ॥

रोगे । यद्येवमन्तर्गडुना कोऽर्थः स्यात्स्थायिनात्मना ॥ [ चण्ड । चण्डी ] औषधिभेदे महेश्वरगणे च प्रसिद्धः । कोपने । Dhv. 77, 2 c. Vik. 130 । देव्याम् । चण्डश्चण्डीपतेरंशः c. Mh. 2, 134 ॥ [ षण्ड ] गोपतौ वृषभे । हालिकः षण्डमारुह्य । पद्मादिसंचये । जम्बूषण्ड॰ Me. 20 ॥ 200 ॥

[ व्याड ] व्यालास्ते° Su. 1007 c. Bh. Ś. 83 इत्यादौ लडयोरैकत्वस्मरणात् सर्पे । मांसात्पक्षौ क्रव्यादे वृकसृगालादौ । व्याडैर्व्याप्ते वनान्तरे ॥ [इडा] इडामुदहरत्क्रोड इत्यादौ भूमौ । इडाभ्या गौः पयस्विनीत्युक्त्या गवि । वाचि । श्रीडादिडां नैव ददाति वीरः । अप्सरसि । ऐडः पुरूरवास्तत्र ॥ [ प्रकाण्ड ] तरुस्कन्धे । कण्डूयमानः सरलप्रकाण्डान् ॥ 201 ॥

[ सपिण्ड ] पुत्रे । सपिण्डः पितृदायादः । दायादे । एकाहस्तम ----- --तु वै पितुः ॥ [ शिखण्ड ] बर्हे । Ra. 1,39 । चूडायाम् । Ra. 11, 5 ॥ [ पोगण्ड ] विकलाङ्गे । पोगण्डाः संभवन्ति ते । बालश्चा षोडशाद्वर्षात्पोगण्डश्चाभिधीयत इत्युक्त्या बाले ॥ 202 ॥

[ दृढ ] शक्ते । उदीर्णे रागाग्नौ सुदृढघनमाश्लिष्यति वधूरित्यादौ c. Sp. 2596 । स्थूले व्यायते । कस्ते स्याद्दृढघातकस्य समरे प्रत्यक्षवर्ती रिपुः ॥ [ व्यूढ ] विन्यस्ते विपुलीकृते । अनूर्ध्वज्ञुर्व्यूढजानुर्जुहुयात्सर्वदा हविः Śāṅkh. Gṛihy. 1, 10 । संहते घने । Ra. 1, 13 ॥ [ मूढ ] जडे । मूढे नास्ति मतिः क्वचित् । तन्द्रिते अलसे । किं° Mh. 2, 128 ॥ [ रूढ ] अङ्कुरिते । निरूढव्रीहयः शष्पम् । लग्ने । Su. 1617 c. Sp. 4554 ॥ रूढे° Ra. 13, 73 इत्यादौ लग्नत्वोपचारात् ॥ 203 ॥

[ बाढ ] भृशेत्यर्थे । बाढमाविद्धकर्णैः । प्रतिज्ञायाम् । आं बाढं क्रियते भवद्भिरुचितम् ॥ [ लीढ ] स्वादिते । लीढं मधुकरैर्मधु । म्लिष्टमीषद्व्यक्तम् । लीढमद्य व्याख्यानं जातमित्यादौ ॥ [ गाढ ] विलोडिते । नौभिर्विगाढां सरयूं विलोक्य c. Ra. 14, 30 । दृढे । Pa. 3683 ॥ 204 ॥

[ उदूढ ] उदूढा [sic] धृतो विवाहितश्च । पृथुलेऽन्वेष्यः ॥ [ उद्गाढ ] भृशे । Śū. 8 । कृच्छ्रे । निदाघोद्गाढसंताप° c. Su. 1693 ॥ [ उपोढ ] ऊढमात्रे । Sp. 1311 । समासन्ने । उपोढपाणि° c. Ku. 7, 4 ॥ 205 ॥

[ आषाढ ] व्रतिदण्डे । Ku. 5, 30 । मासे प्रसिद्धः । भूधरभेदेऽपि ॥ [ आलीढ ] श्लिष्टे । वत्सालीढं भाष्यम् । स्पृष्टे । Ra. 2, 37 । आस्वादिते । आलीढं मधुसर्पिषा सह कथम् । धानुष्कस्थानभेदे । Ra. 3, 52 ॥ 206 ॥

[ अध्यारूढ ] संहेवाके । अध्यारूढं तु तं विद्यात्स परीक्ष्यः प्रयत्नतः ।

पृष्ठगते उपरिस्थानं प्राप्ते । गगनमध्यारूढे सवितरि ॥ 207 ॥

[ भ्रूण ] द्वयोरपि । M. 8, 317 ॥ [ बाण ] बलिसुते । Kâd. I. v. 2। देवभेदे । बाणलिङ्गे॰ Mh. 2, 148 । बाणीयबाणी यदि कर्णगोचरेत्यादौ वाचि स्त्रियाम् । दासीकुरण्टकौ वृक्षभेदः ॥ 208 ॥

[ कण ] अल्पे । Ra. 1, 85 । विप्रुषि । Suv. 37, 7 । अतिसूक्ष्मधान्यांशे। Su. 2446 ॥ [ कर्ण ] संसारवारांनिधिकर्णधार इत्यादावरित्रे लोके खेडाशब्दवाच्ये । श्रुतौ । Sâ. 22 । राजभेदे । षड्भिः कर्णो निपातितः ॥ 209 ॥

[ गण ] प्रमथे । Ku. 1, 55 । संख्याभेदे । विवेक्तारो येषां दिशि दिशि गुणानां गणतया ॥ [ पण ] ग्लहे द्यूतार्थे धने । कोलिद्यूतपणीकृतो विहरता पूतः स बिम्बाधरः । अशीतिः श्वेतिकाः पण इत्युक्त्या श्वेतिकामाने वराटकपरिच्छेदे । मूल्ये । दश कार्षापणाः पणः । कार्षापणे रूपकद्वये । नातिरिक्तोधिकारोस्ति सार्धात्पणसहस्रतः । धने गवादौ स्वे बहुधन आपणिक इत्यादौ ॥ 210 ॥

द्यूतादौ कल्पिते संध्यर्थं मुद्रिकादिदाने । पणबन्ध॰ Ra. 8, 21 । पणो बध्यतेस्मिन्निति पणबन्धः संधिः । बद्धमुष्टौ मुष्टिगृहीतशाकादिपरिमाणे । नात्तुं शाकपणो रटन्न चलति द्वारान्धनी संततम् । भृतौ वेतने प्रसिद्धः । पण्यव्रनितेत्यादौ ॥ [ गुण ] रज्जावुत्कर्षे च । H. Ch. 49, 2 c. Sp. 7617 । आदौ यस्य गुणास्ततः किल च येत्यादौ तन्तुषु राजसाधर्म्यात् । मौर्व्याम् । Su. 2455। गुणाः खलु गुणा एवेत्यादौ द्वितीयो गुणशब्दः प्रधाने s. Su. 2672 । गुणवति यौवनशालिनीत्यादौ रूपादौ द्रव्याश्रिते सर्वत्र । आदिग्रहणाद्बुद्ध्यादौ । कणादोक्ते सत्त्वे निविशत इत्यादौ लौकिके च शुक्लादौ । सूदे भक्तकरे । AK. 2, 9, 28। धृतराष्ट्रो गुणप्रिय इत्यादौ c. Vâs. 15, 1 । अत्र हि विरोधाभासे गुणशब्देन विराटगृहे भक्तकरावलम्बी भीमसेनो विवक्षितः । इन्द्रिये । Bhag. 3, 29 ॥ 211 ॥

भागे । Ra. 2, 25 । भाण्डेन्वेष्यः । शौर्यादौ । Ra. 1, 22 । सत्त्वादौ । Kâd. I. v. 1 । संध्यादिके । Ra. 8, 21 ॥ [ क्षण ] निर्व्यापारस्थितौ । किं न कुर्वन्ति सक्षणाः । कालविशेषे । Śi. 4, 17 । उत्सवे । क्षणे रक्ष्याः कुलस्त्रियः ॥ क्षणं॰ Śi. 1, 4 इत्यादौ प्रकरणमाहात्म्यान्नृत्तोत्सवे ॥ 212 ॥

[ वर्ण ] गुणे । Ra. 11, 2 । लब्धो वर्णो गुणो यैस्ते लब्धवर्णा विद्वांसः ।

स्वगुणो० Śi. 16, 29 इत्यादौ तु स्पष्ट एव गुणे वर्णशब्दः। व्रते। Ki. 1, 1। यशसि। अवर्णवादाङ्कुशमुद्विजेन कः। शुक्लादिकेपि। दुर्वर्णतामेति च दुर्जनस्य N. Ch. 1, 14; Su. 168। ब्राह्मणादौ। Ra. 5. 19। विलेपने। वर्णितं मुखमेतस्याः। कुथायाम्। वर्णास्तरणोपविष्टः। गीतप्रसङ्गे। Ku. 5, 56। रूपे। Ku. 3, 28 ॥ 213 ॥

[ स्थूणा ] शस्त्रमयः स्त्रीविशेषः सूर्मी यस्यां प्रतप्तायां गुरुतल्पगेन प्रायश्चित्तं चर्यते ॥ [ तृष्णा ] द्वयेपि। Sp. 4089 ॥ 214 ॥

[ तीक्ष्ण ] विषे क्लीबे। तीक्ष्णेन नीतः क्षयमित्यवैमि। आजौ। तीक्ष्णेषु शत्रुहननप्रयतस्य तस्य। लोहे शस्त्रम्। अभिसरे। यदि तत्र तीक्ष्णाः संचरेयुः। अभिसरो जीवनिरपेक्षश्च। अभिसरो मरकं युद्धं चेत्यन्ये। खरे। Śi. 2, 109 ॥ [ मणि ] अलिञ्जरो घटः। क्रमादपामपि मणौ पङ्कोवद्दयं प्रवर्धते। बस्तिष्टेन यथाकालं मलानां शोधनं प्रतीत्यादौ ॥ रत्ने। Sp.. 4657। अजागलस्तने। अजामणेरिवैतस्य जन्म जातं निरर्थकम् c. Sp. 3120 ॥ 215 ॥

[ कृष्ण ] बीभत्सुरर्जुनः। कृष्णद्वैपायन इत्यस्य कृष्णशब्दस्य भीमोपि भीमसेन इति न्यायेन व्यासे प्रयोगः। अथ द्वैपायनशब्देनास्य चण्डश्चण्डीपतेरंशो मुनिर्द्वैपायनोस्तु वः। रथयोजितगोविन्दो रुक्मिणीकः सदा मुदे ॥ इत्यादौ दुर्वाससस्यपि वर्तनात्कृष्णशब्देनैव व्यासवाचिना विशिष्यते द्वैपायनशब्दः ॥ वर्णे। कृष्णस्ते करपुष्करोदरतले खड्गः सदा जृम्भते। तम० V. S. 4 इत्यादौ पापेपि मालिन्योपचारात्। द्रौपद्याम्। V. S. 22 ॥ 216 ॥

[ कोण ] वीणावादनोपायेश्री च। H. V. 1, 9। लगुडे। उद्गीर्णकोणरभसादरविद्रुतस्य ॥ [ शोण ] नदे। हिरण्यवाहनामानं शोणमद्राक्षीत् c. H. Ch. 22, 2। लोहिताश्वे। शोणलङ्घितरणाजिरस्य ते ॥ 217 ॥

[ प्राण ] बले। भावात् [?] प्राणः कुतस्ते। वायुः शरीरस्थः प्राणः। समानोदानव्यानाश्चेत्युक्त्या। भ्रुवो° Bhag. 8, 10 इत्यादौ। असुषु जीवेषु। Bh. Ś. 102 ॥ [ घृणा ] द्वयेपि। चेतसि घृणा काये च यस्यानिशम् ॥ [ श्रेणि ] कुले प्रसिद्धः। आवलौ। R. K. 1, 1 ॥ 218 ॥

[ पार्ष्णि ] पादग्रन्थेर्गुल्फस्याधोभागे। Ku. 1, 11। वाहिनीकटौ। Ra. 4, 26 ॥ [ जिष्णु ] शक्रे। जिष्णुना विजिते वृत्रे ॥ 219 ॥

[ द्रोण ] काकभेदे । द्रोणैराश्रितगह्वरे ॥ [ द्रोणी ] काष्ठाम्बुवाहिनी दीर्घा नौवाहनार्थं दण्डः । गवादन्नादिभाजने । सुरभिसलिलपूर्णां द्रोणीमवततार ॥ 220 ॥

नीलिनी ओषधिभेदः । गुहायाम् । कुर्वाणो रुधिरार्द्रचञ्चुकपणैर्द्रोणीरिवाद्रेर्नवाः ॥ [ वेणी ] नदीस्रुतौ । Me. 29 । केशकलापे । Ku. 2, 61 ॥ [उष्ण] त्रयेपि [ sic. ] । अत्युष्णमुष्णाभिगमे हि देहादुष्णं वमन्नुष्णमनाः स जिष्णुः ॥ 221 ॥

[ अणु ] अल्पे । Bhag. 8, 9 ॥ [ चूर्ण ] धूलौ । Me. 67 । क्षारभेदे ताम्बूलोपकरणे । न विना चूर्णं रञ्जयति ॥ चूर्णरञ्जितचलालकावलिरित्यादाववधिवासके कर्पूरादिक्षोदकृते द्रव्यविशेषे नपुंसके बहुत्वे च । चूर्णानि वासयोगाः स्युरिति चामरसिंहः AK. 2, 6, 134 ॥ 222 ॥

[ आणि ] अक्षस्य रथनाभिक्षेप्यकाष्ठस्यान्ते बन्धार्थं कीलक आणिः । आणीमाण्डव्य इत्यादौ । अश्रिः कोणः ॥ [ रण ] क्वाणे । कर्षन्ति॰ Mh. 2, 149 । मृधे । Ra. 12, 72 ॥ [ क्षुण्ण ] प्रहते । Ku. 2, 43 । दक्षे । क्षुण्णाः शास्त्रेषु सर्वेषु ॥ 223 ॥

[ शाण ] मानभेदे माषके । सुवर्णशाणं च लोमशसूत्रेण वेष्टयेत् । कषे । Su. 3457 । कषतेस्मिन्निति कषः कुरुविन्दाख्यो द्रव्यभेदः ॥ [ स्थाणु ] उभयत्रापि । तस्मै जगत्तरुध्वंसस्थाणवे स्थाणवे नमः ॥ 224 ॥

[ वरण ] प्राकारे । प्रोत्तुङ्गवरणावृतः । स्वीकृतौ । कन्यावरणमिच्छन्ति । रोधे । कृतवरणान्प्रविमुच्य मारुतान् ॥ 225 ॥

[ धोरणी ] पङ्क्तौ । जलधरजलधाराधोरणीधौतमूर्धा c. Vik. Ch. 13, 86 । वाहने युग्यभेदे सर्वस्मिन् स्थितौ नपुंसकलिङ्गे । धोरणं वाहनं यत्त्रमित्यमरसिंहः c. AK. 2, 8, 58 ॥ 226 ॥

[ ग्रामणी ] नापिते प्रसिद्धः । श्रेष्ठे । Bâ. III, 10 । ग्रामाधिपे । ग्रामणीदुहितृपाविते जले ॥ [ हरिणी ] हेमप्रतिमायाम् । हरिणीभिर्हतस्तम्भा भान्ति पूर्वं न देवताः । हरिणीर्ब्रह्मवर्चसकाम इत्यादौ हरितायाम् ॥ 227 ॥

[ हरिण ] पाण्डौ । हरिण॰ Mh. 3, 223 ॥ [ विपणि ] पण्याध्वा हट्टप्रदेशेन जनानां मार्गः । हट्टो वणिक्स्थानम् । द्वयेपि । पूर्णापणं विपणिनो विपणिं विभेजुः c. Śi. 5, 24 ॥ 228 ॥

[ ग्रामीण ] ग्राम्ये । ग्रामीणैः पुनरध्वगस्य वसति॰ Sp. 3158 ॥ [करेणु] इभ्याम् । Ku. 3, 37 ॥ [ द्रविण ] बले । उपोढबाहु॰ Ra. 18, 13 । धने । Bh. Ś. 5 ॥ 229 ॥

[शरण] गृहे । प्रविशेदभिशरणमुद्धृते दक्षिणे करे । रक्षितरि । शरणमसि संश्रयो ह्यसि गतिरसि ॥ [ प्रेक्षण ] वधे । प्राणप्रेक्षणकेतनेत्र विजने किं भीरु बम्भ्रम्यसे ॥ [ प्रमाण ]हेतौ ज्ञप्तिनिमित्ते । प्रत्यक्षं चानुमानं च [sic] M. 12, 105 । मर्यादायाम् । राजानं मां च प्रमाणं कृत्वा यद्यस्याकुशलं पश्यसि । प्रमाणव्युत्पादके शास्त्रे । पद॰ Mh. 3, 204 । इयत्तायाम् । कियत्प्रमाणमुदकम् । प्रमातरि । साहित्यमाणिक्यविदः प्रमाणम् ॥ 230 ॥

[ करण ] साधकतमे । सुभगः करणैर्मन्त्रैः । क्षेत्रे । ग्रन्थिपर्णकरणेषु विचेरुः । गात्रे शरीरे । Ku. 4, 5 । इन्द्रिये । Ra. 2, 11 । क्रियाभेदे । स्पष्टं [sic] करणं स्पर्शानाम् c. Ath. Prât. 1, 29 । चेतोहराणि करणानि गणाधिनाथा इत्यादौ नाट्यशास्त्रोक्ते । संवेशनं करणमेत्य विभेदि वस्त्रित्यादौ कन्दर्पशास्त्रोक्ते कार्ये । कायस्थकर्मणि लेख्यादौ । आक्षपटली समस्तकरणपरिवृतः ॥ 231 ॥

[ निर्वाण ] निर्वृतौ । निर्वाणमेति न मनो विषयेषु सक्तम् । शान्तिमोक्षयोः । Ra. 12, 1 । इभमज्जने । निर्वाणमापि सरसीषु गजाधिपेन । शान्ते । Ku. 2, 23 ॥ [ इन्द्राणी ] तथैवमिन्द्राण्यपि पार्श्वयोः स्त्रियाः समास्थितोर्वोः प्रियजानुयोजनादित्यादिलक्षण इन्द्राणी कामशास्त्रोक्तं करणम् ॥ 232 ॥

[ काकिणी ] वराटके श्वेतके । असिधाराक्रयक्रीता वरमेकापि काकिणी । अशीतिः श्वेतिकाः पणः । तस्य चतुर्भागः c. 210 । मानभेदे प्रसृतिमध्ये । दरिद्रः काकिणीं दद्यात् ॥ [ सरणि ] पङ्क्तौ । सरणिः पिपीलकानां निर्याता वर्षसूचनं कुरुते ॥ अपवर्गसिद्धिनगरस्य सरणिरिव ते वधूरत इत्यादौ मार्गे ॥ 233 ॥

[ तर्पण ] सक्तौ । पेयाः स्युर्लाजतर्पणाः । तृप्तिः सौहित्यम् । बृंहणं वातव्याध्युद्देशेन स्निग्धौषधदानम् । पोषणे । कुर्याद्ब्राह्मणतर्पणम् । पित्राद्युद्देशदाने । आन्तिकवासाः स्थलगो न कुर्यात्तर्पणं बुधः ॥ [ पारणा ] व्रतभोजने । Ra. 2, 39 ॥ 234 ॥

[ पारण ] कर्मान्ते । समीहितं संगरपारणेन ॥ [ धर्षण ] द्वयोरपि । अविरतधर्षणरसिकः खल इव वेश्याजनो जगति ॥ [ दक्षिण । दक्षिणा ] अनुकूले श्रद्धादेये च । Śi. 14, 33 । ऋजौ । Ra. 1, 31 । निर्दिश्यमानविषयं ह्यानुकूल्यम् । आर्जवं तु सर्वविषयम् । दक्षिणदिग्भवे । Ku. 8, 25 ॥ 235॥

दिग्भेदे । M. 2, 52 । सव्यहस्ते । धर्मविद्दक्षिणं पाणिं नाधश्शौचे नियोजयेत् ॥ [ अरुण ] सांध्यरागे । Ra. 5, 71 । सूर्यसूते । अरुणसारथिरेष समुद्गतः । दिवाकरे । Sp. 562 ॥ 236 ॥

शोणे । परिरमणम० [sic] R. K. 2, 23 । अव्यक्तरागे अस्फुटलौहित्ये॥ [ लक्षण ] नाम्नि । Ra. 6, 71 । चिह्ने । श्रीलक्षणोत्सङ्गविनीतवेशः ॥ [ श्रवण ] नक्षत्र० Kâd. 11, 13 इत्यादौ नक्षत्रेपि । श्रुतिकर्णयोः । Kâd. I., v. 14; c. Ujjv. Uṇ. IV., 233 ॥ 237 ॥

[ श्रवणा ] श्रावण्याम् । श्रवणायां ददातु ये ॥ [ धिषण । धिषणा ] द्वयेपि । सुविमलधिषणो धिषण इव ॥ [ वरुण ] अप्पतौ । Ra. 9, 6 ॥ [ हरण ] यौतके सुदायादिप्राये आयाते वस्तुनि । सत्त्वानुरूपं हरणीकृतश्रीः c. Ra. 7, 29 v. l. ॥ 238 ॥

[ निर्याण ] निर्गमे । ततो० Mh. 3, 200 ॥ [ कल्याण ] द्वयेपि । त्वया वितीर्णं कल्याणमस्तु देव तदेव ते ॥ [ सुवर्ण ] सुवर्णस्य सुवर्णस्य सुवर्णस्य वरानने । प्रहितं तव रामेण सुवर्णस्याङ्गुलीयकमित्यादौ द्वयेपि तन्माने षोडशमाषके॥ [ ग्रहण ] धने । द्विगुणं ग्रहणम् । सा राहुमूर्तिरिव न ग्रहणं जहातीत्यादौ द्वये वेश्यादिभाटके सोमादिग्रहे च ॥ 239 ॥

स्वीकारे प्रसिद्धः । वन्द्यां हठहृतस्त्रियाम् । ग्रहणीकृतरिपुलक्ष्मीः । आदरे । Ku. 7, 35 ॥ [ कङ्कण ] मण्डलं यागाद्यर्थं नानावर्णो रेखासंनिवेशः । रक्षाकङ्कणबन्धबन्धुररुचिरित्यादौ सूत्रे ऊर्णादिमये रत्नाढ्यकरभूषणे ॥ 240 ॥

[ कारण । कारणा ] घातने यातनायां च । कारणोपहितमानसस्य ते कारणा निरयवह्निषु स्थिता । हेतौ । किं कारणं नु कविराज मृगा यतेते [sic] c. V. A. 11, 6 । करणे साधकतमे । भक्ति० Mh. 3, 188 ॥ [ मार्गण ] बाणे याचके च । Su. 2455 । मार्गणाभिः किमाभिरित्यादौ याचने स्त्रीनपुंसकलिङ्गः ॥ 241 ॥

[ चरण ] वृक्षादिमूले । चरणसेकविवर्धितवृक्षकः ॥ शिष्यद्वयेनेव नूपुरयुगेन वाचालितचरणा H. Ch. 9, 6 इत्यादौ प्राण्यङ्गे पादे बह्वृचादिके शाखाविशेषे चरणशब्दः शाखानिमित्तकः पुरुषेषु रूढः ॥ [ तरुण ] तरुणारुणरागभाजीत्यादौ नूतने । यूनि । R. K. 2, 22 ॥ [ तरणि ] अर्के नावि वा । दारिद्र्योदधितरणिः सरणिर्निःश्रेयसस्य नित्यमसि ॥ 242 ॥

[ ब्राह्मणी ] विप्रश्च विप्रा च तयोर्द्विलिङ्गः ॥ [ प्रवेणी ] द्वयेपि । प्रवेणी मदनस्येव प्रवेणी कुसुमाञ्चिता ॥ [ रोहिणी ] नक्षत्रे । तां रोहिणीं विजानीहि ज्योतिषा मित्रमण्डले [sic] c. V. K. 4, 2, 7, C. । गवि । रोहिणीविपुलापीनस्रुतिसिक्तोटजाङ्गने ॥ 243 ॥

[ दुर्वर्ण ] द्वयोः । N. Ch. 1, 14; Su. 168 ॥ [ भरण ] वेतनं जीविकाभरणं भृतिः पूरणम् ॥ [ विषाण ] पशुशृङ्गे । Ra. 9, 62 । इभदन्ते । Śi. 4, 63 ॥ 244 ॥

[ प्रवण ] क्रमनिम्नोर्व्याम् । प्रागुदक्प्रवणा भूमिः श्लक्ष्णा यागे प्रशस्यते । प्रह्वे । शंभोर्भक्तिप्रवणमुकुटा । अनयोस्त्रिषु । चतुष्पथे । प्रवणे चरन्ति भूताः ॥ [ संकीर्ण ] निचितं व्याप्तम् । अशुद्धे । संकीर्णे चरति काकपदेव काकवर्गः ॥ [ इरिण ] द्वयेपि । संसारे° Mh. 3, 182 ॥ 245 ॥

[ रोहण ] रोपणे । कामास्त्रव्रणरोहणं मृगदृशो बिम्बाधरस्यामृतम् । रूढौ । स्नेहरोहणमसत्सु दुर्लभम् । रत्नसंभवहेतौ पर्वतविशेषे । साहित्यसिन्धुशिशिरांशुरशेषशास्त्रसेवावदातमणिसंचयरोहणाद्रिः ॥ [ धारणा योगिकर्मणि । पञ्च चञ्चलगतीन्समीरणान्धारणाभिरभितो निरुद्धवान् । साम्ये । ] धारणायां स्थितो लोकः ॥ बुद्धिरद्भुतशतस्य धारणीत्यादौ धारके त्रिषु ॥ 246 ॥

[ वारण ] वृत्तिघाते । विषयाकृष्टमनसः शक्यते वारणं कथम् । वारके गजे च । Sp. 227 ॥ [ चारण ] देवभेदे । सिद्धचारणगणैरधिष्ठिते । विटे । चारणगणैरारब्धहास्याकुले ॥ 247 ॥

[ सारणा ] स्वरसंस्थाने । रचयति परिपाकं सारणा गीतमार्गे ॥ [ सारणी] अल्पसरिति । सारणी ग्रन्थिपर्णम् ॥ [ करुण ] दीने विच्छाये । स्थिराल्पतारां करुणेन्दुमण्डलाम् c. Ra. 3, 2, v. l. ॥ 248 ॥

[ समीरण ] वायौ । Ku. 3, 21 ॥ [ आरोहण ] सोपाने । आरोहणेषु॰ Mh. 4, 75 । उद्गमे । Ku. 1, 39 ॥ [ आस्तरण ] द्वयेपि । आस्तीर्णबाला-स्तरणेषु धन्याः ॥ 249 ॥

[ विलक्षण ] व्यर्थसंस्थायां निरर्थके चेष्टिते । दृष्टिर्विलक्षणतया तव शून्य-भावमाख्याति । विश्लिष्टे । सदसि तत्र बभूव विलक्षणा । अन्यस्मिन् तस्मा-द्व्यतिरिक्ते । मूर्खोपि साधुसंपर्कात्पणितान्न विलक्षणः ॥ 250 ॥

[ विहरण ] व्यादाने विकासे । Pâ. 1, 3, 20 । प्रापणे देशाद्देशान्तरनय-ने । अग्नेर्विहरणं कृत्वा । क्रीडने । वनविहरणलग्नप्रीतयस्ते मुनीन्द्राः ॥[संसरण] प्राण्युत्पादे पुनर्भवे । तस्मिन्संसरणे विवेकविषदो यातो गतिं सज्जनः । असंबा-धचमूगतौ असंकटे सेनागमे । एत॰ Mh. 4, 91 ॥ 251 ॥

घण्टापथे राजमार्गे । यान्ति द्रुतं संसरणेषु योधाः ॥ [ समुद्धरण ] वान्ता-न्ने भुक्तोज्झिते । अस्मत्समुद्धरणलब्धधृतेस्तवैष गर्वः कथं वद सखे ननु निस्त्र-पोसि । उन्नये उत्क्षेपे । देवः समुद्धरणधीरमतिः परेषाम् c. V. A. 44, 21 । एतच्च उद्धरणापेक्षया चतुरक्षरमध्ये क्षिप्तम् । यद्वृत्तिर्यस्योद्धरणमिति लोकप्रसिद्धि-रिति पञ्चाक्षरमध्येपि द्रष्टव्यम् ॥ [आवरण] वस्त्रे आच्छादने च । Ra. 13, 8 v. l. । अजीर्णे अर्गले च । गुर्वावरणनिबिद्धा न रुचिर्भक्तेपि नारीणाम् ॥ 252 ॥

[ प्रकरण ] प्रस्तावे । प्रकरणकथितं वाक्यं भवति हि निष्पत्तये पुंसाम् । कीर्णे प्रक्षेपे । पुष्पप्रकरणरुचिरे ॥ [ निरूपण ] दृष्टौ चर्चायां विचारे च । उपरागस्य निरूपणं न कार्यम् ॥ [ विदारण ] लज्जायां भेदे च । हृदयविदारण-कृदभूत् ॥ 253 ॥

[ परायण ] आश्रये । Ku. 4, 1 । अभीक्ष्णे भर्त्सने चान्वेष्यम् ॥ [ पारायण ] समासङ्गे समाश्लेषे । M. Ch. I, 14 । कार्त्स्न्ये । धातुपाराय-णादिषु c. Kâś. I., v. 1 ॥ 254 ॥

[ प्रविदारण ] द्वयेपि । बिभ्यति प्रविदारणात् ॥ [ परिभाषण ] सनिन्दो-पालम्भे । बाला अपि प्रवर्तन्ते कृतेपि परिभाषणे । अनियमेन उक्तौ यो नियमस्त-त्परिभाषणम् ॥ 255 ॥

[ अधिरोहिणी ] निःश्रेण्याम् । स्वर्गाधिरोहिणीमेतां चक्रे क्रतुपरंपराम् । अभिनिवेशे । नो दृष्टाय न दृष्टाय स्यादवस्त्वधिरोहिणी ॥ [ अधिरोहण ] ऊर्ध्वगतौ । शैलाधिरोहणं कार्यम् ॥ 256 ॥

[ अपवारण ] छदिः पटलम् । प्रवृत्तिघात इन्द्रियादीनाम् c. Kâś. Pâ. 1, 4, 27 । अन्तर्धिराच्छादनम् ॥ [उदाहरण] अभिधाने । Ku. 6, 65 । निदर्शने । Śi. 2, 33 ॥ 257 ॥

[ सत् ] सत्ये । यदेवार्थक्रियाकारि तदेव परमात्मसत् । अभ्यर्हिते । Ku. 1, 12 । साधौ । असन्तो नाभ्यर्च्याः c. Su. 280 । विद्यमानप्रशस्तयोः । Su. 3161 ॥ [ सती ] दक्षपुत्र्याम् । Ku. 1, 21 ॥ [ भृति ] भरणे । कुक्षेर्याबदमी भवन्ति भृतये c. Sp. 7337 । वेतने । भृतिग्रहणमेवैषां फलं मुख्यम् ॥ 258 ॥

[ धूर्त ] सर्वत्र । धूर्तप्रियस्य किमसाध्यमिहेश्वरस्य ( c. Pa. 1058 ) ॥ [ खात ] वाप्यां रोपिते च । सङ्कुलैः खाततटेषु खातैः । विदारिते । खाते पुष्पशरेण तस्य हृदये शान्तः प्रविष्टः सुखम् ॥ 259 ॥

[ सेतु ] सीमनि मर्यादायाम् । Ra. 16, 2 । तरणोपाये । समुत्तरणसेतवे ॥ [ लता ] प्रियङ्गुर्गन्धप्रियाङ्गुरिति प्रसिद्धौ । वीरुत्समया लता ॥ 260 ॥

सरिकायाम् । चतुःषष्टिलतो हारः । आदिग्रहणादाभरणान्तराणाम् । वृक्षसूक्ष्मावयवे । Ra. 2, 8 ॥ [ प्राप्त ] प्रसक्ते । प्राप्तमितो गमनं वा । आसादिते । Pa. 3668 ॥ [ आप्त ] संप्राप्ते । Su. 3264 । बान्धवे । आप्तैः सुहृद्भिरपि संप्रथितप्रभावैः ॥ 261 ॥

अविसंवादके । Ra. 3, 12 ॥ [ पतत् ] पक्षिणि । Ra. 13, 19 । गच्छति । Ku. 8, 21 v. l. । अधो लुठति । Śi. 1, 12 ॥ [ यन्तृ ] हस्तिपके । Śi. 5, 47 । सूते । M. St. 18 ॥ [ भर्तृ ] पत्यौ स्वामिनि । Ku. 3, 22 । वरे । Ku. 7, 83 । तत्रोपासितलोकभर्तरीत्यादौ धारकेऽपि ॥ 262 ॥

[ प्रेत ] सत्त्वान्तरे । M. M. 174, 1 । मृते । Ra. 11, 16 ॥ [मुक्ति] निर्वाणे । S. P. 19 ॥ 263 ॥

[ त्रेता ] युगविशेषे । त्रेतायां ज्ञानमुत्तमम् c. M. 1, 86 ॥ [ लिप्त ]

अञ्चिते दिग्धे । K. Pr. 98, 3 ॥ [ केतु ] ग्रहभेदे । एकोत्तरं केतुशतम् । ध्वजे । Śi. 5, 13 ॥ [ सुत ] पार्थिवे । असौ सुतः पालनबद्धकीर्तिः । तनये। Śi. 1, 13 ॥ **264** ॥

[ क्षत्तृ ] सारथौ । क्षत्तारं पुरुहूतस्य । द्वाःस्थे । अनेकक्षत्तृसंकुलम् ॥ [ धातु ] श्लेष्मादौ । धातवोस्य स्थिरा बुद्धिः । अस्थिरक्तादौ । Sp. 4180 । महाभूतेषु । षडुक्तालोकनालोका धातवो विश्वधारणात् । तद्गुणाः शब्दादयः ॥ **265** ॥

इन्द्रियेषु । धातुपाटवमपेक्ष्य तिष्ठते । अश्मविकारे मनःशिलादौ । Ku. 1,7। शब्दयोनौ । Ra. 12, 58 ॥ [ शक्ति ] कास्वामायुधभेदे । H. Ch. 4, 6। सामर्थ्ये । Bh. Ś. 41 ॥ [ मूर्ति ] काठिन्ये । अद्रवं मूर्तिमत्स्वाङ्गम् Kâś. Pâ. 4, 1, 54 । काये । U. R. 9, 4; M. M. 307, 2 ॥ **266** ॥

[ अर्ति ] पीडायाम् । शिरोर्त्यर्जीर्णज्वररोगशान्तये । धनुष्कोट्याम् । संग्रामे° Mh. 2, 156 ॥ [ साति ] दाने । यज्ञे धेनुसहस्रसातिरभसात्संपूर्णकीर्तिर्भुवि । अवसाने । संसारसातिकरुणप्रवणस्य शंभोः ॥ [ प्राप्ति ] उदये उत्साहे । प्राप्तिः कस्य न साधुसंगमवशाच्छीघ्रं भवे जन्मिनः । अधिगमे आसादने । Nâg. 12 ॥ [ ईति ] डिम्बे उपप्लवे । Ra. 1, 63 । प्रवासे । ईतिवर्धितवियोगपीडया ॥ **267** ॥

[ हेति ] रवेरर्चिषि वह्निज्वालायां च । उदिते सहस्रहेतौ वह्नेर्हेतिर्न दृश्यते क्वापि । शस्त्र आयुधे । Śi. 9, 15 ॥ [ धूत ] त्यक्ते । धूतः पापः समीरैः । कम्पिते । Ku. 8, 25 ॥ [ भूति ] सुधायां मक्कोले । Me. 19 ॥ **268** ॥

[ श्रुति ] श्रवसि कर्णे । श्रुतिसुखं गायन्ति गुञ्जद्भिरः । वेदे । Ra. 2, 2 । स्वरांशे ग्रन्थके । Śi. 11, 1 । श्रवण आकर्णने । श्रुतौ बद्धरतिः ॥ [ श्रुत ] शास्त्रे । एष श्रुते परिचितः । अवधृते । Bhag. 2, 52 ॥ [ कृत ] युगभेदे । M. 1, 86 । पर्याप्ते । Bh. Ś. 9 ॥ **269** ॥

[ वार्त्त ] निःसारे । वार्त्तमेतदुदितं वृथा त्वया । आरोग्ये । Ra. 5, 13 । अनयोः क्लीबे । नीरुजि । वार्त्ताः किं किं न भुञ्जते । अनुद्वेगो वार्त्तलक्षणानामिति चाप्याख्यायः [?] । वार्त्ता शरदि केरय [sic] इत्यादौ वृत्तिमति जीवि-

कायुक्ते । वार्त्ताकेपि भवेद्वार्त्ता इति शाश्वतोक्त्या वार्त्ताके c. Śāśv. 748 । वर्तने । जीवने तस्य वार्त्ता का वार्त्ताका यस्य भोजने । त्रिंशद्यस्य न वार्त्ताका वार्त्ता का तस्य भोजने ॥ उदन्ते वृत्तान्ते । भूतानि कालः पचतीति वार्त्ता c. Sp. 1688 । पाशुपाल्यादिके । Ra. 16, 2 । विचार्या नृपवारात् ॥ 270 ॥

[ वृत्त ] नैरध्ययने वृत्तमिति वचनादध्ययने c. Pâ. 7, 2, 26 । वृत्तं श्लोक इति यथा । बहुवृत्तान्तगामिनीत्यादौ पद्ये c. H. Ch. 4, 1 । चरित्रे । Sp. 6250 । वर्तने । ऋतेन वृत्तं प्रवदन्ति मोक्षम् । वृत्तमुञ्छशिलम् [ sic; c. Mh. 2, 194 ] । मृते । वृत्तास्ते क्षितिपाः प्रतापनिधयः । प्राणिविषयं मृतम् । अप्राणिविषयं त्वतीतं यथा । वृत्तोत्सवं तत्पुरमित्यादौ । अल्पाशये । Bh. Ś. 71; Su. 968 । निस्तलेपि । सद्वृत्ते महति स्वभावसरले बद्धोपि यस्मिन्गुणैः । दृढे । वृत्तदेहः स्नायुसारः ॥ 271 ॥

[ कान्ता ] योषिति । Sp. 1626 ॥ [ कान्त ] प्रिये । Me. 1 । मनोज्ञे । M. M. 44, 1 v. l. ॥ [ जाति ] छन्दसि वैतालीयादौ । सामान्ये । जातिः समाप्ता प्रत्येकम् । मालत्याम् । Pa. 818 । गोत्रे । कठजातिरियं न शक्यते सुकुमारैर्वचनैरुपासितुम् । जन्मनि । ततस्तद्विपाकजात्यायुर्भोगाः ॥ 272 ॥

काव्यालंकारभेदे स्वभावे च । H. Ch. 5, 4 ॥ [ पत्ति ] गतौ । पत्तिः स्वर्गगृहे भवेत्सुकृतिनः कस्यापि । पदगे । Ra. 7, 34 ॥ 273 ॥

[ रीति ] प्रचारः । व्यवहारः कुलाचार इति यावत् । प्रचारः शैली इति स्वामी । स्यन्दः स्रवणम् । रीङ् द्रवणे दिवादौ अनेकार्थतया प्रचारे वर्तते इति रीतिः ॥ रम्यरीति° Stutik. I, 3 इत्यादौ वैदर्भ्यादौ । वैदर्भी रीतिः । मुख्या प्रणयिनी । पक्षे प्रचारः । व्यवहारः । मर्यादा शैली च ॥ 274 ॥

[ श्वेत ] राजभेदे । श्वेताभयार्पणविधिप्रथितप्रभावः c. Stutik. II, 21. III, 19 ॥ 275 ॥

[ पङ्क्ति ] छन्दोविशेषो दशाक्षरः । दशसंख्यायाम् । Ra. 9, 74 । आवलौ । पङ्क्तौ विशन्तु गणिताः c. Bh. Ś. 11 ॥ [ क्षिति ] त्रिषु । यत्प्रतापयशसोः क्षितिः क्षितौ वैरिणस्तव समाः किमन्तरम् ॥ [ द्युति ] कान्तिः सौन्दर्यम् । प्रभा प्रसारिणी दीप्तिः ॥ 276 ॥

जन्मनि । तस्य पुत्रस्य जातिभूत् । प्रकारे । Ra. 5, 1 । संपन्ने । जाते देहप्रत्ययद्वीपभङ्गे । पुत्रे । जात° Mh. 2, 166 ॥ **290** ॥

[ व्यक्त ] बुधे पण्डिते । व्यक्ताः किल्विषमोषपेशलतया यान्ति प्रथां सर्वतः ॥ [ शिति ] शारे शबले । रोमन्थ° Mh. 2, 198 । असिते । शितिकण्ठः कालगलः ॥ [ यति ] विरामे । गोपुच्छप्रमुखाः क्रमेण यतयस्तिस्रोपि संपादिताः । व्रतिनि । मुदा विकासं यतिमभ्युपेयुषी c. Śi. 1, 24 ॥ [ ऊति ] स्यूतौ रक्षणे च । कन्थो° Mh. 2, 157 ॥ **291** ॥

[ स्थित ] ऊर्ध्वे । Ra. 2, 6 । वर्तमानेपि । Ku. 1, 1 । प्रतिष्ठाव्रति । अत्र° Mh. 2, 204 ॥ [ रक्त ] कुङ्कुमे । हेमन्ते घनरक्तपङ्कमलनक्रीडाजुषो योषितः । क्षतजे सरागे च । V. S. 7 । अरुणे । रक्तासक्तैरिवौघैः c. Sû. 1 । अनयोर्द्वयोस्त्रिषु ॥ **292** ॥

[ मत्त ] मदकले करिणि । Bh. Ś. 66; Bhoj. 53, 12 । मदाव्यक्तवाचि । Śi. 11, 39 ॥ [ गति ] अवस्थायाम् । इमां गतिमनुप्राप्ताः । यात्रायाम् । Pr. P. 28; Pa. 3282 । अधीनतायामस्वायत्ततायाम् । सर्वेषां पार्थिवो गतिः । उपाये । शरणमसि संश्रयो ह्यसि गतिरसि नाथोसि सर्वभूतानाम् । वर्त्मनि । Ra. 1, 4 ॥ **293** ॥

[ शुक्त ] परुषे । यत्सत्यं पुनरुक्तशुक्तविरसः सर्गक्रमो वेधसः c. Pa. 3373; V. A. 38, 9; 59, 8 ॥ [ ऋतु ] ग्रीष्मादौ । Ku. 2, 36 । स्त्रीरजसि । इमां देवीमृतुस्नाताम् Ra. 1, 76 v. l. ॥ [ अन्त ] विनाशे । Bhag. 2, 18 । अन्तिके । आ उदकान्तात्प्रियं प्रोषितमनुव्रजेत् c. Śâ. 54, 21; Bhâshya Pâ. 1, 4, 56 । स्वरूपे गाधे [?] । नान्तोस्य ज्ञायते कैश्चित् । अंशे एकदेशे । Sp. 5714 । अवसाने । Sp. 6948 ॥ **294** ॥

[ मातृ ] गवि शाश्वतोक्त्या । ओमिति [?] पदद्वयं विवक्षितार्थप्रतीतिकृतम् । जनन्याम् । Sp. 2761 । रेवत्याद्यासु देवीषु । Ku. 7, 38 । क्वचिदेता ब्राह्म्यादिशब्देनोक्ताः । बहुत्ववर्तमाना स्त्रीव स्त्री तस्यां बहुस्त्रियाम् । मातर इत्यादौ ॥ [ स्थिति ] द्वयेपि । Ku. 1, 18 ॥ [ भास्वत् ] द्वयेपि । H. Ch. 9, 10 ॥ **295** ॥

[ अर्हत् ] द्वयेपि । अर्हते श्रुतवतां सदार्हते ॥ [ हरित् ] सूर्याश्वेषु । Ku. 2, 43 । नीले दिशि च । रीतिव्याप्तहरित् ॥ 296 ॥

[ महत् ] राज्ये । महति कृतपदस्त्वमेव नित्यम् । सांख्योक्तबुद्धौ । Sâ. Kâ. 3 । बृहति । H. Ch. 131, 2 ॥ [ जगती ] छन्दोभेदे द्वादशाक्षरपादे भुवि च । विकासमीयुर्जगतीशमार्गणाः ॥ [ जगत् ] जङ्गमे । जयति [sic] जगतां गुरोः K. K. S. 1, 2 v. l. ॥ 297 ॥

[ समित् ] द्वयेपि । समिति तस्य पुरः पततीह कः ॥ [ पित्सत् ] पातेच्छौ पक्षिणि वा । पित्सन्तः किलकिञ्चितेन हृदयं द्रक्ष्यन्त्यमी बालकाः ॥ [ पृषत् ] बिन्दौ । पाथःपथे ननु पृषन्त्यपि दूषितानि । हरिणे । रुरुपृषद्गणसंकुलसंचरे । अनयोः पृषतशब्दः अकारान्तः पुंलिङ्गः ॥ 298 ॥

[ सीता ] हल्यायां भुवि । Ku. 5, 61 । जानक्याम् । K. K. S. 1, 58 ॥ [ एत ] द्वयोरपि । ईदृग्वर्णा एताः कृतवत्यः किं तथोक्तमत्रैव ॥ [ धातृ ] ब्रह्मणि । Ra. 10, 43 । धर्तरि । M. M. 40, 1 ॥ [ अस्त ] पश्चिमाचले । Bâ. III, 10 । नास्तमेति भवितव्यता क्वचिदित्यादौ नाशार्थे अस्तंशब्दो मकारान्तोव्ययः ॥ 299 ॥

[ शीत ] गुणे क्लीबम् । Bhag. 2, 14 । तद्वति शीतलगुणवति त्रिषु । Sp. 6410 ॥ [ यातृ ] भ्रातृजायायां गतिशीले च पुंसि । प्रथमाद्विवचनबहुवचनद्वितीयाविभक्तिवर्जं सर्वत्र सारूप्यम् । यातृशब्दो भ्रातृजायायां साहचर्यात्स्त्रीलिङ्गः । गतिशीले पुंसि । Sp. 668 ॥ 300 ॥

[ शुक्ति ] मुक्तास्फोटहयावर्तयोः । Śi. 5, 4 । मानभेदे अर्धपले । द्रव्यशुक्ति जलप्रस्थे ॥ [ पूत ] पवित्रे । Ku. 1, 28 । निःशूकमपासितबुसकिंशारु सस्यादिकम् ॥ [ धृत ] धारिते । धृतायुधो यावदहं तावदन्यैः किमायुधैः । सुस्थिते । H. Ch. 226, 3; Su. 2269 ॥ 301 ॥

[ शान्ति ] शमे । तस्य युक्तैव शान्तिः । निर्वृतौ । Ku. 4, 17 । कुशलकर्मणि । आरब्धव्यं यथाशक्ति शान्तिस्वस्त्ययनादिकम् ॥ [ क्रान्त ] संक्रान्ते । Śi. 10, 3 । आक्रान्ते । Sû 7 ॥ [ मरुत् ] पवने । Ra. 2, 10 । भ्रमरे । Ku. 3, 72 ॥ 302 ॥

[ विवस्वत् ] सूर्ये । Ku. 1, 16 । देवेन्वेष्यम् ॥ [ सरस्वत् ] द्वयेपि । सरस्वांस्तव गाम्भीर्ये न समः ॥ [गरुत्मत् ] तार्क्ष्ये । Ra. 3, 57 ॥ [शकुन्त] भासः पक्षिविशेष एव । द्वयेपि पक्षिणि । पयोधिमध्यस्थितपोतकूपकास्थिता शकुन्तीव मुहुः प्रकम्पिता ॥ 303 ॥

[ स्थपति ] कञ्चुकितक्ष्णोः । स्थपतिनियतकक्ष्ये कौ विशेद्राजमार्गे । बृहस्पतिसवो यज्ञविशेषो वाजपेययज्ञादनन्तरं क्रियते तेन य इष्टवान्स स्थपतिः ॥ [ हृषित ] जातहर्षे । हृषितः प्रियदर्शनेन मन्ये । प्रतिहते । शीतेन हृषिता दन्ताः । रोमाञ्चविषये । Śi. 7, 16 ॥ 304 ॥

विस्मिते । दृष्ट्वा रूपं हृषित इव स प्रेयसीनां तदानीम् ॥ [ अमृत ] मोक्षे । Bhag. 2, 15 । वारिणि । ववर्षामृतसारौघाम् । अयाचिते । M. 4, 4 । यज्ञशेषे । नित्यं चामृतभोजनः M. 3, 285 । हुतशिष्टमथामृतमिति स्मरणात् । देवान्ने । Śi. 2, 107 । सुधायाम् । Sp. 532 ॥ 305 ॥

[ अमृता ] परस्यां वाचि । वन्दामहे च तां वाचममृतामात्मनः कलाम् c. U. R. I, 1; Mh. 2, 466 । अर्करश्मिभेदे । Ra. 10, 58 । धर्ममेघाख्यः समाधिरमृताशब्दवाच्यः ॥ 306 ॥

[ अनन्ता ] दूर्वा शादः । भूमौ । सप्त° Mh. 3, 231 ॥ [ अनन्त ] अम्बरे । अनन्तमारोहति तेजसा रविः । विष्णौ । लक्ष्मीरनन्तस्य निबद्धभात्रा । अनाशे अनवधौ च । अनन्तो जगदन्तगः ॥ 307 ॥

[ सूनृत ] त्रयेपि । Ra. 1, 93 ॥ [कृतान्त] यमे । या कुपितकृतान्तमुखत्रस्तानाम् । सिद्धान्ते । कृतान्तमाप्नोति न निर्विवेकः । दैवे । Me. 102 । अकुशलकर्मणि क्रूराचारे । मया कृतान्तेन न सा परीक्षिता ॥ 308 ॥

[ वृत्तान्त ] प्रकरणे । वृत्तान्ता° Mh. 3, 294 । प्रकारकात्स्न्र्ययोरन्वेष्यम् । वार्त्तायाम् । Su. 2544 ॥ [निवात] आश्रये । एते निवातास्तरवो मुनीनाम् । अवाते वाताभावे । Ku. 3, 48 । शस्त्राभेद्ये वर्मणि । निवातकवच° Mh. 3, 261 ॥ 309 ॥

[ उच्छ्रित ] जाते । उच्छ्रिताङ्कुरविराजितान्तराः । उन्नद्धे ऊर्ध्वप्रसृते । अत्युच्छ्रितेषु गिरितटकूटेषु वायोः । प्रवृद्धे । उच्छ्रितविभवो भवोपशान्तिः ॥ [उत्थित]

त्रयेपि । नवोत्थिताभ्यां कुचकुड्मलाभ्याम् ॥ [ आदृत ] सादरे । पृच्छति स्म तमथेदमादृतः । अर्चिते । अत्यादृतः स तरसा रससारवद्भिः ॥ 310 ॥

[ विविक्त ] द्वयेपि । Śi. 3, 53 ॥ [ मूर्छित ] द्वयेपि । Dhv. 113, 11 ॥ [ प्रतीत ] प्रख्याते ज्ञाते वा । Ra. 13, 53 । हृष्टे । अतिप्रतीतेन तदा स चेतसा ॥ 311 ॥

[संस्कृत] कृत्रिमे । स्वप्नं च विद्युदभ्रं च पश्येद्देवं च संस्कृतम् । लक्षणोपेते । संस्कृतं प्राकृतं द्विधा ॥ [ पिण्डित ] गुणिते । षष्टांशेन तु पिण्डितम् । घने । M. Ch. I, 54 ॥ [ वनिता ] जनितात्यर्थानुरागायां स्त्रियाम् । Ku. 1, 10 । अङ्गनामात्रे । वनितासु वीचिचलचित्तवृत्तिषु ॥ 312 ॥

[ पलित ] जरसा शौक्ल्ये । M. 2, 156 । पानीयनिर्गमनमार्गनिवर्तनेन याता ह्रदाः पलितधूसरताममी यदित्यादौ कर्दमोपचारात्पानीयपृष्ठवर्तमाने मलविशेषे ॥ [ उचित ] समञ्जसे । किमिदमुचितं शुद्धं स्पष्टं [?] स्वपक्षसमुन्नतेः Bh. Ś. 67; Su. 999 । अभ्यस्ते । Ra. 11, 9 ॥ 313 ॥

[ लोहित ] कुङ्कुमे । गोरोचना° Mh. 3, 281 । अरुणे । Ku. 8, 28 ॥ [ पर्याप्त ] शक्ते । पर्याप्तोपि स योद्धुमुद्धतमतिर्धत्ते न यान्नीचताम् । निवारिते । पर्याप्तोयं न्यायः प्रायेण । पूर्णे । पर्याप्तपुष्पस्तवकस्तनीभ्यः Ku. 3, 39 । ईप्सिते । पर्याप्तमेतद्विदुषां सदैव ॥ 314 ॥

[ आनर्त ] समरे नृत्तस्थाने च । आनर्त° Mh. 3, 236 । नीवृज्जनपदो देश इत्यर्थान्तरम् ॥ [ आहत ] मिथ्योक्तौ । धिग्धिक्तमाहतमिदं वचनं वञ्चनापटोः । ताडिते । Śi. 2, 46 ॥ 315 ॥

[ आचित ] व्याप्ते । Ra. 7, 10 । अयुतद्वयं विंशतिसाहस्री ॥ [ दुर्जात ] व्यसने । Ra. 13, 72 । असम्यग्जातवस्तुनि । दुर्जाता° Mh. 3, 258 ॥ 316 ॥

[ अव्यक्त ] परमात्मनि । अव्यक्तादण्डमभूत् ॥ [ प्रणीत ] विहिते । Ku. 6, 31 । संस्कृतेग्नौ । प्रणीते जुहुयाद्धव्यम् । प्रवेशिते । प्रधानवर्गस्य पुरः प्रणीतः ॥ 317 ॥

[ निकृत ] इयेपि । निकृतोपि न याति विक्रियाम् ॥ [ उद्धृत ] भुक्तोज्झिते । क्षिपेदप्सूद्धृतं ततः । तोलिते उत्क्षिप्ते । Su. 54 ॥ [ सुकृत ] इयेपि। महता सुकृतेनेव प्राप्तोस्यतिचिरान्मया ॥ **318** ॥

[ आयस्त ] लेशिते अंशेन वीक्षिते । सव्रीडमायस्तकटाक्षपातैः । उत्क्षिप्ते निपुणे। Śi. 5, 6 । कोपिते । आयस्तशत्रुनिवहाहननप्रवृत्तः । तेजिते । आयस्तासिलतोल्लसद्रिपुकुले कालायमाने c. Mh. 3, 238 ॥ [ निरस्त ] अधिक्षिप्ते। Ra. 5, 71 । त्यक्ते । Ki. 1, 28 । त्वरितोदिते । एते निरस्तवचनाः सूचयन्त्यार्तिमान्तरीम् ॥ **319** ॥

[विश्वस्त] इयेपि। Śi. 16, 14 ॥ [प्रकृति] लिङ्गे प्रधाने । Ku. 2, 13। स्वभावे । Ra. 8, 86 । धात्वादौ । प्रकृतय इव दुर्ग्रहा गणिकाः । अमात्यादिषु। Ra. 12, 12 । योनौ । प्रकृतिगुणाः स्थविरकृतिः ॥ **320** ॥

[समिति] त्रयेपि। Śi. 16, 13 ॥ [निर्वृति] इयेपि । निर्वृतिः सुहृदि शत्रुजने च ॥ [निकृति] शठे। वर्जय निकृतीः खलानेतान् । शाठ्ये । Ki. 1, 45 ॥ **321** ॥

[दुर्गति] इयेपि । त्वत्पादपङ्केरुहधूलिलिप्तो न दुर्गतिं याति जनः कदाचित् ॥ [पद्धति] पङ्क्तौ । पदपद्धतिमायातामपश्यत् ॥ [आकृति] काये । भव्येयमाकृतिर्भाविमौलिमाला विलोक्यते । रूपे । Sp. 5076; c. Mall. Ki. 6, 1॥ [प्रसूति] जन्मनि । प्रसूतिं भज कल्याणि मर्त्यलोकेतिदारुणे । पुत्रे । Ra. 1, 77। कारणेपि । Ra. 2, 63 ॥ **322** ॥

[ वसति ] स्थितौ । Ku. 6, 37 । रात्रौ । Ra. 7, 30 ॥ [ रेवती ] लाङ्गलिदारेषु । Pr. P. 52। मातरो ब्राह्म्याद्याः ॥ **323** ॥

[ स्तिमित ] इयेपि । M. M. 49, 3 ॥ [ निशान्त ] गेहे । Śi. 1, 61। शान्ते। निशान्तचित्ते मुनिपुंगवेपि ॥ [अनृत] इयेपि। अनृते वर्ततेधमः ॥ **324** ॥

[ अर्दित ] इयेपि । अर्दितो वितरति क्षणाद्रसम् । नार्दितं नवनीतवदित्यादौ शिरोरोगेपि पीडितोपचारात् ॥ [ द्विजाति ] इयेपि । द्विजातीनां° Mh. 3, 258। पुष्पेषुराजवचनेन मतं द्विजानामित्यादौ विप्रदन्तयोः [ sic ] ॥ [जीवातु] जात्वात्मौषधे । जीवातुरग्र्यं मथितं ग्रहण्याम् । जीवे । U. R. 31, 5 ॥ **325** ॥

[ जीमूत ] मेघे । Me. 4 । पर्वते । धन्यास्ते° Mh. 3, 254 ॥ [ उत्तप्त ] देवताडद्रुर्वृक्षविशेषः । शुष्कमांसे । उत्तप्ते क्रमयो यथा । वितापिते । उत्तप्तहाटकाचितानि तटानि मेरोः ॥ 326 ॥

[ व्रतति ] विस्तारे । वात्यासंवेगविश्वग्व्रततिवलयितस्फीतधूपाधिवासा c. M. M. 162, 7 । वल्ल्याम् । Śi. 1, 5 ॥ [कलित] विदिते । अकलितदैवनियोगाः । आत्ते । शशिकलाकलितावतंसः c. Mh. 3, 247 ॥ 327 ॥

संख्याते । M. M. 96, 1 । तुलिते । करकलितहराद्रे° Bâ. I, 37; c. Bâ. I, 47 । क्षिप्ते । संग्रामे कलितोप्यमित्रनिवहस्तुष्टावकीर्तिं तव । शब्दिते । कलितकीर्तिषु शत्रुमुखेषु ते ॥ 328 ॥

[ गर्जित ] मत्तकुञ्जरे भारतादौ प्रसिद्धः ॥ [ प्रार्थित ] अभियुक्ते आक्षिप्ते । Ra. 9, 56 । सान्त्विते । प्रार्थितापि न विमुञ्चति मानम् ॥ 329 ॥

[ वितत ] प्रस्तुते । Ku. 2, 46 । व्याप्ते । विततमतिसिताभिर्व्योम सोमप्रभाभिः । विस्तृते व्यात्ते । श्रमविततमुखभ्रंशिभिः कीर्णवर्त्मा c. Śâ. 7 ॥ [ संतति ] परंपरायाम् । अभूमिर्मादृशदृशामियमाश्चर्यसंततिः । संतत्यर्थं दारा व्याधिप्रशमाय चेति श्लेष इत्यादौ पुत्रे । विस्तारे । पश्यैतां मरुसंततिं कुसुमितां संतोषतान्तिच्छिदम् c. Mh. 3, 301 ॥ 330 ॥

[ संमति ] द्वयेपि । संमतिर्न विमतिर्नियोगिनः ॥ [ रजत ] रूप्ये । M. 3, 202 । हारेन्वेष्यम् । शुक्ले । रजतमराजत वसनम् ॥ 331 ॥

[ कपोत ] पारावते पक्षिभेदे । Śi. 3, 51 । विहगान्तरे एतन्नाम्नैव प्रसिद्धे । Ku. 4, 27 । वर्णे । कपोतपोतकपोताः ॥ [ संवित्ति ] प्रतिपत्तौ । Bh. Ś. 53 । संवित्तिः कान्तायुगेत्यादावविवादितायां व्यवस्थायाम् ॥ 332 ॥

[ पक्षति ] द्वयेपि । गगन० Mh. 3, 268 ॥ [ द्वीपवत् ] नदे अब्धौ च । द्वीपवत्सु विचरन्ति कीर्तयः ॥ 333 ॥

नद्यां प्रसिद्धः । यथा द्वीपवती ॥ [ दृष्टान्त ] उदाहरणे । Śi. 2, 31 । शास्त्रे । अभ्यस्तदृष्टान्तशतस्य तस्य ॥ [आयति] सर्वत्र । कुचद्वंद्वेन तन्वङ्ग्या राजता प्रकटायतिः ॥ 334 ॥

[ विधूत ] कम्पिते । एते विधूततरलायतपक्ष्मवायाः । त्यक्ते । विधूतकल्पनाजालगम्भीरोदारमूर्तये ॥ [ नियति ] दैवे । नियतिः केन विलङ्घ्यते सखि। संयमे ! नियतिं विधाय चित्ते ॥ [ विकृत ] द्वयेपि । विकृततरमिदं निगृह्य चित्तम् ॥ [ आप्लुत ] स्नातमात्रके । Ku. 6, 5 ॥ **335** ॥

गुरुकुलान्निवृत्तः स्नातक उच्यते ॥ [ उद्घात ] आरम्भे । Ra. 4, 20 । स्खलिते । Ra. 2, 72 ॥ [प्रसृत] निकुब्जपाणौ । एतां० Mh. 3, 267 । उद्दाम० H. Ch. 13, 8 इत्यादौ जङ्घायां स्त्रीलिङ्गः । विस्तृते च त्रिलिङ्गः ॥ **336** ॥

[ ककुद्मत् ] दान्ते । Ku. 1, 56 । ककुद्मती तीव्रनखक्षताङ्किता इत्यादौ कटयां स्त्रीलिङ्गः ॥ [ परेत ] दूरगेन्वेष्यः । मृते । परेतभवने तदा चरणमाशु चक्रे जनः ॥ [ दैवत ] दैवतशब्दो देवतायामधिष्ठाने देवेषु च जातिविशेषे वर्तते ॥ [ सरस्वत् ] नदे अर्णवे वा । सर स्त्वतिप्रसादं मे कुरु चित्तसरस्वति D. Ś. 50; K. Pr. 235, 1 ॥ **337** ॥

[ मारजित् ] त्रयेपि । मारजिज्जयति जाह्नवीजले लोलवीचिवलये समादधत् ॥ [ भगवत् ] जिने । अथ खलु भगवान्स लोकधातौ । पूज्ये । K. K. S. 2, 4 ॥ [ उन्मत्त ] धत्तूरे । उन्मत्तकरसास्वादात् । मादिनि । Su. 2544 ॥ **338** ॥

[ निर्ऋति ] सर्वत्र । यः पुण्य० Mh. 3, 263 ॥ [ आवर्त ] रोमभेदे अम्भोभ्रमे च । Śi. 5, 4 । पठने आवर्तो मुखस्थितिर्ग्रन्थस्य । रूपे गणनायाम्। देवा अयुग्मावर्ताः ॥ **339** ॥

[ पुष्पवत्] दिवाकरनिशाकरयोरपि। Śr. Ch. 25, 132 । स्पृशति तिलकहेतोः शोणितं पुष्पवत्या इत्यादौ रजस्वलायाम् माल्यधारिणि पुष्पयुक्ते ॥ **340** ॥

[ विवृत ] कोशनिष्क्रुष्टे । Ra. 12, 40 । व्याकृते व्याख्याते । विवृतोभिनवो मया । प्रकाशिते । विवृतेत्र रहस्ये । विकासिते । Ku. 4, 26 । वर्णधर्मे । स्पृष्टत्वमीषत्स्पृष्टत्वं विवृतत्वं तथैव च । पाठधर्मे । अभ्यासं विवृतं पठेत् । सुशिरे । M. M. 160, 1 ॥ **341** ॥

[विवृति ] एषामेत्रार्थानां भावे धात्वर्थरूपतायां विवृतिशब्दः ॥ [ संवृत] स्थगिते असंपुटिते । अयं पटः संवृत एव शोभते Mṛichchh. 33, 17 । असत्यभूते । असंवृतमिदं वाक्यम् । वर्णगुणे । संवृतत्वं च वर्णानामन्तःकरणमि-

ष्यते । पाठगुणे । संवृते संवृते कुर्वन् । गुप्ते । Ra. 1, 20 । वर्णपाठगुण इत्यस्य विशेषणं विवृतेतर इति ॥ 342 ॥

[संवृति] कठिनहृदये संवृतिरियम् Sp. 1876 इत्यादि पूर्ववत् ॥ [एकान्त] निश्चये । शत्रुः शत्रुर्मित्रं मित्रं भवतीति नायमेकान्तः । रहसि । कान्ते क्रान्तजनान्तिकं तरसि चेदेकान्तमेकान्ततः । गुणे । तस्य त्वेतदेकान्तमेकान्तग्रहणम् । एकदेशे । एकान्तोन्नमितभ्रु विभ्रमभरभ्राम्यद्विलासायुधम् । अव्यभिचारिणि । Ku. 1, 36 ॥ 343 ॥

[प्रत्यन्त] द्वयेपि । प्रत्यन्तेष्वविमूढतामुपगतास्तिष्ठन्ति शिष्टाः कथम् ॥ [जयन्ती] देवी वामस्रोतःप्रसिद्धा ॥ [जयन्त] इन्द्रात्मजे । Ra. 3, 23 ॥ 344 ॥

[भावित] साक्षात्कृते । Ra. 1, 74 । अन्यत्रान्वेष्यम् [c. Mh. 3, 275] ॥ 345 ॥

[आहृत] आनीते । आहृतैर्गुह्यकव्रातैः । भुक्ते । आहृतानि सुरभीणि फलानि ॥ [लुठित] लुठितोत्थितकेशज इत्यादौ परावृत्ते । लुठितश्चेतयते जनोधम इत्यादौ भ्रष्टे पदाच्च्युते च ॥ 346 ॥

[गलित] गलितस्य स नेत्रगोचरादित्यादौ तिरोहिते । — — — — त्यादौ स्रुते । गल अदन इत्यस्य धातोः प्रयोगे भुक्ते । पतिते । Me. 44 ॥ [गलिता] छन्दोविशेषे द्विपदीभेदे ॥ 347 ॥

[निर्मुक्त] त्यक्ते । निर्मुक्तसर्वभावस्य । निर्ग्रन्थिके । निर्मुक्तकवरीभारव्याप्तवक्षःस्थलाथ सा ॥ [वसुमत्] स्फीते । वसुमानसुमद्भिरर्च्यते ॥ [चित्रकृत्] वञ्जुलो वेतसः ॥ 348 ॥

[पर्याप्ति] पूर्णतायाम् । पर्याप्तिर्बहुमानस्य । शक्तौ । पर्याप्तिः कस्य तावती ॥ [विनीत] शिक्षिते हये । वनायुजैर्विनीतैस्तैः ॥ 349 ॥

सप्रश्रये । निन्ये विनीतैरवरोधरक्षैः । निरस्तेन्वेष्यम् ॥ [निवीत] कण्ठालम्बे यज्ञसूत्रके । वैश्यस्य तु निवीतं स्यात् । प्रावृते । निवीतचीनांशुकशुभ्रकान्तिभिः ॥ 350 ॥

[पतित] स्पष्टम् ॥ [अक्षत] यवे । Ra. 2, 21 ॥ 351 ॥

[कलधौत] रूप्यहेम्नोः । कल° Mh. 4, 106 ॥ [पुरस्कृत] अभेकृते । Ra. 2, 20 । अभ्यर्चिते । हरिर्मरुद्भिः स पुरस्कृतः ॥ 352 ॥

[ अवगीत ] दुष्टे । Ki. 2, 7 । गर्हितो निर्वादः । निन्दितो लोकापवादः ॥ [ अभिनीत ] संस्कृते वागादिनाभिनयविषयतां नीते । अभि° Mh. 4, 95 । प्रापिते । Ra. 18, 39 v. l. । अमर्षवत्यन्वेष्यः ॥ 353 ॥

[ प्रतिहत ] प्रतिस्खलिते । Ku. 2, 48 । विद्विष्टे बाधिते । धिग्धिक्छान्तं प्रतिहतमिदं तीव्रमत्याहितं नः c. 356 ॥ [ अभिजात ] सुकुमारे । अभिजातां नवमालिकामिव । कुलीने बुधे वा । अभिजाततमेन तेन सा यदि युज्येत हि दैवयोगतः ॥ 354 ॥

[ अपचिति ] हानौ निष्कृतौ वा । Śi. 16, 9 । अर्चने । केचिदपचितिभाञ्जि म -- व्यमपठन् c. H. Ch. 8, 5 । व्यये । गृहे° Mh. 4, 98 ॥ 355 ॥

[ अत्याहित ] महाभीतौ जीवनिरपेक्षतायां वा । धिग्धिक्छान्तं प्रतिहतमिदं दुष्टम° c. 354 ॥ [ समाहित ] समाधिस्थे । पञ्च चञ्चलगतीन्समीरणान् संनियम्य हृदये समाहितः । दत्तोत्तरे । समाहितो° Mh. 4, 129 ॥ 356 ॥

[ उपाहित ] अनलोत्पाते । उपाहितोद्विग्नभियोतिविक्लवाः । आरोपिते । उष्ट्रो° Mh. 4, 100 ॥ [ उपस्थित ] समाश्रिते । Ra. 2, 39 । अन्यत्रान्वेष्यम् ॥ 357 ॥

[ अवध्वस्त ] स्पष्टम् ॥ [ अवसित ] अवसानं गते । अवसितमन्त्रसाधन° M. M. 160, 5 । ज्ञाते । अवसितमन्त्रो राजा । निश्चिते । M. M. 191, 2 ॥ 358 ॥

[ विजृम्भित ] विकसिते । पुष्पेषुसंततिविजृम्भितपल्लवेषु । चेष्टायाम् । तत्कस्यापि विजृम्भितं भगवतः सन्मन्त्रलीलाजुषः c. Bh. Ś. 96; Su. 1019 । प्रसृते । अत्रान्तरे तत्र विजृम्भितेषु तूर्येषु ॥ [ परिगत ] विज्ञाते । इति परिगतमेतत्स्थानमासाद्य सद्यः । वेष्टिते । कुसुमपरिगतोसौ केशपाशो भवत्याः । प्राप्ते । परिगत° Mh. 4, 119 ॥ 359 ॥

[ अन्तर्गत ] द्वयेपि । हृदयान्तर्गतो मन्युर्नादग्ध्वा विनिवर्तते ॥ [ अवदात ] सिते । कुन्दावदातं यशः । पीते । द्विरदरदनावदातम् । विशुद्धे । सत्यावदाते वचसि त्वदीये ॥ 360 ॥

[ प्रतिक्षिप्त ] निराकृते । प्रतिक्षिप्तो° Mh. 4, 115 । प्रेषिते । पर° Mh. 4, 115 ॥ [ अधिक्षिप्त ] ऊर्ध्वाहिते । अधि° Mh. 4, 98 । भर्त्सिते निन्दिते च । अधिक्षिप्तोपि विकृतिं न याति क्वापि सज्जनः ॥ 361 ॥

[ भोगवती ] द्वयेपि । भोगवत्यपि वसुंधरां श्रिता ॥ [ ऐरावत ] ऋज्वायते शतक्रतुचापे । Ra. 1, 36 । गजे । ऐरावते° Su. 2493 ॥ 362 ॥

[ निराकृति ] अस्वाध्याये । ब्रह्मबन्धो मुनिखेटे निराकृतिः [ sic ] c. H. Ch. 12, 1 । प्रत्यादेशे । एतन्माननिराकृतौ कुलिशतां यातं विधोर्मण्डलम् ॥ [ प्रतिकृति ] प्रतिमायां प्रतिबिम्बे । रम्यां रघुप्रतिकृतिः स° c. Ra. 5, 63 । प्रतीकारे । वैरप्रतिकृतौ दक्षः ॥ 363 ॥

[ अभिशस्ति ] त्रयेपि । Mh. 4, 99 ॥ [ दिवाकीर्ति ] द्वयेपि । Mh. 4, 110 ॥ 364 ॥

[ प्रतिपत्ति ] प्रागल्भ्ये । Ra. 1, 1 । गौरवे । Ra. 8, 64 । आरम्भे प्राप्तौ बोधे वा । अर्थानर्थौ विचिन्त्याः स्युः कार्याणां प्रतिपत्तयः ॥ [ धूमकेतु ] उत्पाते । Ku. 2, 32 ॥ [ हैमवती ] वचाकाञ्चनीहरीतक्य ओषधिभेदाः । गङ्गागौर्योः । चुकोप° Mh. 4, 132 ॥ 365 ॥

तत्र जातादिषु त्रिलिङ्ग्याम् । Ku. 3, 23 ॥ [ वैजयन्ती ] पताकायाम् । Śi. 6, 69 ॥ [ रविसुत ] यमे । रविसुतभयं न पश्यति । मनौ । रविसुतगदितेन निश्चयः स्यात् ॥ 366 ॥

सौरे । उच्चैः स्थितो रविसुतो विदधाति सर्वम् । कर्णे । तीक्ष्णाः शरा रविसुतस्य निपेतुरुग्राः । सुग्रीवे । Ra. 12, 104 ॥ [ निपातित ] द्वयेपि । निपातितपितृभ्रातृमातामहपितामहम् ॥ [ देवखात ] ह्रदे । M. 4, 203 । गुहायां प्रसिद्धम् ॥ 367 ॥

[ प्रजावती ] भ्रातृजायायाम् । Ra. 14, 45 ॥ [ समुद्रान्ता ] भूमौ । समुद्रान्तां स्थिरां शुद्धाम् । कार्पासी तूलम् ॥ 368 ॥

[ उपरक्त ] राहुग्रस्तेर्के । उपरक्तोपि विवस्वान्न जातु कान्तिं निजां त्यजति । व्यसनार्ते । नैवोपरक्तहृदयस्य हिताहिते स्तः । आत्तरागे । एतन्मे नितरां दुनोति हृदयं कोपोपरक्तं मुखम् ॥ [ प्रबोधित ] अवगमिते । उपदेशवचः प्रबोधितस्तव संयाति विहाय संवृतिम् । अपास्तनिद्रे । प्रबोधितो यः स्तुतिगीतमङ्गलैः c. Ki. 1, 38 ॥ 369 ॥

[ समाघात ] एषां सूक्ष्मो भेदः ॥ [ पिपतिषत् ] द्वयेपि । पिपतिषतां किमसाध्यं श्वभ्रेपि स्वं परिक्षिप्यताम् ॥ [ प्रणिहित ] न्यस्ते । मन्दं० Mh. 4, 115 । समाहिते । भाव्यं त्वया प्रणिहितचेतसा ॥ 370 ॥

न्यासे समाधौ च प्रणिहितं भावमात्रम् ॥ [ अभियुक्त ] सक्ते। युक्तोभियुक्तो जनः । आक्षिप्ते । अभियुक्त इमान्महीभुजः c. Ki. 2, 46 ॥ [ मूर्धाभिषिक्त ] द्वयेपि । Mh. 5, 20 ॥ 371 ॥

[ यादसांपति ] द्वयेपि । Mh. 5, 21 ॥ [ परिभाषित ] समन्तादुच्यमाने। परिभाषितभाष्यशिष्यवर्गं गुरुगेहम् । नियमे । षट्कर्मानुष्ठानं द्विजानां परिभाषितम् ॥ 372 ॥

[ पृथु ] आदिराजे दीर्घे च । Su. 2502 ॥ [ पृथ्वी ] धरण्याम् । Bâ. I, 48 ॥ 373 ॥

[ ग्रन्थि ] पर्वणि यन्त्रणायां च । Śu. 1002 c. Bh. Ś. 82 । संधाने। मृगत्वचं ग्रन्थिमतीं वसानम् c. Ku. 3, 46 । पिटके । ग्रन्थे मा गुरुगर्वमुद्वह सखे ग्रैवेयकोस्मीति भोः ॥ [ अर्थ ] अभिधेये । Ra. 1, 1 । विषये । इन्द्रियाणीन्द्रियार्थेषु । रायि धने । Sp. 606 । प्रयोजने । Su. 1472 । वस्तुनि । सर्वमि० Mh. 2, 209 ॥ 374 ॥

[ तीर्थ ] सोपाने । Ra. 16, 33 । अत्र हि सोपानेन तरणमार्गो लक्ष्यते । पात्रे । Ra. 5, 15 । अर्हत्सेविते । नृणां पापकृतां तीर्थे पापस्य शमनं भवेत् ॥ दक्षस्तीर्थात्तशास्त्रार्थो दृष्टकर्मा शुचिर्भिषगित्यादावागमे । गुरूपचारात् ॥ स्मृतौ । कामं तीर्थे स्त्रियं यायाद् ब्रह्मचार्यन्यथा भवेत् । सत्त्रिणि यज्ञप्रवृत्ते । फल० Mh. 2, 213 । उपाये । अनेन तीर्थेन हि किं न साध्यते ॥ [ प्रस्थ ] सानौ । Ku. 1, 54 । सर्वारम्भास्तण्डुलप्रस्थमूला इत्यादौ माने । पलानां विंशतिः शतं च प्रस्थः ॥ 375 ॥

[ गाथा ] या संस्कृते आर्या सा प्राकृते गाथा । वाग्भेदे सा गीतपदपाठे । यथा । गाथाः पठेश्च मधुरं मदनाग्रदूतीरित्यादौ ॥ [ ग्रन्थ ] निर्ग्रन्था आर्हता निर्धना इत्यर्थः ॥ [ आस्था ] आस्थीयतेस्यामित्यास्था आस्थानी । आशायाम् । आस्थापरास्था सदृशी तवैवम् । आदरे । Ku. 6, 63 । यत्ने । आस्थापरेणैव

जनेन लभ्या पदद्वयी ते यदपि त्रिनेत्र ॥ [ संस्थ ] स्पशे चरे पुंसि । संस्थैः समीक्ष्य परकृत्यमनन्यकार्यैः ॥ 376 ॥

[ संस्था ] व्यवस्थायाम् । संस्थामनालोच्य विकारमेति । मरणे । संस्थां गतो विकारः । यागोपकरणे [sic] । द्वैधं संस्थां कृत्वा घर्मे सौत्ये प्रयुञ्जीत ॥ [ वीथी] वेदमाङ्गेन्वेष्यम् । वर्त्मनि । विहारवीथीव मनोभवस्य ॥ 377 ॥

[ सिक्थ ] पुलाक ओदननिष्पत्तिपरीक्षा । अन्तर्निविष्टसिक्थिततौरुष्किकखुरिशकादिचरणत्रैः c. Kuṭṭ. 64 इत्यादौ मदने नपुंसकम् । एतत्तु मचनमिति वैद्याः । मच मुचि कल्क इति धात्वर्थानुगुण्यमस्मिन्नेव पक्षे दृश्यते ॥ [ कुथ] दर्भेषु । कुथपवित्रकपूतकरो द्विजः ॥ 378 ॥

[ मन्थ ] मन्थाने । Su. 35 ॥ [ सिद्धार्थ ] द्वयेपि । सिद्धार्थता स्फुरति तावदियं स्फुटैव सद्वृत्तता स्फुरति सर्षप तावदेव ॥ [ समर्थ ] शक्तिस्थे । समर्थो धर्ममाचरेत् । संबद्धार्थे हिते वा । तथा समर्थां गिरमूचिवांसम् ॥ 379॥

[ क्षवथु ] द्वये । सुतीक्ष्णक्षवथूद्गारसंतापाचान्तविग्रहः ॥ [ उपस्थ ] अङ्के उत्सङ्गे गुह्ये च । उपस्थसंस्थापरिचुम्बनोन्मुखी ॥ [ निर्ग्रन्थ ] निष्परीवारः परिचारकरहितः क्षपण आर्हतः ॥ 380 ॥

[ उन्माथ ] पाशयन्त्रके । उन्माथबद्धमार्गस्य गजस्येव विचेष्टितम् । वधो मारणम् । घातस्ताडनं च ॥ [वयःस्थ] यूनि । एते वयःस्थाः स्थपुटेपि मार्गे ॥ 381॥

[ मन्मथ ] कपित्थः फलविशेषः । कामे । Ku. 3, 21 ॥ 382 ॥

[दशमीस्थ] क्षीणरागः शान्तचित्तः । वयोतिगो वृद्धः । यथा । M. 2, 138॥ [ अनीकस्थ ] द्वयेपि । अनीकस्थैः स्वस्थैः स्थितिरिह कथं शत्रुनिधने ॥ 383 ॥

[ हृद् ] मनसि । हृद्युन्मादकराः शशाङ्करुचयश्चेतोहरः पञ्चमः । वक्षसि । Ku. 3, 50 ॥ [ भिद् ] दारणं मारणादि भेदो विशेषः ॥ [ वन्दी ] मर्यादापालनधनादिनिर्वाहणार्थं स्वकपुत्रादिनिवेशनं पणबन्धः । हठहृतायाम् । मोक्ष्यथ स्वर्गवन्दीनां वेणीर्वीर्यविभूतिभिः c. Ra. 10, 47 ॥ 384

[ पद ] व्यवसाये निश्चये । त्रित्ते विचाररहिते च पदं न किंचित्सम्यक्स्फुरत्यहह कोपि विधिः प्रमादः । परमं पदमार्तचेतसामभविष्यं यदनश्वरमीश्वर इत्यादौ परित्राणे [ ?c. Mh. 2, 226] । स्थाने । Ki. 2, 30 । वस्तुनि न्यासे चरणक्रमे

च । पदे पदे स स्खलितानि रक्षन् । अपदेशे व्याजे । असुपदेन विगलितस्त्यक्तो मानस्तया वाचीत्यादौ । पादे । Ku. 5, 85 । तन्मुद्रायाम् । Ku. 1, 6 । चिह्ने । Ku. 2, 64 । अक्षे अक्षांशे । पदमपि वेलापतितं बह्वपि विभवः प्रशंसन्ति । शब्दे । यत्पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम् ।। 385 ।।

[ पाद ] रश्म्यङ्घ्र्योः । Su. 547 । तुर्यांशो दीनारादीनाम् । द्विपादा ऋगित्यादौ ऋगंशे । अद्र्यन्तपर्वते । Me. 19 । वृक्षमूले । पादघातेन पादपाः ।। [ संविद् ] संकेते । Ra. 7, 28 । ज्ञाने । तद्दृष्टाविव दृष्टेषु संवित्सामर्थ्यभाविनः । कालेन्वेष्यम् ।। 386 ।।

संभाषणे । तदा° Mh. 2, 232 । क्रियाकारे प्रतिज्ञायां वा । संविदि स्मरणीयं तदन्यथा हीयते ततः । आचारे । कथं° Mh. 2, 233 । नाम्न्यप्यन्वेष्यम् ।। [ दृशद् ] निष्पेषणशिलायाम् । संपिष्यतां दृशदि संप्रति चन्द्रमूर्तिः । शिलामात्रे । Me. 55 ।। [ भेद ] विदारणे । Ku. 8, 86 ।। 387 ।।

उपजापे । आकोपितान् भेदसहान्करोति सः । विशेषे । शब्दभेदे स्मृतिः कथम् ।। [ गद ] हरेर्भ्रातरि आयुधे च । सगदः सह सारणेन तम् c. Śi. 16, 13 ।। [ संपद् ] श्रियाम् । संपदि दानं दीनजने विपदि न धैर्यं यस्य । उच्छ्रये आधिक्ये । Ki. 1, 17 ।। 388 ।।

[ कन्द ] ———— इत्यादौ मूले । किं° Sp. 1725 इत्यादौ सूरणाख्ये शाकभेदे । सूरणशब्देन च समस्तशाकोपलक्षणम् ।। [ छद ] ओष्ठे । दन्तच्छदे बिन्दुपवित्रितोदरे । गरुत्सु पक्षेषु । सितच्छदैर्मण्डलितोच्चपुच्छैः ।। [ ह्रद ] तोयाशये । Ra. 7, 27 । स्रोतसि । प्रवृत्तघोषा रुधिरह्रदाकुलाः ।। [ बिन्दु ] तथेयं बैन्दवी कलेत्यादौ वबयोरेकत्वस्मरणाद्वेदितरि बिन्दुः । विप्रुषि । Ku. 5, 24 ।। 389 ।।

दन्तक्षते शून्ये च । एतच्चित्रं त्वदधरदलं बिन्दुनैकेन युक्तं धत्ते शोभां तव सुवदने यत्परावीतिरिक्ताम् [ sic ] । अर्थप्रकृतौ । बीजं बिन्दुः पताका च c. Daś. I, 17 । भ्रूमध्यतेजसि । S. P. 25 ।। [ स्वादु ] इष्टेऽपि । Śi. 10, 3 ।। [ मृदु ] अतीक्ष्णे । मृदु धनुर्वहता किल कौसुमं किमिव कृत्यमनेन तपस्विना । कोमले । मृदुभाषिणि ते मुखेन्दुना ।। 390 ।।

[ छन्द ] अभिप्राये । छन्दानुवर्ती विपदं न याति । वशे । Su. 1472 ॥ [अब्द] जीमूते । शारदाब्दसदृशं यशस्तव । वत्सरे । लौकिकाब्दान्विनिक्षिपेत् ॥ [ स्वेद ] घर्मे । स्वेदो नवः किं° c. Ku. 3, 33 । स्वेदने । स्वेदोदयो नवज्वरे । स्तम्भः स्वेदोथ रोमाञ्च इत्यादौ कामहेतुके घर्म एव सात्त्विको भावः ॥ 391 ॥

[ छेद ] विरामे । Ku. 2, 41 । खण्डे । Me. 11 ॥ [ शाद ] जम्बाले । आस्त्यान° Mh. 2, 232 । शष्पे । Ra. 2, 17 ॥ [ क्षोद ] विमर्दे । क्षोदक्षममक्षुण्णं° c. R. K. II, 8 । चूर्णे । कर्पूरक्षोदधूसरम् ॥ [ नाद ] प्राणे । बिन्दुनादगमनागमनाभ्याम् । शब्दे । M. M. 178, 2 ॥ 392 ॥

[ शरद् ] वत्सरे । M. Ch. I, 42 । ऋतौ । Su. 965 ॥ [ क्रव्याद् ] द्वयेपि । Ra. 15, 16 ॥ [ सूद ] सूपे । सूदखादनविषूचिकाचितः । ऊषरभूमिके देशे । सूदे दामोदरीये हि विप्रशापात्समर्पिताम् c. Râj. I, 157, 167 ॥ 393 ॥

[ कुन्द ] भ्रमे उल्लेखयन्त्रे । An. II, 80; c. Nai. 19, 54 । पुष्पभेदे शैशिरे । कुन्दे नन्दति कैरवे विहरति पङ्केरुहे रोहति ॥ [ मन्द ] अपटौ इभजातौ च । Śi. 5, 49 । शनैरर्थे । Me. 9 । मूढे । Ra. 1, 3 ॥ 394 ॥

[ मद ] क्षैव्ये । दृष्ट्वा ततश्च तरुणेन मदेन लब्धाम् । गर्वहर्षयोः । Ra. 4, 22 । इभदाने । R. K. 1, 1 । मद्ये । Ku. 8, 76 v. l. ॥ [ ककुद् ] राजलिङ्गे । उच्छ्रितककुदि महाबलचतुरङ्गबलान्विते नृपतौ । पृष्ठाङ्गे । आवर्तान्ह्यन्त्यशुभानभिमकाये ककुद्भवं मुक्त्वा [ c. Pa. 1662 ] । समुल्लिखन्° Ku. 1, 56 इत्यादौ त्वतिशयिते पृष्ठाङ्गे रूढः । श्रेष्ठे प्रसिद्धः ॥ 395 ॥

[ निषाद ] लुब्धके । Ra. 13, 59 । संकरजन्मनि । M. 10, 8 ॥ 396 ॥

[ ककुद ] प्रधाने । अस्य राजककुदस्य कापि सा कीर्तिरुल्लसति लोकपावनी । राजलिङ्गे । Ra. 3, 70 । पृष्ठाङ्गे । ककुद° Mh. 2, 220 ॥ [ मर्यादा ] धारणायां स्थितौ । Bh. Ś. 92 । सीमनि । मर्यादां सागरस्त्यजेत् ॥ [ विषद ] व्यक्ते । Ku. 3, 33 । विषदचन्द्रिकया व्यवभासितमित्यादौ विषदे पिच्छिलगुणविपरीते शुक्लत्वोपचारात् ॥ 397 ॥

[ गोविन्द ] इयेपि । गोविन्दता च विहिता भवता यथार्था ॥ [ कुमुद ] कपिजलजयोः । H. Ch. 5, 5 । नागो दिग्गजः । भुजगविशेषश्च ॥ [ कुसूद ] वृद्धिजीवने । कुसूदकृषिवाणिज्यैर्वैश्यवृत्तिरुदाहृता ॥ 398 ॥

कुसेवके आलस्योपहते । प्रज्ञा करोति किं तस्य यः कुसूदेन वर्तते ॥ [ प्रतिपद् ] ज्ञाने । भावैर्नित्यानुबद्धा प्रतिपदियमहो दीर्घदीर्घा स्थिता ते । तिथौ । Ra. 8, 64 ॥ [ प्रसाद ] अनुग्रहे । Ku. 3, 10 । नैर्मल्ये । प्रसादमादर्श इवान्तरात्मनि । प्रीतिदाने । राज्ञा प्रसादीकृतमेतदत्र ॥ 399 ॥

[ आक्रन्द] सारावे रुदिते । आक्रन्दस्तनिते॰ Dhv. 92, 11 ; Su. 1776। त्रातरि । निराक्रन्दो जीवलोकः । दारुणे रणे । आक्रन्दे महति जहर्ष राजलोकः । पाश्चात्ये राजविशेषे । आक्रन्दसंदीपितजैत्रयात्रः ॥ [ गोष्पद ] माने । K. K. S. 1, 1 । सेविते देशे । गोष्पदेषु विचरन्न पूयते ॥ 400 ॥

[ शारद ] अधृष्टनवसंवत्सरेष्वन्वेष्यम् । शरद्भवे देव्यां च । Su. 1 ॥ मुद्गेपि शारद आयुर्वेदे प्रसिद्धः ॥ 401 ॥

[ कुविन्द ] भ्रमिः शिल्पिभाण्डम् । वायकेपि । K. Pr. 141, 6 ॥ [प्रमदा] तरुण्याम् । Ra. 9, 41 । हर्षे पुंसि । Śi. 13, 2 । अधिकमदे त्रिषु । प्रमदद्विरदोपबृंहितः ॥ 402 ॥

[ उपनिषद् ] त्रयेपि । M. M. 14, 3 । रहःशब्देन रहसि भवं वस्तूच्यते ॥ [ शतह्रदा ] शतह्रदेन्द्रायुधभीमदर्शन इत्यादौ इयेपि ॥ [ तमोनुद ] त्रयेपि । उदिते तमोनुदे हि प्रभवति न तमः क्वचित्स्थातुम् ॥ 403 ॥

[ समर्याद ] मर्यादासहिते । K. Pr. 121, 3 । अभ्यर्णे निकटम् ॥ [अववाद ] निन्दायाम् । दुष्टोयमववादस्ते ॥ [जनपद] देशे । H. Ch. 106, 5 । जने । Ra. 9, 4 ॥ 404 ॥

[ विष्णुपद ] गङ्गायां हर्यङ्घ्रौ च । स्नात्वा विष्णुपदीतोये याति विष्णुपदं पुमान् । आकाशे विष्टपे लोकमात्रे च । भ्रान्त्वा विष्णुपदं प्रयाति शनकैरस्ताचलं भास्करः ॥ [ अभिमर्द ] युद्धे । युक्तं॰ Mh. 4, 136 । पीडायाम् । तीव्राभिमर्दपरिहारनिविष्टबुद्धेः ॥ [ विशारद ] इयेपि । Su. 1 ॥ 405 ॥

[ कोकनद ] द्वयेपि । फुल्लकोकनदकान्तितस्करी ॥ [ परिवाद ] वादनोपाये । Śi. 6, 9 ॥ [ अष्टापद ] हेमनि । Ku. 7, 10 ॥ 406 ॥

शारिफले । H. Ch. 10, 11 ॥ [ अपवाद ] गर्हायाम् । जनापवादादपरज्यति श्रीः । बाधके । Ku. 2, 27 । बाधने । सुखापवादाय भवन्ति शत्रवः ॥ 407 ॥

[ ऋद्धि ] लक्ष्म्याम् । Ku. 7, 52 । प्रभावे । K. K. S. 1, 8 । अतिशये । Bh. Ś. 28 ॥ [ व्याधि ] आमये । Su. 1103 ॥ 408 ॥

[ मधु ] वसन्ते । Ku. 3, 21 । दैत्यभिदि । त्रायन्तां वो° Dhv. 1 । चैत्रे । Ra. 11, 7 । मद्ये । Śi. 10, 3 । पुष्परसे । मधुपिपासुमधुव्रतसेविभिः c. V. K. V, 2, 14, C. । क्षौद्रे । यन्माधुर्यं मधुनि विदधेन्यत्र तन्नैव वेधाः । मधुरे । मधुनि विमले मद्ये चेतो न कस्य विधास्यति ॥ 409 ॥

[ आधि ] बन्धके विनिमयस्थापिते वस्तुनि । आधिः सीमा बालधनं निक्षेपोः [ sic ] स्वामिविक्रयः c. M. 8, 149 । व्यसने । Me. 86 । चेतसः पीडायाम् । शाधि मामाधिपीडितम् । अधिष्ठानेन्वेष्यम् ॥ [ विधु ] विष्णौ । विधुर्दानवनारीणां वैधव्यव्रतशिक्षकः । शशिनि । Śi. 2, 61 ॥ [ बाध ] दुःखे । प्रशान्तबाधं द्विषतोभिरक्षयेत् । निषेधे । निर्बाधे विधुरेप्यधीर इति मां येनाभिधत्ते भवान् ॥ 410 ॥

[ सिन्धु ] नदभिदि । Ku. 3, 6 । देशभिदि । स्फूर्जत्सिन्धुरभङ्गुरे रणमुखे जित्वा भटान्सैन्धवान् । अब्धौ । त्वत्स्मृत्या तु प्रथितविभवोप्यन्धुतामेति सिन्धुः । सरिति । Pa. 1151, Z. D. M. G. 36, 535, 2 ॥ [ विधा ] विधौ विधाने । Ra. 1, 94 । प्रकारे । M. St. 2 । गजान्ने वेतने च । स्व° Mh. 2, 245 ॥ 411 ॥

[ वधू ] जायायाम् । Ku. 6, 82 । स्नुषायाम् । Ra. 1, 65 । स्त्रियाम् । M. M. 154, 1 । प्रियङ्गुर्लता ॥ [ निधि ] निक्षेपे । अनिक्षिप्ते निधौ यत्र विवादः संप्रजायते । गूढार्थे । तस्य शङ्खनिधिन्यायो न कथं पर्यवस्यति । स्थाने । त्वं तावन्निधिरागसामसहना मानोन्नता सा पुनः ॥ [ श्रद्धा ] द्वयेपि । Ra. 2, 16 ॥ 412 ॥

[ अन्ध] तमसि । अन्धा° Mh. 2, 234 । जले । आदरेण धृतिं तन्वी सा बबन्धान्धकेलिषु । अदृष्टौ । श्रुत्वापि नाम बधिरो दृष्ट्वाप्यन्धो जडो विदित्वापि । अज्ञानेपि ॥ निःश्वासान्ध इवादर्श इत्यादौ तूपचारात् c. Dhv. 63, 3; Mh. 2, 234 ॥ [ संधा ] द्वयेपि । Ra. 14, 52 ॥ [सुधा] मक्कोले । V. Ś. III, 2। अमृते ओषधिभेदे च । सुधासारस्यन्दी शिशिरकिरणः शष्पकवलः ॥ 413 ॥

[विधि] विधायके वाक्ये विधाने च । Ku. 5, 32। दैवे । K. Pr. 237, 2। स्रष्टरि । कोयं विधेः प्रक्रमः K. Pr. 54, 2 or M. M. 183, 4 ॥ [ श्राद्ध ] हव्यकव्यविधौ दैवे पित्र्ये कर्मणि । M. 3, 145 । श्रद्धासमन्विते । श्राद्धश्चैवान-सूयश्च c. M. 4, 158 ॥ 414 ॥

[ संधि ] भगे सुरुङ्गायां च । संधिं भित्त्वाविशच्चौरश्छिद्रान्वेषणतत्परः । संधाने । दूतोङ्ग कामकलहेषु विसर्जनीयः संधिः कथं नु सखि तत्र स यत्र लुप्तः। गुणभेदे । संधिं करोतु भवतां नृपतिः पणेन ॥ [ गोधा ] तले ज्याघातवारणे । शरासनाभ्यासविधौ समाप्ते क्षिप्तेव गोधा मकरध्वजेन N. Ch. I, 28 । निहाका पञ्चनखो बिलेशयः प्राणिविशेषः । यथा । गोधा लङ्गलबद्धेवाक्षिप्यमाणा बलीय-सेत्यादौ ॥ [बुध] विदुषि । Dhv. 2, 1 । ग्रहामरयोः। Ra. 1, 47 ॥ 415 ॥

[ राधा ] कृष्णजायायाम् । Gît. I,1, d । शरव्ये । राधायन्त्रं रचयत पुन-र्विद्धमप्यस्तु विद्धम् [?] । कर्णमातरि । Ki. 3, 21 ॥ [ वृद्धि ] वर्धने । A. S. 70, 9 ॥ 416 ॥

[ सिद्धि ] निष्पत्तौ । Ku. 3, 57 ॥ [ बन्ध ] स्नेहे । बिभेद नो तां प्रति तस्य बन्धः । आधिर्विनिमयस्थाप्यं वस्तु । बन्धने रचनायां च । H. Ch. 3, 3। वृन्तेपि । Me. 10 ॥ [ स्कन्ध ] स्कन्धावलम्बी भगवानेष बालदिवाकर इत्यादौ वातनियतावधौ । वातस्कन्ध इति प्रसिद्धः । अंसे च । आदिग्रहणाद्दीना-रादिनियतावधौ ॥ 417 ॥

राजनि । विवेश सहसा तत्र स्कन्धावारमवारितः। अत्र हि स्कन्धं राजान-मावृणोतीति स्कन्धावारः सेनासंनिवेशः । तरुजङ्घायाम् । Ku. 3, 26 । समूहे । Śi. 2, 28 ॥ [ वीरुध् ] द्वयेपि । M. M. 305, 3 ॥ [ अर्ध ] खण्डे । Me. 55। समेंशके । Śi. 9, 29 ॥ 418 ॥

[ बुद्ध ] दोषज्ञः पण्डितः । सुगते । बुद्धं सधर्ममथ सार्यगणं प्रणम्य ॥ [ शुद्ध ] एकस्मिन्नसहाये पूते च । K. Pr. 363, 9 ॥ [ वृद्ध ] वृद्धेपि । अनु° Mh. 2, 247 ॥ [ साधु ] शोभने । Ki. 1, 5 ॥ 419 ॥

वार्द्धुषिर्वृद्धिजीवी । सज्जने । तत्साधवो ननु विदन्ति वदन्ति° Su. 271 ॥ [ सिद्ध ] देवविशेषे । Ku. 1, 5 । निष्पन्ने । M. St. 15 । पूज्ये । अवाप्ता° Mh. 2, 251 ॥ [दिग्ध] विषलिप्ते शरे । अथ तैः परिदेविताक्षरैर्हृदये दिग्धफलैरिवार्दितः c. Ku. 4, 25 । लिप्तमात्रके । M. M. 54, 5 ॥ 420 ॥

[मुग्ध] मनोहरे । M. M. 51, 2 । योषिति । दीर्घं मुग्धा वयमरुता [sic] यत्र शान्तिं नयन्ति c. Mh. 2, 242 ॥ [विद्ध] सूच्यादिभिन्ने । विन्यस्तवैडूर्यशिले च तस्मिन्नाविद्ध° c. Ku. 7, 10 । सम्यग्विद्धं तु तत्ताम्रमित्यादावादियहणाद्रसादिव्यवधानेपि । सादृश्येन्वेप्यम् । ज्ञे । किमिव हि न विवेक्तुं रजते [ sic ] हन्त विद्धाः c. Mh. 2, 245 ॥ 421 ॥

[ गन्ध ] घ्राणग्राह्ये । यद्गन्धान्धं भ्रमरपटलम् । स्वल्पे । जलदगन्धिरराजत सानुमान् । अल्पे जलदा यत्र स जलदगन्धिरिति व्युत्पत्त्या । द्रव्ये । गान्धिकैर्विपणयो विराजिताः । अत्र हि गन्धशब्दस्तद्वति वर्तते । संबन्धमात्रके । वशानागौ सगन्धाल्पकलभानुगताविव ॥ [ लुब्ध ] स्पृहावति । Ku. 1, 34 । मृगयौ ॥ तेपि क्रूरचमूर° Su. 1016 c. Bh. Ś. 87 ॥ 422 ॥

[ मागध ] वन्दिनि । Śi. 11, 1 ।पिप्पली द्रव्यभेदः । यूथिका हरणिका अत्र मागधिशब्दः ॥ [ न्यग्रोध ] व्यामे प्रसारितकरद्वयवलिते । न्यग्रोधमेयचतुरश्रनितम्बबिम्बा ॥ 423 ॥

[ प्रबोध ] जागरे उद्घाटे च । सुखप्रबोधगलिता सुवर्णघटनोज्ज्वला c. H. Ch. 7, 1 । उद्घाटोर्थावगमः ॥ [ उत्सेध ] वपुषि । स्थूलोत्सेधव्यवहितरविस्यन्दनः कुम्भकर्णः । उन्नतौ । Ku. 5, 8 ॥ [ विवध । वीवध ] पर्याहारे अध्वनि च । Śi. 2, 64 । पर्याहारस्तृणजलान्नादीनामन्यत आनयनम् । भारे । H. Ch. 13, 14 ॥ 424 ॥

[ परिधि ] उपसूर्यके मण्डले । परिधिमुक्त इवाहिमदीधितिः c. Ra. 8, 30 ॥

[ समाधि ] ध्याने । Ku. 3, 40 । नीवाकः । नियतं वचनम् । नियमे । यदा फलं सर्वसमाधिसाधनं° c. Ku. 5, 18 । समर्थनेपि । कृतसमाधिरपि चपलः ॥ 425 ॥

[ प्रणिधि ] प्रार्थने । प्रणिधिवशादुपजातसत्प्रभावः । चरे । Ku. 3, 6 ॥ [ अवधि ] परिच्छेदे । Me. 84 । विलेन्वेष्यम् ॥ [ अगाध ] अतलस्पर्शे । अगाधसंशयाम्भोधिसमुत्तरणसाधनी । गर्ते । दुष्टा° Mh. 3, 333 ॥ 426 ॥

[ उपधि ] व्याजे । Ki. 1, 45 । रथाङ्गं चक्रनाभ्यन्तःप्रवेशी काष्ठविशेषः ॥ [ विबुध ] द्वयेपि । K. Pr. 255, 5 ॥ [ आनद्ध ] द्वयेपि । आरब्धानद्धतूर्यवनिमुखरमुखा रेजुरुच्चा निवासाः ॥ 427 ॥

[ उपाधि ] धर्मचिन्तायाम् । विनोपाधेः शास्त्रं तृणतुषबुसप्रख्यमखिलम् । कुटुम्बव्यापृतेन्वेष्यम् । विशेषणोपार्जनयोः । उपाधि° Mh. 3, 335 ॥ [ प्रबुद्ध ] ज्ञानिनि जाग्रति च । प्रबुद्धः सर्वदा तिष्ठेत् ॥ 428 ॥

[ संसिद्धि ] सम्यक्सिद्धौ । संसिद्धिसिद्धविभवा मुनयः प्रयाताः । स्वभावे । संसिद्धि° Mh. 3, 343 ॥ [ संनिधि ] प्रत्यक्षे । यातः सं° Mh. 3, 343 । संनिधाने । Ra. 7, 3 ॥ [ निरोध ] नाशे । स्थिति° Mh. 3, 338 । रोधे । Ku. 3, 48 ॥ 429 ॥

[ निषध ] कठिनेन्वेष्यम् । राजभेदे नगान्तरे च । Ra. 18, 1 ॥ [ कबन्ध ] त्रयेपि । स्फूर्जत्कबन्धविधुरारवपूरिताशं संग्रामवार्धिमवलोक्य न हृष्यते कः ॥ 430 ॥

[ आबाध ] द्वयेपि । आबाधविधुरे चित्ते धृतिः कस्य न हीयते ॥ [ संबाध ] योनौ । करिहस्तेन संबाधं विलोडयेत् c. K. Pr. 190, 1 । संकटे । ययावसंबाधसुखेन मार्गम् c. Ra. 2, 72 ॥ [ विस्रब्ध ] द्वयेपि । Śâ. 39 । इतोनन्तरमवष्टब्धावधि त्रिषु ॥ 431 ॥

[ आविद्ध ] द्वयेपि । Vik. 115, c ॥ [ प्रसिद्ध ] द्वयेपि । Ku. 5, 9 ॥ [ विरुद्ध ] वैरिणि । त्वद्विरुद्धवनितासुसंततिः । विगुणे । नश्येद्विरुद्धाचरणेन बुद्धिः ॥ [ दुर्विध ] द्वयेपि । दुर्विधेषु विनयो न शोभते ॥ 432 ॥

[ अवष्टब्ध ] त्र्येपि । Mh. 4, 149 ॥ [ ब्रह्मबन्धु ] अधिक्षेपे । आ दुरात्मन्मुनिखेट ब्रह्मबन्धो c. H. Ch. 11, 14-12, 1 । ब्राह्मणनिर्देशे । ब्रह्मबन्धुरयमागतोतिथिः ॥ 433 ॥

[ अनुबन्ध ] दोषोत्पादे । महतां नास्ति कदाचनानुबन्धः । प्रकृत्यादेर्धातुप्रत्ययादिमध्याद्यः प्रयोगं नार्हति सोनुबन्धः । मुख्यानुयायिनि शिशौ चोदाहरणमन्वेष्यम् । प्रकृतस्यानुवर्तने । Ra. 1, 64 ॥ 434 ॥

[ महौषध ] एते द्रव्यभेदा महौषधाख्याः ॥ 436 ॥

[ पृश्नि ] अल्पतनौ । पृश्निवर्षवरमुख्यसेविते राजवेश्मनि विवेश संकटे । रश्मौ । अश्नुवन्ति रविपृश्नयो रसम् । वर्णभेदे ईषद्रक्ते । अल्पतनुवर्णयोस्त्रिलिङ्गः। रश्मौ पुंसि । गवि । पृश्नयः पपुरपः समागताः ॥ 437 ॥

[ यक्ष्मन् ] व्याधिभेदे । यक्ष्मणापि परि° Ra. 19, 50 v. l. । यक्षे प्रसिद्धः ॥ [ मुनि ] बुद्धे । मुनेर्मतं कस्य न माननीयम् । ऋषौ । Ku. 3, 24 ॥ [ शुष्मन् ] वह्नौ । शुष्मणि प्रणयनाभिसंस्कृते c. Śi. 14, 22 । बले । कः सहेत तव शुष्मणोष्मणः ॥ [ शृङ्गिन् ] प्रतिविषाविषयोरिन्नन्त एव पुंलिङ्गः । शृङ्गी विषं बलामोटा इति निदर्शनात् । केचिच्छृङ्गीशब्दमनयोरीकारान्तं मन्यन्ते । तत्पक्षे गान्तेषु स्त्रीलिङ्गो द्रष्टव्यः ॥ 438 ॥

दान्ते पर्वते च । आरुह्य सौधधवलं शृङ्गिणं व्यहरद्धरः । शृङ्गवति । Sp. 3214 ॥ [ हनु ] सृक्कणि । Su. 1677, d ॥ [ जटिन् ] उभयत्रापि । निःसृता मन्मुखाम्भोधेरपूर्वेयं सरस्वती । स्थाणुं त्वां जटिनं प्राप्य सामरस्यमुपैति या ॥ व्रतिनि । जटी मुण्डी शिखी वापि यत्र तत्राश्रमे रतः । पञ्चविंशतितत्त्वज्ञो मुच्यते नात्र संशयः ॥ 439 ॥

[ घन ] मेघे । Śi. 1, 7 । मूर्तिगुणे काठिन्ये । पेतुर्जनादभ्रघनादिवापः । घनादभ्रादिति ह्यत्रार्थः । विस्तारे । अर्धैकादशपुरुषो घनो भवेन्मण्डले तु रथचक्रे । लोहमुद्गरे । अपतत्स घनैरिवाहतः ॥ अथ सुशिरघनावनद्धवाद्यध्वनिरहितेन हि रङ्गमङ्गलेनेत्यादौ वाद्ये नपुंसके । अन्यत्र तु पुंसि । मूर्तिनिरन्तरे कठिने । Śi. 5, 29 ॥ क्व प्रस्थितासि करभोरु घने निशीथे Sp. 1991, वर्त्मभिर्घनतमोमलीमसैः Bh. Ś. 6 इत्यादौ भूरितमोनैरन्तर्यमात्रे ॥ 440 ।

[ इन ] प्रभौ । Ra. 9, 5 ॥ [ राजन् ] त्र्येपि । राजा राजति राजवत् ॥ [ तनु ] त्वचि । तरुतनुभिः कृतवस्त्रसंहतिः । देहे । Śi. 1, 23 । तद्गुणे । Sp. 4554 ॥ 441 ॥

[ पर्वन् ] तिथिभेदे प्रतिपत्पञ्चदश्यन्तरे । पार्वणेन शशाङ्केन । क्षणे उत्सवे । विलोक्य° Mh. 2, 269 ॥ [ वर्त्मन् ] अध्वनि । Su. 2641 ॥ [ब्रह्मन्] वेदे । Ku. 6, 16 । तत्त्वे । Bhag. 4, 24 । तपसि । Bhag. 6, 14 । विप्रे । Pr. P. 5 ॥ 442 ॥

[ पक्ष्मन् ] अक्षिलोम्नि । Ku. 5, 24 । किञ्जल्के । कुसुमैस्तनुलग्नपक्ष्मभिः कुसुमेषोरिव यस्य सायकैः । निसर्ग° Śi. 1, 8 इत्यादौ आदिग्रहणाल्लोममात्रेपि ॥ [ आत्मन् ] यत्ने । Ra. 7, 12; Ku. 7, 64 । धृतौ । अवष्टभ्यात्मनात्मानं त्वं सारं वक्तुमर्हसि । बुद्धौ । Ku. 5, 76 । स्वभावे । न सन्ति याथात्म्यविदः पिनाकिनः c. Ku. 5, 77 । ब्रह्मणि वर्ष्मणि शरीरे च । Ku. 3, 50 ॥ कुत्रापि पुत्रेपि दृश्यते । Ku. 2, 61 । तथा । आत्मा वै पुत्रनामासीति निदर्शनात्पुत्रे c. Mahâbhâr. 1, 74, 63 ॥ 443 ॥

[ वर्ष्मन् ] देहे प्रमाणे च । व्याप्तं व्योमनि वर्ष्मणा यमपुरद्वारार्गलादारुणी । आकारे सुन्दरे । वर्ष्मणा विदधती जगज्जयम् ॥ [ ग्रावन् ] द्वयेपि । अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥ 444 ॥

[ शिखिन् ] वृक्षे अग्नौ च । शिखिमूलानि शिखी निहन्ति चित्रम् । कुक्कुटे । शिखिकुलकूजितसुभगे । बर्हिणि । Me. 101 ॥ [ सादिन् ] द्वयेपि । सादिभिः सुविहितेथ रथाश्वे ॥ [ वाजिन् ] अश्वे इषौ च । युक्तं चक्रुर्वाजिनो वाजितायाः c. Śi. 18, 13 । पक्षिणि । वाजिनो वियति संभ्रममापुः ॥ 445 ॥

[ सीमन् ] स्थितौ । अनुल्लङ्घितसीमानः सागरा इव साधवः । क्षेत्रे । अथाग्रे सीमानः परिणतशरच्छालिसुभगाः । अवधौ । Bâ. 1, 8 । मार्गविषये । यत्राज्ञातचरश्चिरान्नयनयोः सीमानमेति प्रियः ॥ [ लक्ष्मन् ] अग्र्ये प्रधाने । दृष्ट्वैव तं सूर्यकुलैकलक्ष्मा । चिह्ने लाञ्छने । Su. 1343 ॥ [ धामन् ] गृहे । Ku. 2, 1 । देहत्विट्प्रभावेषु । आत्मा° Mh. 2, 266 ॥ [ धन्वन् ] स्थले ।

नीलेषु धन्वसु लुठन्ति नदन्ति दान्ता भूमिं खनन्ति रभसान्निशितैः खुराग्रैः । धनुषि । धुन्वन्धन्व विघट्टयञ्शितशरैर्दर्पोद्धुरान्सिन्धुरान् ॥ 446 ॥

मरौ । धन्वनि तृषितः पुरुषो रश्मिषु तोयाशया पतति ॥ [ स्वप्न ] द्वयेपि । A. S. 187, 3 c. Dhv. 72, 4. Su. 2570 ॥ [ सून ] पुष्पे । Śi. 3, 17 । वधस्थाने । M. 3, 68 । जिह्वातले । सूना° Mh. 2, 286 ॥ 447 ॥

पुष्पितेन्वेष्यम् ॥ [ चक्रिन् ] अहौ । पदा स्पृशन्तं सहते न चक्री । रथे । वेगा° Mh. 2, 259 । तैलिके । दशसूनासमश्चक्री c. M. 4, 85 ॥ [ भर्मन् ] भृतौ । कर्मणे भवति भर्म सर्वथा । सुवर्णे । भाति भर्म परिकर्मवर्मदम् ॥ [ चर्मन् ] फलके । Śi. 18, 21 । त्वचि । Su. 803 ॥ 448 ॥

[ स्वामिन् ] द्वयेपि । प्रतिहतदुर्गः स्वामी ॥ [ जन ] द्वयेपि । Su. 1141 ॥ [ जनी ] वध्वाम् । यातेति जन्यान° Ra. 6, 30 v. l. ॥ [ज्योत्स्नी] चन्द्रयुतायां रात्रौ । V. Ś. III, 1 ॥ 449 ॥

[ अर्वन् ] द्वयेपि । व्रत योधाः स्थिरार्वाणः शत्रोरिव महीपतेः ॥ [ प्रेमन् ] स्नेहे । Sp. 1939 । नर्मणि । दृढस्थेमा प्रेमा रमयति मनो मार्गविधुरम् ॥ [ स्वैरिन् ] मन्दः शनैर्गामी । स्वच्छन्दे । बम्भ्रम्यन्ते वनभुवि सदा स्वैरिणो वैरिणस्ते ॥ [ श्येन ] श्वेते । श्येनीभिः सुरसिन्धुरोधसि तरुच्छाये कृतं मण्डलम् । विहंगमे प्राजिकाख्ये । श्येनावदाते चकिता वनवर्तिका c. M. M. 286, 7 ॥ 450 ॥

[भानु] द्वयेपि । Sû. 1 ॥ [ वन ] काननीरयोः । सदृशे वनवृद्धानां कमलानां तदीक्षणे c. Mh. 3, 622 । समूहे । नवनलिनवनच्छायां धत्ते विभुरमरभुवि । पर्वते । Nâg. 4 ॥ [ तान ] तात्पर्ये । त्वदेकताना तनुतां तनोति सा । गीतविशेषे । तानास्त्वेकोनपञ्चाशत् ॥ 451 ॥

[ रत्न ] द्वयेपि । Ku. 1, 3 ॥ [ यान ] गमने । दिनैः कतिपयैर्यानं जीवितस्य विचिन्त्यताम् । युग्ये । Ra. 6, 10 । नृपगुणभेदे । यानं समाचरेच्छक्तौ ॥ [ धेनु ] दोग्ध्याम् । अजधेनुभिः सह समावसेत्क्षयी । गोमात्रे । Ra. 11, 74 ॥ 452 ॥

[ द्युम्न ] त्रयेपि । Kutt. 304 ॥ [ विन्न ] अनिर्विण्णो विन्नो यदि भवति नुन्नः स्मरशरैरित्यादौ लब्धे विद्ऌ लाभ इत्यस्य । अन्यत्र विद विचारणे ॥ [ अर्थिन् ] द्वयेपि । Sp. 3336 ॥ [ स्थान ] स्थितौ भावमात्रे । स्थानं यद्यपि ते नास्ति विषयावेशचञ्चलम् । अवकाशे आस्पदे । Ku. 8, 33 ॥ 453 ॥

सादृश्ये । धत्ते पितृस्थानतया यः स्नेहं सर्वेषु जन्तुषु । गीतविषये । स्थानप्रदायित्व° c. Ku. 1, 8 । योग्ये । स्थानमेतदुचितस्य वस्तुनः । प्रसङ्गे । दर्भाणां स्थाने शरैरास्तरितव्यम् ॥ [ भोगिन् ] वैयापृत्यकरो व्यावहारिकः । व्यावहारिकभुजंगयोः । Bh. Ś. 37 । राजनि । अनयेन नदन्ति भोगिन इत्यादौ ॥ 454 ॥

[ ज्योत्स्ना ] ज्योतिष्मत्यां व्यभ्रायां रात्रौ । ज्योत्स्नासङ्गप्रसरसुभगे सैकतेस्मिन्सरय्वाः । चन्द्रमसः प्रभायाम् । Ku. 1, 25 ॥ [मान] प्रमाणे प्रत्यक्षादौ । मातृमानमिति मेयममीभिरित्यादौ प्रमाणे । प्रस्थादौ । तन्वङ्ग्यो मानमानव्यतिकरविधुराः । आदिग्रहणादुन्मानादयो गृह्यन्ते । चित्तसमुन्नतिश्चित्तोद्रेकः । तत्र पुंलिङ्गः । मन्यतेर्घञि । मानं° Su. 1161 । इत्यादौ ॥ 455 ॥

[ नग्न ] दिग्वाससि । Bâ. II, 4 । वैतालिके । नग्नाः पठन्तु यदि । आदिग्रहणाद्बन्द्यादयः ॥ [ भिन्न ] संस्कृते । Ku. 8, 74 । संस्कृतो विशेषितः । दारिते । भिन्नं भासा ननु हिमरुचेर्दण्डकाण्डं द्विजानाम् । अहमद्य प्रभृत्येव भिन्नो भवद्भ्य इत्यादावन्यशब्दाभिधायकः ॥ 456 ॥

[ वान ] शुष्के । Sû. 37 । शुष्कफले । आवानं कस्यचिन्मधु । सीवनकर्मण्यनुसर्तव्यम् । पै — विशोषणे वेञ् तन्तुसंताने इति च धातुद्वयस्य रूपम् ॥ [ योनि ] भगे । Su. 2823 । आकरे । Ku. 6, 18 । आकर उत्पत्तिस्थानम् ॥ [ कृतिन् ] सूरौ । कल्यः कलासु च कृती दृढभक्तिराढ्यः । कृतकृत्ये । Ku. 6, 18 ॥ 457 ॥

[ स्नान ] सवने अभिषेके । स्नानैर्धूपैस्तथा दीपैर्नित्यमाराधयेच्छिवम् ॥ [ धन ] गोसंघे । धनमाराधयेत्केशवः ॥ [ चिह्न ] पताकायाम् । उच्चचिह्नसुरसद्मगोचरः । लक्ष्मणि । Ra. 2, 22 । लक्ष्म वस्तुनो विशेषकमभिज्ञानम् ॥ [ अन्न ] भुक्ते । अन्नेन कुक्षेर्द्वावंशौ । अद्यते घ्रान्नमिति चान्नम् ॥ 458 ॥

[ छन्न ] छादिते । Me. 18 । रहसि । Sp. 2173 ॥ [ पान ] सदा रक्षस्युर्वीं तदपि च न पानव्यसनितेत्यादौ प्रकृतत्वेन रक्षणे ॥ [ दान ] खण्डने त्यागे च । गोत्राणां शतकोटिदाननिरतः । भूमण्डलदानसक्ता इत्यादौ रक्षणे च ॥459॥

संगीयमानत्रिपुरावदान इत्यादौ शुद्धिसंबन्धाच्छुद्धे कर्मणि c. Ku. 7, 48 । लूनौ । नामूलं॰ Mh. 2, 264 ॥ [ हीन ] ऊने । हीनातिमात्रमवशम् । गर्ह्ये । हीनजन्मा स वर्ज्यः ॥ [ रसन ] शृङ्गाररसना नाट्य इत्यादावास्वादने । एवं शृङ्गाररसनं नाट्यमित्यपि ज्ञेयम् ॥ 460 ॥

[ कुहना ] दम्भचर्यायाम् । An. IV, 11 । ईर्ष्यालौ त्रिलिङ्गकः । H. Ch. 202, 13 ॥ [ शिखरिन् ] तरौ । नास्त्याकाशः किमु शिखरिणां येन ते स्युः प्रलम्बाः । शैले । Su. 2030 ॥ [ तरस्विन् ] बलिनि । समरमूर्धनि तेन तरस्विना V. K. 5, 1, 9, C. । वेगिनि । अवनिमेकरथेन वरूथिना जितवतः किल तस्य तरस्विनः c. Ra. 9, 11 ॥ 461 ॥

[ विषाणिन् ] करिणि । Śi. 4, 63 । शृङ्गिणि वृषभे । वादे वादिविषाणिनां प्रशमितास्ता दर्पकण्डूतयः ॥ [ अवन ] प्रीणने तर्पणे । तृष्णालोर्हि मधूकपानमवनम् । अत्र रक्षणादिषु ॥ [ तलिन ] स्वच्छे निर्मले । सौधानां तलिनोदरेषु । अल्पे । तलिनोदरीणां निरन्तरकार्पितानाम् c. Mh. 3, 370 ॥ [ गहन ] गम्भीरे । गहनाशयानाम् । वने वृक्षबहलप्रदेशे । अविशदशनैर्विन्ध्यगहनम् ॥ 462 ॥

[ रोदन ] अश्रुणि नयनजलविमोचनव्यापारे । नेत्रे विरोदनाताम्रे । क्रन्दे । करुणो रोदनध्वनिः ॥[ प्रज्ञान ] बुद्धौ । प्रज्ञानमीदृग्विधमस्ति यस्य । चिह्ने । प्रज्ञानेन वृषेण विद्धि गिरिशम् । भावे करणे च ल्युट् ॥ [ भुवन ] विष्टपे । Ku. 2, 40 । भुवनाभोगभूषणमित्यादौ जलेपि ॥ 463 ॥

[ द्विजन्मन् ] त्रैवर्णिके अण्डजे तारकासु च । Kâd. I., v. 13 । त्रय एव वर्णास्त्रैवर्णिकम् । ब्राह्मणक्षत्रियवैश्याः । विनयादिपाठात् स्वार्थे ठक् । दन्ते । सद्य॰ Mh. 3, 375 ॥ [ वर्जन ] परिहारे वर्जने पृथक्करणे । खलानां सुमतिः कुर्याद्दूरादेव तु वर्जनम् । त्यागे । रायामधाद्वर्जनमर्जितानाम् । हिंसायाम् । न स्यात्कलौ वर्जनमर्जुनीनाम् c. Mh. 3, 402 ॥ 464 ॥

[ निधन ] कुले । कलिपुरि निधनाधनानि न स्युः । अन्ते लक्ष्यतः । अन्तोत्र द्वादशं स्थानम् ॥ [ सूचन, °ना ] व्यधने । सीव्यंत्ततः सूचनया कर्णपालीम् । विध्यतेनेन व्यधनम् । सीवनी ॥ अभिनये । सामाजिकाः सूचनाभिः सर्व एवात्र रञ्जिताः । संज्ञाक्रियायाम् । नयनसूचनयाप्यत्रगम्यते किमुत शब्दपरंपरया न किम् । पैशुन्यक्रियायाम् । न सूचनेभ्यो विरमन्ति दुर्जनाः ॥ 465 ॥

[ जीवन ] राजलभ्यांशे जीविते च । H. Ch. 60, 6 । तोये वर्तने च । तापे मरौ जीवनमेव जीवनम् । वर्तनं जीविका ॥ [ उद्दान ] उद्गमे ऊर्ध्वगमने । उद्दाने वाष्पपङ्क्तेः । चुल्ल्याम् । उद्दानाद्भाण्डमुत्क्षिप्य ॥ सुगन्धिगन्धनयोः शोषण इति च ॥ [ शयन ] रते । क्रान्ति° Mh. 3, 414 । शय्यायाम् । Su. 2112 ॥ 466 ॥

[ शासन ] लेखे । Ra. 3, 68 । लेखो हि संदेशप्रधानः । वस्त्रपट्टकादिः सर्वः ॥ शास्त्रे । शासनोक्तेन कर्मणा । आज्ञायाम् । Ra. 1, 30 ॥ [ वर्तनी ] वृत्तौ जीविकायाम् । कां वर्तनीमनुसरत्विह साधुमार्गः । मार्गे । V. K. p. 2, 2 ॥ [ तोदन ] व्यधने भर्त्सनादारभ्य लोहितव्युत्पादनपर्यन्ते ताडने । साहसं तु दमो दाप्यः कृते ब्राह्मणतोदने । तोत्त्रे प्राजनके । नाल° Mh. 3, 373 ॥ [प्रसून]- उभयत्रापि । Śi. 1, 66 ॥ 467 ॥

[ छदन ] दले पल्लवे । छदनान्तरितातपांस्तरून्सः । पतत्रे पक्षे । चरन्ति चित्रच्छदनाः शिखण्डिनः ॥ [ विलग्न ] लग्ने सक्ते । नमन्ति° Mh. 3, 407 । शरीरमध्ये । Ku. 1, 39 । मेषादौ । विलग्नभवनं गते । तनुस्थे प्राग्लग्नगते ॥ [ सेवन ] प्रभोराराधने । स्वामिनः सेवनप्रीताः फलन्ति ॥ 468 ॥

सेवनगृहीतानां स्वामिपटानां क्षतिः क्व दृष्टेत्यादौ सीवनेपि । इत्यादौ पाशे [ sic ] ॥ [ बन्धन ] स्नेहे । किमस्ति मे बन्धनमत्र वस्तुनि । वृन्ते पुष्पनाले । कृतं न कर्णार्पितचारुबन्धनम् c. Śâ. 145 ॥ [ नलिनी ] पद्माकरे । Ku. 4, 6 अब्जे । नयननलिनीनालापीतं° c. Su. 2057, V. A. 54, 16 ॥ 469 ॥

[ मैथुन ] संबन्धे । मेखलयोस्तत्र मैथुनं मतम् । संबन्धः श्लेषमात्रम् ॥ [ मिथुन ] उभयत्रापि । चक्रवाकमिथुनानि पीडयन् ॥ मिथुनमुपगतो ब्रह्मणो वज्रपाणेरित्यादौ युग्मरूढचैव राशिवाचकत्वम् ॥ [ सेनानी ] गुहे षण्मुखे ।

Ra. 2, 37 | सेनापतौ | Ku. 2, 51 | गुहे पुंसि सेनेशे तु त्रिषु || [ ह्लादिनी ] वज्रे | ह्लादिनीव विवृतस्थितिरेषा | विद्युति | तासामासीत्तमसि शरणं ह्लादिनीनां प्रकाशः || 470 ||

सल्लक्याम् | ह्लादिनीभङ्गिम् | नद्याम् | श्रान्तो याति त्वरितममरह्लादिनी-पार्श्वमश्वः | नादवति त्रिलिङ्गः | निर्ह्लादिन्या॰ Nâg. I, 12 | सल्लकी ओषधिभेदः || [अशनि] वज्रे विद्युति च अशनिः स्त्रीपुंलिङ्गः | वज्रे | Sp. 6389 | शम्पायां विद्युति च [sic] | Ku. 4, 43 || [पलाशिन्] उभयत्रापि | पलाशिनां कः सहते विजृम्भितम् || पलं मांसमश्नाति पलाशानि पत्त्राणि विद्यन्ते यस्य || 471 ||

[अरत्नि] कूर्परे बाहुमध्यसंधौ | छिन्नास्ताः प्रसरन्त्वरत्निभिरपि क्रुद्धा हि वीराङ्कुराः || [वागिनी] वागिनी समदस्यतेत्यादौ तन्वोक्त्या द्वयोरपि || [ भोगिनी ] द्वयेपि | भोगिनी भाति सुभगा नरेन्द्रास्ते चकासति || 472 ||

[ प्रधान ] धीमहामात्यात्मसु | वृत्तिः प्रधानानुगता जनस्य | प्रकृतिसत्तमयोः | Śi. 15, prakshiptaśl. 2 || प्रधाने हि कृते यत्नः फलवान्भवतीत्यादौ तु गुणापेक्षया दान्ते प्रधाने एव || 473 ||

[ जयन ] द्वयेपि | जयनमहाहवसत्वराः | संनाहः संग्रामैकसात्करणम् || [ व्यञ्जन ] लाञ्छने | अमात्यव्यञ्जना॰ Śi. 2, 56 | अत्र हि अमात्यव्यञ्जनं येषामित्यतोर्थः | निष्ठाने संस्कारके च | व्यञ्जनैः प्रववृते सुसंस्कृते वागियं रसवती कवेरिव | निष्ठानमक्षरम् | संस्कारकं दध्याद्यवयवा [?] अत्र व्यक्तयः | जात्यभिव्यञ्जकत्वाद्व्यञ्जनशब्दवाच्याः | यथा | सामान्यव्यञ्जने व्यक्तिरित्यादौ || 474 ||

वादित्रकरणे पुंसि | व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धामुना | तथा च भरताचार्यः | विस्तारकरणश्चैव आविद्धो व्यञ्जनस्तथा || [कौलीन] लोकवादे | Me. 109 | पश्वहिपक्षियुद्धे | कौलीनकेलिसमये समये क्षितोभूत् || 475 ||

[ उद्यान ] राजमार्गवनभेदयोः | उद्यानविहितक्रीडाश्रूडाचुम्बितमस्तकाः | प्रयोजनेन्वेष्यम् || [वितान] करकुके | Ki. 3, 42 | क्रतौ | Śâ. 83, d | तुच्छे | चित्ते तेतिवितानमारमति चेद्देवं भवानीपतिम् || 476 ||

मन्दे । पाण्डुत्वादनुमीयते तव सखे चित्तं वितानं मया । शून्येपि । Śi. 3, 50 । विस्तृतौ विस्तारे ना पुंलिङ्गः । प्रसिद्धमाताननवितानत्वात् ॥ [उत्थान] गृहान्तोद्यमपौरुषेषु । उत्थाने सुजने जनस्य रमते चेतो यथा सद्मनि । तन्त्रे राज्ञश्चतुरङ्गसाधने । उत्थाना° Mh. 3, 351 । संनिविष्टोद्गम आसीनस्य ऊर्ध्वक्रिया ॥ 477 ॥

[व्युत्थान] प्रतिरोधे प्रत्यक्षतद्योगादेश्चलने । प्रत्याहाराद्यसंस्पृष्टो विशेषोस्तिं महानयम् । योगिभ्यो भक्तिभाजो यद्व्युत्थानेपि समाहिताः ॥ विरोधे । व्युत्थानं° Mh. 3, 412 ॥ [अञ्जन] कज्जले । Ku. 1, 47 । आञ्जनेयेन तत्त्वत इत्यादौ कपेर्हनूमतो माता अञ्जना ॥ अञ्जनभूभृद्भाति यथायं परिपतदभिनवदिनकरकिरण इत्यादावञ्जनसंबन्धादेव तद्युक्ते पर्वतविशेषे ॥ 478 ॥

[प्रभिन्न] अनेकतां प्राप्ते । M. St. 7 । जातमदे उत्पन्नमदे हस्तिनि । Ku. 5, 80 ॥ [लाङ्गलिन्] द्वयेपि । लाङ्गलि° Mh. 3, 400 ॥ [जनन] कुले जन्मनि च । जननजने नयनानां ह्लादकमाप्याय नास्ति संतोषः ॥ 479 ॥

[वर्धन] छेदे । M. 2, 29 ॥ [अर्जुन] वृक्षभिदि । M. M. 313, 5 । गवि । अस्ते पुञ्जितमर्जुनीकुलमपस्तम्बे पलाशेगर इत्यादौ [sic; c. Mh. 3, 453] ॥ 480 ॥

शुक्ले । Śi. 1, 6 ॥ [केतन] गृहे । जनस्य साकेतनिकेतनस्य c. Ra. 5, 31 । केतौ ध्वजे । Ku. 5, 84 । निमन्त्रणे । पूर्वेद्युः° Mh. 3, 360 ॥ 481 ॥

[समान] सति साधौ । समानः कोपि जायते । सह मानेन वर्तत इति कृत्वा ॥ तुल्ये । समानान्सुहृदश्च बन्धुभिः । एकस्मिन्नसाधारणे । समानस्थानलाभेन हर्षमापत् ॥ [विमान] व्योमयाने । Ra. 14, 20 । देशं समुत्तुङ्गविमानभाज इत्यादौ सप्तभूमे वेश्मनि । सप्त भूमयः कक्ष्या यस्य । कृष्णो° Kârikâ Pâ. 5, 4, 75 इति व्युत्पत्त्या ॥ 482 ॥

[तपन] अर्के । तपति ललाटं तपस्तपनः c. H. Ch. 51, 5 ॥ [प्राचीन] प्रान्ततो वृतौ । प्राचीनप्रतिरुद्धः ॥ 483 ॥

प्राचीनमलकोपमानित्यादौ प्राग्भवे ॥ प्रान्ततो वृतिः पर्णिकाख्या । प्राग्भवे दिशि देशे काले वा । विभाषा° Pâ. 5, 4, 8 इति खप्रत्ययः ॥ [प्रच्छन्न]

अन्तर्द्वारे खडक्किकायाम् । अनेन संजनेन प्रच्छन्नेन निर्गत्य । रहसि । Sp. 2173 । छादिते । भ्रमरप्रच्छन्नमज्ञाकरम् । गूढे । प्रच्छन्नं वहति दृढं चिरं च वैरम् ॥ [श्वसन] मरुति वायौ श्वासयुक्ते च । श्वसनमरुजवं [?] संत्यजोर्ध्वप्रवृत्तम् ॥ 484 ॥

कामाग्निः श्वसनेन दीपित इत्यादौ मरुवकेपि । मरुवकं पुष्पभेदः ॥ [पूतन] भूतभेदे स्त्रीपुंलिङ्गः । M.M. 342, 4 ॥ [स्यन्दिनी] लालायाम् । तं स्यन्दिनीलिप्तमुखं कुमारम् । निम्नगायाम् । सा वृन्दारकवृन्दवन्दितजला संक्रन्दनस्यन्दिनी ॥ 485 ॥

[गोस्तनी] गोस्तन्यां [sic] कपिलायां द्राक्षायाम् । संजातो° Mh. 3, 364 । [गोस्तन] हारभेदे । तस्याः कम्पितगोस्तनस्तनतटी ॥ [धमनी] नडीनडयोस्तृणभेदयोर्धमनीधमनशब्दौ निघण्टौ प्रसिद्धौ । अग्न्युद्दीपनभाण्डे । मुखेनोपधमेदग्निं धमन्यन्तरितेन तु ॥ [डयन] नभोगतौ । K.K.S. 1, 67 ॥ 486 ॥

कर्णीरथे । डयनगतः स ददर्श मार्गवृक्षान् । कर्णीरथो दोलाकारो वाहनविशेषः ॥ [मार्जनी] पांसुशोधन्याम् । मार्जनीरेणुकेशाम्बु हन्ति पुण्यं पुराकृतम् ॥ [मार्जन] उपस्पर्शे आचमनादिके । ततः कुर्यात्प्रमार्जनम् । उत्पुंसने भस्मादिशोधने । सप्तभिर्मार्जनैः शुद्धचेल्लोहं [sic] विण्मूत्रवर्जितम् ॥ 487 ॥

[मार्जना] आसीना किमपि स्थिता ननु सखे प्रस्तूयतां मार्जनेत्यादौ वाद्यपिण्डद्याम् । मृदङ्गमुखे मृदितभक्तादिदाने । तत्परीक्षार्थेवादने तूपचारात्रूढः ॥ [कुण्डलिन्] द्वयेपि । जात्यैव° Mh. 3, 359 ॥ 488 ॥

[तपस्विन्] शान्ते । Ku. 3, 34 । मत्स्यां निघण्टौ प्रसिद्धः स्त्रीलिङ्गः ॥ [संधिनी] द्वयेपि । आविकं संधिनीक्षीरं न भोक्तव्यं द्विजातिभिः c. M. 5, 8 । वृषाक्रान्ता लग्नगर्भा ॥ 489 ॥

[हायन] वत्सरे । M. M. 152, 1 । अर्चिषि । लेलिह्यमान° Mh. 3, 429 ॥ [क्रन्दन] द्वयेपि । किं° Mh. 3, 355 ॥ [व्यसन] विपत्तौ मरणे । रिपुव्यसनवर्धितः पृथुलहर्षबाष्पाकुलः । अशुभे । व्यसने यो जयेच्छत्रुम् । भ्रंशे । नाशे पाते च । Ki. 3, 45 । पानस्त्रीमृगयादिषु । राजा दुरन्तैर्व्यसनैर्विहीनः c. Ra. 18, 13; K. N. 15, 1 ॥ 490 ॥

दैवानिष्टफले। व्यसनिनं त्रातुं समग्रं जनम्। सक्तौ। वनमवनं व्यसनमव्यसनम्। क्रोधदूषणं क्रोधजो दोषः। वाक्पारुष्यदण्डपारुष्यार्थदूषणानि॥ [ साधन ] निवृत्तौ निवर्तने। विधानमारब्धमसाधनं वृथा। दापने। साधनं द्विगुणं कार्यमृणिकस्योत्तमे दमे। सिद्धौ निष्पत्तौ कर्तृव्यापारे। स्वार्थ॰ Mh. 3, 425। गतौ। गङ्गातीरे साधनं सिद्धिहेतोः। अनुगमे अनुव्रज्यायाम्। गुरूणां साधनं कार्यमुदकान्तागिति स्थितिः c. Śâ. 54, 21; Bhâshya Pâ. 1, 4,56। धने। तपस्वि॰ Mh. 3, 426॥ 491॥

उपाये उपकरणे। Ku. 5, 52। कारणे। Ra. 3, 13। सैन्यरूपे उपकरणे। Ra. 4, 36। कारके क्रियाभिर्निर्वर्तके। Śi. 9, 6। बभूव॰ Ku. 5, 22 इत्यादि च सर्वमुपायग्रहणात्स्वीकृतम्॥ मृतसंस्कारे दाहादौ। शरीरसाधनं कार्यम्। वधे। अहन्यहनि भूपालः कुर्याच्चौरस्य साधनम्। व्यञ्जकवृत्त्या मेढ्रे। न साधनोन्नतिर्या स्यात्कलत्ररतिदायिनी॥ [ अयन ] पथि। स्निग्धस्य सूक्ष्मेष्वयनेषु लीनं स्वेदस्तु दोषं नयति द्रवत्वम्। सूर्यस्य दक्षिणगतावपि। Ra. 16, 44। सूर्यस्योदग्गतौ। उदगयने शशिसूर्यौ वक्रेन्यस्निग्धविपुलाश्च॥ 492॥

[ पवन ] कुलालपाकस्थाने। अग्नेस्तेजसातपेभिनिवेश्य पवने महावीरम्। प्रभञ्जने। Śi. 4, 36॥ [ सवन ] सोमस्यौषधिराजस्य निर्मथने। एतस्मिन्सवनविधूतपापे। स्नाने। मध्यंदिनसवनवेलां नातिक्रामेत्। यजने। H. Ch. 16, 4॥ 493॥

[ वामन ] काव्यालंकारभूरुर्वी वामनेनैव धारितेत्यादौ दिग्गजे। आलंकारिकभेदेपि॥ विष्णौ। Ra. 11,22। निखर्वे। Ra. 1, 3। वामनोलंकारभेदः॥ [ शमन ] अन्तके। असिभुजगविभूषणस्तथासावरिशमनो जयतु क्षितीशबाहुः। वधे। विवर्जयेद्यः शमनं पशूनाम्॥ [ जघन ] कटौ। स्फीतप्रथिम्नि जघने गुरुपाटलिम्नि बिम्बाधरे॥ 494॥

पश्चादर्थे। पश्यन्ति यत्र रिपवो जघनं हयानाम्। नितम्बाग्रे। Me. 41॥ [ कौपीन ] गर्ह्ये। उत्सर्पत्पीनकौपीननाशिताशेषपौरुषः। गुह्ये। Bâ. II, 2। गुह्यस्थे तूपचारात्॥ [ देवन ] अक्षे। देवनाच्छलकृतो हि किमत्र। त्रयेपि। प्रकटीकृतदेवनान्कुरून्॥ 495॥

[मदन] मधूच्छिष्टे। मदनगोलकमृष्टरदच्छदाः। वसन्तवृक्षयोः। उपययौ॰ Mh. 3, 389। मदकारी सामान्येन यः कश्चित्तत्र त्रिलिङ्गः। मधूच्छिष्टं सित्थकं [sic] तत्र केचन मदनशब्दमाहुः। तत्र च मद मुचि कल्के इति धातुरन्वर्थः साधकः ॥ 496 ॥

[वेदना] अनुभवे। संमू॰ Mh. 3, 414 ॥ [यापन] त्यागे। प्रबलशत्रुपराभवशङ्कया यदि करोति धनस्य स यापनम्। वर्तने अतिवाहने। मुक्त्यर्थी यत्रतत्रस्थः कुर्याज्जीवस्य यापनम्। यापनं च यापना च ते यापने इत्युत्पत्त्योभयलिङ्गत्वम् ॥ [कल्पना] कर्तने छेदनक्रियायाम्। श्मश्रुकेशनखदैर्घ्यकल्पना। कर्तने छेदनभाण्डेपि। यावन्न सेव्यते शंभोर्भक्तिः संसारकल्पना। क्लृप्तौ रचनायाम्। आकल्पकल्पनासज्जाः। उद्देशे ब्राह्मणार्थं वस्तुस्थापने। अर्घपाद्यादिकल्पनाम्। गजसज्जने शृङ्गारणे। कल्पनासज्जसेनानीनीतिबन्धुरबन्धुर इत्यादौ ॥ 497 ॥

विकल्पे। विधूतकल्पनाजालेत्यादौ। आकलने। त्याज्याः संसारकल्पनाः। विधाने। दिव्येयं कल्पना धातुः। विभाजने। विध्यर्थवादमन्त्रार्थनामधेयादिकल्पना ॥ [स्पर्शन] समीरणे। स्पर्शनं हि क उपैति चक्षुषा। स्पर्शे। गोः स्पर्शनं ब्राह्मणतर्पणं च c. Mh. 3, 421। दाने। स्पर्शनं पुण्यदर्शनम् ॥ 498 ॥

[गन्धन] द्वयेपि। तद्गन्धनं प्रोद्धुरकंधराणां नैवाद्रियन्ते सुजनाः खलानाम् ॥ [संतान] संततौ प्रवाहे। अस्यां॰ Mh. 3, 423। देववृक्षे वृक्षसंतानाद्धिपुष्पे [?]। Ku. 7, 3। अपत्ये। Ra. 2, 65। गोत्रे। संतान॰ Mh. 3, 422 ॥ 499 ॥

[स्तनन] कुत्सिते ध्वाने अम्भःस्थशब्दे। स्तननितम्बभरात्स्तननं मुहुः। देवशब्दे। दुन्दुभिस्तननपुष्पवर्षणैरन्वमोद्यत भवः सुरैरपि ॥ [सज्जन] इभसज्जीकरणे साधौ च। किं दुष्करं भवति सज्जनसंस्कृतानाम् ॥ 500 ॥

पटगुल्मे सेनासंनिवेशविशेषे। सेर्ष्येपि सज्जनमुखे सुखमेत्यधीरः ॥ [चेतन] प्राणिनि। Me. 5 ॥ [तेजनी] मूर्वातेजोवत्यौ औषधिभेदौ। शाणोपले। केनासिर्वा रणभुवि रसत्तेजनीलीढरूढः ॥ [तेजन] वेणौ शरे वा। हिमवति तेजनसरलेङ्गुदीकान्ते ॥ 501 ॥

[ पिशुन ] स्पृक्का दुरालभा । दुष्टे जने । Sp. 4931 । सूचके । Ku. 8, 86 v. l. ॥ [ वेष्टन ] द्वयेपि । अस्पृष्टालकवेष्टनौ ॥ [ शकुन ] द्वयेपि । अवामवाशितशकुनसूचितशकुनः ॥ 502 ॥

[ वृजिन ] केशे । क्वचन विजने कूप्रवृजिन इत्यादौ । चर्मणि । वृजिनप्रावरणान्व्यधादरीन् । किल्बिषे । Bhag.4,36 ॥ [ भूतात्मन् ] धातरि । स ते भगवान्भूतात्मा श्वःश्रेयसं दास्यति ॥ 503 ॥

[ संस्थान ] आकृतौ टङ्के । संस्थानमास्थाय मनो जहार । मृत्यौ संनिवेशे च । मालाकार इव स्वयं स विदधे संस्थानमुच्चैर्द्विषाम् । चतुष्पथे । स तस्मै अपदिशति अमुष्मिन्संस्थाने हस्तदक्षिणो ग्रहीतव्यः ॥ [ विच्छिन्न ] द्वयेपि । Śr. Ch. 2, 51 ॥ 504 ॥

[ आसन ] करिस्कन्धे । आसना॰ Mh. 3, 349 । पीठे । Ki. 2, 57 ॥ [ मलिन ] समले । Su. 3049 । एनसि पापे । मलिनैः पापकर्मभिः ॥ [ आराधन ] साधने । न्यस्या॰ Mh. 4, 159 । तोषणे । शंकराराधनं धनम् । उपासायाम् । Ku. 1, 58 ॥ 505 ॥

[ अधिष्ठान ] पुराध्यासनयोः । उच्चैस्त्वेकस्तूर्णमस्तापगाभ्यः साधिष्ठानास्ते किमाश्चर्यमत्र ॥ [ आतञ्चन ] प्रतीवापे द्रवद्रव्यस्य भाण्डाद्भाण्डान्तरक्षेपे आप्यायने वा । सुधारसातञ्चनचञ्चुचञ्चचन्द्रांशुशुभ्रीकृतचन्द्रलेखाः । जवने वेगे । आतञ्चनं पञ्चशरस्य बाणाः संप्राप्य शीघ्रं भुवनं जयन्ति c. Mh. 4, 161 ॥ 506 ॥

[ आस्कन्दन ] रणे । आस्कन्दने॰ Mh. 4, 162 । आक्रान्तौ बलात्स्वीकारे । एते हठास्कन्दनमन्तरेण रणेषु योग्या न भवन्ति वाहाः । शोषणे प्रापणे वा । ग्रीष्मा॰ Mh. 4, 162 ॥ [ चित्रभानु ] द्वयेपि । सांध्य॰ Mh. 4, 173 ॥ [ पृथग्जन ] द्वयेपि । Ki. 14, 24 ॥ 507 ॥

[ अभिजन ] कुले । Ku. 1, 26 । जन्मभूमौ । यः कन्यकुब्जाभिजनः स राजा ॥ [ समापन ] द्वयेपि । राजा॰ Mh. 4, 197 ॥ [ अपदान ] खण्डने । सौन्दर्यमालोक्य विलोलचक्षुषामात्मापदानं विधुना विधीयते । अद्भुतकर्मणि । Ku. 7, 48 ॥ 508 ॥

[ निर्वासन ] मारणेपि । मोक्षे चित्तमिव व्यधात्स बहुधा निर्वासनं विद्विषाम् ।। [ घनाघन ] शक्रे घातुके वा । परमदानवलोकघनाघनाः । मत्तेभवर्षुकाब्दयोः । घनाघना नीलघनाघनप्रियां प्रियामिमामुत्सुकयन्ति यन्ति च ।। 509 ।।

[ अभिमान ] अर्थादिदर्पे । Ki. 2, 13 । ज्ञाने । दृढाभिमानेन विना न मोक्षः । प्रणये । प्रिया० Mh. 4, 156 । हिंसायाम् । यः श० Mh. 4, 156 ।। [ आवेशन ] आवेशे । दर्पा० Mh. 4, 161 ।। 510 ।।

[ निरसन ] द्वयेपि । निरसनमरिसार्थस्याथ चक्रे स तत्र ।। [ विरोचन ] चन्द्रे । वैरोचने महसि मुक्तशुचश्चकोराः । अग्नौ । दध्रे विरोचनरुचिं निकरो जटानाम् ।। [ विश्वकर्मन् ] मार्ताण्डे । अब्जानामिव विश्वकर्मकिरणाः । सुरशिल्पिन्यपि । स्वकीयं निन्दति व्याधो विश्वकर्माणमर्जुनम् c. Mh. p. 51, 8 ।। 511 ।।

[ निर्यातन ] वैरशुद्धौ । निर्यातनं यातनया रिपूणाम् । दाने । निर्यातनं धनततेः स विधाय पात्रे । न्यासार्पणे निक्षेपप्रतिदाने । ज्ञात्वा० Mh. 4, 177 ।। [ अभिपन्न ] अपराद्धे प्रमादवति । अभिपन्नेषुरभूद्यथार्जुनोपि । अभिग्रस्ते । औचित्यं खलताभिपन्नहृदयः कुर्यात्कथं दुर्जनः । व्यापद्गते । त्राणं यदभिपन्नस्य व्रतमाहुर्मनीषिणाम् । द्रुते अभिद्रुते । अभिपन्नं बलवता दुर्बलं हीनसाधनम् c. Sp. 500 ।। 512 ।।

[ आयोधन ] निघाते । शस्त्रा० Mh. 4, 159 । द्वयेपि युद्धे च। Ra. 5, 71 ।। 513 ।।

[ सनातन ] नित्ये । K. N. 2, 42 । विष्णौ । ददृशे तेन सनातनः क्षणात् ।। [ स्तनयित्नु ] द्वयेपि । यत्नोयं स्तनयित्नुना विरचितो मन्ये तदुच्छित्तये ।। [महासेन] द्वयेपि । अपरित्यक्तकुमारभावेपि महासेन इत्यादौ ।। 514 ।।

[ आत्मयोनि ] ब्रह्मणि । Ki. 3, 7 ।। [ विहनन ] पिञ्जे विप्लवे । वने विहननाकुले । वधे । विहननमबुधाः शत्रोरिच्छन्ति पराक्रमान्न बुद्धिबलात् ।। [ प्रतियत्न ] संस्कारे सतो गुणान्तराधाने । प्रतियत्नमपेक्षते नहि प्रतिभातत्त्वसहोदरी सभा । लिप्सायाम् । मिथ्यैव कुरुते मूढः प्रतियत्नं धनं प्रति ।। 515 ।।

[ अपाचीन ] विपर्यस्ते अन्यथादृष्टे वस्तुनि । सोपाचीनानि पश्यति Sp. 5360 । अपाक्पश्चादित्यस्यार्थे । सेवेत पाठे प्राचीनमपाचीनमतोन्यदा ॥ [ सारसन ] मेखलायाम् । विश्वंभरासारसनायमाना पुपोष लोकत्रयसामरस्यम् । उरस्त्रे । Śi. 3, 10 । कञ्चुकमात्रेपि ॥ 516 ॥

[ उत्पतन ] उत्पत्तौ । लोकत्रयोत्पतनहेतुतया तवायं लोकः करोति हृदयं प्रणतिप्रवीणम् ॥ [ आकलन ] ग्रहणे स्वीकारे । कलनायां चिन्तने वा । गूढार्थाकलने भाव्यं सावधानेन धीमता ॥ 517 ॥

[ प्रवचन ] वेदे । AK. II, 7, 10 । व्याख्याने सुवचसि शोभने वचने वा । प्रवचनचर्चाचतुरे परिचयमुचितं न मुञ्चन्ति ॥ [ प्रतिमान ] प्रतिच्छायायां प्रतिबिम्बे । किं तस्याप्रतिमानमानमहसः सिंहस्य गण्यो गजः । गजदन्तान्तराले । Śi. 5, 36 ॥ 518 ॥

[ सामिधेनी ] ऋचि समिधां प्रक्षेपणमन्त्रे । सामिधेनीरनुब्रुवन् । समिधि प्रक्षेप्ये काष्ठे । दूरेप्यशङ्कितधियः कुशसामिधेनीर्नीरं च पुष्पफलमूलमुपाहरन्ते ॥ [ अग्र्यजन्मन् ] द्विजे ब्राह्मणे । M. 10, 75 । अग्रजे ज्येष्ठे । अग्रजन्मा यदा तिष्ठेदादध्यादनुजः कुशम् ॥ [ अनूचान ] द्वयेपि । Ku. 6, 15 ॥ 519 ॥

[ कात्यायनी ] काषायवस्त्रावनद्धायां [sic] तपस्विन्याम् । कात्यायनी नीतिविशारदा च । उमायाम् । कात्यायनी जरढकेसरिणाहरन्तीत्यादौ ॥ [ निशमन ] द्वयेपि । निशमनमपि पाप्मनां निषिद्धम् ॥ [ प्रयोजन ] कार्ये । Ku. 3, 1 । हेतौ । तदुच्यतामागमनप्रयोजनम् ॥ 520 ॥

[आवर्जन] दाने । अर्थावर्जनमन्तरेण न भवेत्पुण्यस्य वृद्धिः परा । नतौ मनोहृतौ वा । आवर्जनेन जनसंसदि सज्जनानाम् । भ्रंशेपि । योगीव पृथिवीनाथः परावर्जनपण्डितः ॥ [संमार्जनी] शोधन्याम् । संमार्जनीभिः परितः क्रियन्ते विसूत्रितैकावलिमौक्तिकानि N. Ch. I, 27 ॥ [ संमार्जन ] क्षालने । संमार्जनं तत्कथितं मलानाम् । लेपने संस्कृतौ च । त्वद्धामसंमार्जनजीर्णपाणिः ॥ 521 ॥

[ राजादन ] उत्कृष्टभोज्ये । राजादनं पुण्यकृतो लभन्ते ॥ [ उपधान ] दृष्टान्ते गण्डके मूर्धाधारे च । Śi. 2, 77 । प्रतिबिम्बे प्रतिफले तत्समर्पके वा । अन्यत्वमुपधानानि स्फटिकस्येव कुर्वते ॥ 522 ॥

[ विश्वक्सेन ] हरौ । विश्वक्सेनं सेनया सोभ्यगाच्च । गणेत्र तत्संबन्धेत्र ॥ [ क्रतुध्वंसिन् ] शिवे । नमोस्तु ते क्रतुध्वंसिन्सर्वकामफलप्रद । दानवे । नात्र क्रतुध्वंसिनमाद्रियन्ते ॥ 523 ॥

[ प्रसाधनी ] कङ्कतिकायाम् । Mh. 4, 183 ॥ [ प्रसाधन ] आराधनमण्डनयोः । H. Ch. 6, 1 । अर्जने । अर्थप्रसाधनमनन्यधिया प्रचिन्त्यम् ॥ [ कृष्णवर्त्मन् ] द्वयेपि । कृष्णवर्त्मास्यदहन इत्यादौ ॥ 524 ॥

[ उपासन ] त्रयेपि । Mh. 4, 163 ॥ 525 ॥

[ व्यालग्राहिन् ] द्वयेपि । Sp. 6329 ॥ [ मातुलानी ] मातुलप्रियायाम् । M. 2, 131 । भङ्गायामोषधिभेदे । Mh. 4, 187 ॥ [ प्रदीपन ] ओषधिरेव त्रस्यैव [?] प्रसिद्धा ॥ 526 ॥

[ प्रतिपादन ] बोधने । शास्त्रस्य शिष्यप्रतिपादनं न यदित्यादौ [?] । प्रतिदाने । फलं तु पात्रप्रतिपादनं श्रियः ॥ [ हरिचन्दन ] कुङ्कुमे ॥ Ku. 5, 69 ॥ 527 ॥

[ अन्तावसायिन् ] द्वयेपि । अन्ता° Mh. 5, 24 ॥ [ अतिसर्जन ] वधे । विविधप्रणत्यातिसर्जनप्रियाः [ sic ] । दाने । अर्थातिसर्जत्पुण्या पुण्यसमाश्रयेत्यादौ [ sic ] ॥ [ अपमार्जन ] शुद्धौ । त्रिराचामेदपः पूर्वं द्विः कार्यमपमार्जनम् c. M. 2, 60 । त्यागे । शत्रूणामपमार्जनं यदि भवेशाभ्यन्तराणां [ sic ] तत इत्यादौ ॥ 528 ॥

[ उपस्पर्शन ] स्पर्शे । यूपोपस्पर्शने स्नानम् । स्नानाचमनयोः । कृतोपस्पर्शने शुचौ ॥ [ अभिनिष्टान ] अक्षरे । नासिक्यत्व [?] अभिनिष्टाना निर्यान्ति ॥ 529 ॥

[ मेघवाहन ] द्वयेपि । मूर्तिमानपि स मेघवाहनः ॥ 530 ॥

[ पवनाशन ] द्वयेपि । पवनाशना अकुटिलाः ॥ [ प्रतियातना ] प्रतिबिम्बे । H. Ch. 78, 5 । प्रतिबिम्बद्वारेण प्रतिमायामपि । H. Ch. 63, 18 । प्रतीकारे । K. Pr. 293, 2 ॥ 531 ॥

[ हट्टविलासिनी ] वेश्यायाम् । नेत्राञ्जने हट्टविलासिनीनाम् ॥ [ जपा ] द्वयेपि । Pa. 824 c. Su. 726 ॥ [ कम्प ] कम्पः को वा गुरुस्ते भवतु बलभिदा जृम्भितेनात्र याहीत्यादौ भयवेपथुसात्त्विकभावभेदवरुणेषु यथासहृदयत्वं व्याख्येयम् c. Dhv. 104, 10 ॥ **532** ॥

स्वरभेदो गान्धर्वशास्त्रप्रातिशाख्यशास्त्रादिषु कृतलक्षणः ॥ [ रूप ] ग्रन्थावृत्तौ । अयुग्मैः संपठेद्रूपैर्युग्मैः रक्षसगामि तु [ sic ] । मृगसौन्दर्ययोः । क्रूराकारमपि रूपसंपन्नम् । शब्दे । संबोधने चोशनसस्त्रिरूपम् Kârikâ Pâ. 7, 1, 94 । नाटकादौ आकारे च । H. V. 1, 2 । स्वभावे । तद० Mh. 2, 294 ॥ **533** ॥

[ त्रपु ] रङ्गे सीसके वा । विचलत्त्रपुकर्णवेष्टने । एतौ लोहद्रव्यभेदौ ॥ [कल्प] विधौ न्याये [ sic ] वा । स एव प्रथमः कल्पः । संवर्ते प्रलये । Sp. 7371 । ब्रह्मदिने । अनेककल्पजीवी यः ॥ **534** ॥

[ कूप ] गर्ते । एतन्मूषककूपनिर्गतमहामृत्स्नाकुलं वैरिणाम् । उदपाने । H. Ch. 49, 1 । गुणवृक्षके नौबन्धनकाष्ठे । नौः कूप० Mh. 2, 288 ॥ [ क्षेप ] क्षेपणे । Me. 47 । अवज्ञायामपि । क्षेपोन्ये न विहस्यान्यं युक्त्या चक्र—वारितेत्यादौ ॥ [ लेप ] लेपने । स्तनान्तरे चन्दनपङ्कलेपः । मृत्क्रियायाम् । लेप० Mh. 2, 295 । प्रत्युप्तेव० M. M. 166, 4 इत्यादौ मृत्क्रियात्वोपचारात् ॥ **535** ॥

[ शाप ] आक्रोशे वाक्पारुष्ये । Ra. 1, 78 । शपथे सत्यंकारे । त्वत्० Mh. 2, 296 ॥ [ पुष्प ] द्वयेपि । पुष्पितवल्लीसंसक्ताः ॥ [ गोप ] वल्लव्यां गोधारिकभार्यायां द्विलिङ्गकः । गोप्यैवं कथितः सलेशमत्रतांद्गोष्ठे हसन्वो हरिः c. Dhv. 98, 4 । शारिवा ओषधिभेदः । तत्र च स्त्रियामेव । पातरि रक्षके गोष्ठाध्यक्षे च । Śi. 6, 49 ॥ **536** ॥

ग्रामवृन्दपतौ । कुलानि श्रेणयो गोपाः शिल्पिनो वाणिजास्तथा । पात्रादिषु गोपायते इति गोप इत्यादि स्त्रियां गोपाशब्दः । गोष्ठाध्यक्षेपि । गाः पातीति पातेरातोनुपसर्गेति [ Pâ. 3, 2, 3 ] कप्रत्यये तथैव स्त्रियां गोपाशब्दः । वल्लव्यां तु जातिवाचित्वात्पुंयोगाद्वा ङीपि [ sic ? ] गोपीशब्दः c. Pâ. 4, 1, 63. 48 ।

शारिवायां जातिवाचित्वादेव गोपीशब्दः । शालिगोप्यो जगुर्यश इत्यादौ [ Ra. 4, 20 ] गोपायतेः कर्मण्यणि Pâ. 3, 2, 1 ॥ [ तल्प ] शय्यायाम् । तल्पमस्त्रल्पमुर्वी । अट्टदारेषु । यत्राधिरूढगुरुतल्पमतिग्मरश्मिं भ्रष्टप्रभं दुरितराशिरिव प्रचक्रे । अट्टः कोट्टादिप्राकारकोपरि युद्धस्थानम् । विशीर्ण° Ra. 16, 11 इत्यादौ वेश्मन उपर्याधारे । अस्मद्देशभाषया तालावशब्दवाच्ये ॥ 537 ॥

[ धूप ] द्वयेपि । H. V. 1, 1 ॥ [ वपा ] द्वयेपि । एते वपानिवसनादिव जातगन्धा धूर्ता मुदं समरभूमिमतामदन्ति ॥ [ वाष्प ] द्वयेपि । Me. 12 ॥ [ सूप ] सूपकारके । सूपैः सूपायनैरिव ॥ 538 ॥

[ शष्प ] ग्रन्थिपर्णे सुगन्धद्रव्यभेदः । व्रीहौ रूढे । क्लीवात्क्लीणीत शष्पाणि । हरित्तृणे । शष्पैरर्धावकीर्णैः श्रमविततमुख° Sâ. 7 ॥ [ विटप ] शाखायाम् । कुर्वन्त्या विटपावसक्तविलसत्कृष्णाजिनौघानिव । विस्तृतौ स्तम्बे च । वृक्षेष्वपेतविटपेषु विवृद्धिमेति । स्तम्बस्तृणादिगुच्छः ॥ 539 ॥

[आक्षेप] आकर्षणे । य उत्पलाक्षेपचलैर्विलोचनैस्तवाक्षिसापत्न्यमिव प्रयुञ्जते c. Ku. 5, 35 ॥ [उडुप] द्वयेपि । H. Ch. 52, 1 ॥ [आवाप] आलवाले । आवापेषु° Mh. 3, 430 । प्रक्षेपे । स्रस्तं शरावापमपि स्वहस्तात् । प्रक्षिप्यते अस्मिन् प्रक्षिप्यते अनेन प्रक्षेपणमिति वा प्रक्षेपः । वलये । प्रकोष्ठं शुशुभे तस्या गतमावापशून्यताम् ॥ 540 ॥

रूढे । आवापपूता प्रतिभा विभाति । प्रधाने यज्ञादौ पूर्वोत्तरत्र यो मध्यं पाति हविरादिः । तत्रावापशब्दः । नीतितन्त्रे । Bâ. I, 24 । [ आकल्प ] कल्पने उद्देशे । Mh. 3, 432 ॥ [कशिपु] आच्छादनान्ने युगपद्भिन्नतया च कशिपुशब्देनोच्येते । द्वयेपि । सतां गृहे यत्करोषि हिरण्यकशिपुस्थितिम् ॥ 541 ॥

[ कुतप ] वाद्यविन्यासे वाद्यानां ततादीनां सज्जीकरणे । कुतपविधौ भरतः स्फुटं प्रवृत्ता इत्यादौ । दर्भकालप्रभेदच्छागरोममयवस्त्रेषु । त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः । कालप्रभेदो दिनस्याष्टमोंशः ॥ [कच्छपी] कूर्म्याम् । कच्छपीमायतां विद्यात्कूर्मं तु परिमण्डलम् । वीणायां वीणाभेदे सारस्वताख्ये । उद्गच्छत्कच्छपीध्वानश्रवणोन्मुखसंसदि ॥ कूर्मीव° H. V. I, 9 इत्यत्र कूर्मीशब्दः कच्छप्यामेव कविना भ्रमात्प्रयुक्तः ॥ 542 ॥

[कलाप] संहतौ समूहे । भुजंगमोन्नद्धजटाकलापम् । बर्हे मयूरपिञ्छे [sic] काञ्च्यां च । लसत्कलापाङ्कवृहन्नितम्बे वने च कान्ता जघने च चेरुः । तूणीरे इषुधौ । कलापयुक्तं कवचं धनुश्च ॥ [प्रताप] द्वयेपि । वत पिहितसत्प्रतापास्तेमी सालाः खलाश्च वर्धन्ते ॥ [सुरूप] द्वयेपि । Mh. 3, 438 ॥ 543 ॥

[प्राप्तरूप । अभिरूप] बुधरूपिणोरित्येव । द्वयेपि । प्राप्तरूपपरिभाषितं वचः कस्य चेतसि चमत्करोति न । अभिरूपाय कन्या दातव्या c. M. 9, 88 ॥ [अवलेप] द्वयेपि । H. Ch. 10, 8 । गर्हणा अवज्ञा ॥ [परीवाप] परिच्छदे परिजने सलिलस्थितौ च जलाधारे । भृतपरिवापा मुनयो वनभुवि राज्यं प्रतायन्ते । वपने केशनिवारणे । एत॰ Mh. 4, 209 ॥ पर्युप्तात्तु भाण्डाद्भाण्डान्तरक्षेपे सलिलस्थित्युपचारात् ॥ 544 ॥

[वृषाकपि] विष्णुशिवयोः । वृषे सङ्गं बिभ्रद्वसि सततं तार्क्ष्यवहने रिपोः शूलोद्भेदी प्रथम इह सन्नन्दक इति । सदा शक्तेर्भर्ता भवसि ननु मां चापि भजसे [c. 566, C.] समग्रानुग्राही प्रभवसि वृषाकप्युपमितः ॥ अग्नौ इन्द्रे दिवाकरे वा । वृषाकपिरिवातपम् ॥ 545 ॥

[मेघपुष्प] वेतसो लताभेदः । जले । मेघपुष्पविवशीकृता दिशः ॥ [उपक्षेप] द्वयेपि । पूजोपक्षेपसक्तो मे कालोपक्षेपहेतुना ॥ 546 ॥

[रेफ] द्वयेपि । पापद्विरेफाध्युषितान्वनान्तान् ॥ वाद्यविशेषे तु रेफवर्णसाधर्म्यात्प्रयोगेपि उपचाराद्रेफः ॥ [कम्बु] वलये । शङ्खकम्बुरुचिरीकृतबाहुः । शङ्खे । H. Ch. 11, 13 । शालिधूलौ । कम्बुकमिव तण्डुलककणविनिविष्टं भिन्नमप्यभिदेत्यादौ । अत्र तु नपुंसकलिङ्गः ॥ [बिम्ब] मण्डलप्रतिबिम्बयोः । Ku. 8, 61 ॥ 547 ॥

बिम्बिकाफले । Ku. 3, 56 । देवप्रतिमाद्याकारे तु प्रतिबिम्बोपचारात् ॥ [पूर्व] प्राचि देशे दिशि वा । Ra. 3, 42 । पूर्वजेषु पितृषु पुंबहुत्वे । Ra. 1, 67 ॥ 548 ॥

आद्यर्थे । Ku. 7, 54 ॥ [डिम्ब] विप्लवे । M. 5, 95 ॥ [शम्ब] मुसलाग्रस्थे लोहे लोहमण्डलके । शम्बाकृत इव क्षेत्रे बीजमाशु प्ररोहति । शम्बाकृतो दारुदण्डाग्रस्थितलोहमण्डलचूर्णीकृतः । श्रेयोन्विते पवौ च । अरालकलितापा हंसि शम्बः [sic] त्वत्तः परोत्र क इत्यादौ c. Mh. 2, 301 ॥ 549 ॥

[ कादम्ब ] द्वयेपि । कादम्बाः स्फुटमभिसस्रुरन्तरिक्षे ॥ [ कदम्ब ] संहतौ । Śâ. 39 ॥ [ द्विजिह्व ] द्वयेपि । वंशे कुटिलगतीनां द्विजिह्वतादोषरहितानाम् । [ नितम्ब ] द्वयेपि । Sp. 4811 ॥ **550** ॥

[ गन्धर्ब ] अन्तराभवसत्त्वे अन्तरिक्षवासिनि भूतभेदे । अस्माभि° Mh. 3 692 । अश्वमृगभेदयोः । राजधानीव गन्धर्वाधिष्ठिता । दिव्यगायने । Sû. 36 ॥ पूर्वद्विजिह्वगन्धर्बा वान्तेषु कैश्चित्पठिताः ॥ [ हेरम्ब ] महिषे । हेरम्बवाहनभयादपयान्ति सन्तः ॥ **551** ॥

[ कुटुम्ब ] संविभज्ये जने । Su. 498 । गेहे । M. 11, 12 ॥ [ भा ] प्रभायाम् । Su. 1999 ॥ [ कुम्भ ] कट्फलं वत्सकत्वगाख्यौषधिः ॥ **552** ॥

सावष्टम्भे ग्रहे । कुम्भापरुद्धगमनः कुपितेति कष्टम् ॥ [ शंभु ] अर्हति क्षपणकानां दैवते । शंभुः° Mh. 2, 307 । विधिशिवयोः । H. Ch. v. 1 ॥ **553** ॥

[ विभु ] स्वामिनि । Śi. 1, 3 । व्यापके । येनोद्धारे धरित्र्याः स जयति विभुताविघ्नितेच्छो वराहः ॥ [ डिम्भ ] शिशौ । R. K. 7, 32 । बालिशे मूर्खे । पार्थः पालालमूलः प्रविशति नगरं ग्रामडिम्भैः परीतः ॥ [ स्तम्भ ] स्थूणागर्वयोः । Śi. 5, 48 । भावे सात्त्विके । देहस्तम्भः स्थगयति गतिं° M. M. 178, 5 ॥ [ स्वभू ] द्वयेपि । देया° Mh. 2, 308 ॥ **554** ॥

[ गर्भ ] कुक्षौ । गर्भस्थेन समस्तदा । भ्रूणे तदन्तरस्थे जन्तौ । Me. 9 । आशये । गर्भं न जानाति खलस्य कश्चित् । बालके । सुन्दरा गर्भरूपाः । अभ्यन्तरे । Sû. 3 । भ्रूणत्वोपचारात् । Ra. 13, 4 ॥ [ जृम्भा ] विकासे प्रसरे वा । M. M. 312, 3 । वदनव्यादाने । H. V. 1, 2 ॥ **555** ॥

गात्रविरामे अङ्गघाटने । भ्रूभङ्गोत्कम्पजृम्भा स्मितललितकृता दिव्यनारीजनेन॥

[ शुभ ] द्वयेपि । कः स्या° Mh. 2, 307 ॥ [ नाभि ] प्रयुक्त° Mh. 2, 305 इत्यादौ क्षत्रिये द्वादशराजमण्डलमध्यगते चक्रवर्तिनि विजिगीषौ जेतुं प्रवृत्ते च

राज्ञि । तथा चक्रमध्येपि ॥ प्राण्यवयवे । Ra. 7, 9; Ku. 7, 60 ॥ निर्नाभि कौशेयमुपोढबाणमित्यादौ तु भीमोपि भीमसेन इव मृगनाभौ नाभिशब्दः c. Ku. 7, 7 । नाभौ कौशेयं नाभिकौशेयमिति तु न व्याख्या । अभ्यङ्गनेपथ्ये प्राण्यङ्गोद्भवानां द्रव्याणां निषिद्धत्वात् ॥ 556 ॥

[निभ] व्याजे । कालकूटनिभात्कण्ठे कालकूटः कृतस्त्वया ॥ [सभा] संसदि गृहे वा । Ku. 7, 29 । गोष्ठ्यां सहृदयसहासनबन्धे । K. K. S. 1, 46 । द्यूते द्यूतक्रीडास्थाने । सभायामुद्योगं विदधति यथा धूर्तनिवहाः ॥ [जम्भ] रये मुखे वा । अहि° Mh. 2, 304 । अशने । सज्जम्भजृम्भं भवति क्षणेन ॥ 557 ॥

दैत्यभेदे । Sû. 1 ॥ [प्रभु] शक्ते । महेश त्वदृते नास्ति संसारोत्तारणप्रभुः । स्वामिनि । Ku. 3, 1 ॥ [रम्भा] कदल्याम् । रम्भोरु संहर रुषम् c. M. M. 268, 4 ॥ [रम्भ] वैणवे दण्डे । अमुष्य संतापमुषा महिम्ना तृष्णा प्रशाम्येद्रजसा सदैव । श्रीमन्महाहंसनिषेवितत्वाददः सरोम्भो न न रोचते मे । अत्र हि सरो रेफसहितोम्भो मह्यं रोचते स चादो दकाररहित इति व्याख्यायाम् । दम्भो न रोचतेपि तु रम्भो वैणवदण्ड इति संपद्यते । रम्भस्तु वैणवदण्ड इति तु व्याख्या ॥ 558 ॥

[ककुभ] वीणाप्रसेवे वीणाधस्तात्तन्त्रीनिबन्धनस्थाने गेयभेदे ना [sic] । ककुभध्वनिनादितैः । अर्जुनद्रुमे दिशि वा । ककुभः ककुभैरिवाजिता इत्यादौ ॥ [ऋषभ] गीतस्वरे । Śi. 11, 1 ॥ 559 ॥

[करभ] कनिष्ठामणिबन्धान्तरे । Sp. 1991 । उष्ट्रे । Bh. Ś. 22 ॥ [सुरभि] गवि । Śi. 5, 64 । कामधेनौ मनोज्ञे च । Ra. 2, 3 । सल्लक्यैलवालुक्यौ लताभेदौ ॥ 560 ॥

सुरायाम् । सुरभिपानमदोत्कटमानसा । सुगन्धौ मधौ च । Śi. 6, 2 ॥ [दुन्दुभि] भेर्याम् । V. S. 25 । अक्षबिन्दुत्रिकद्वये । दुन्दुभ्या किल किं तया पतितया यद्द्रौपदी हारिता ॥ 561 ॥

[ कुसुम्भ ] महारजने पद्मके । कौसुम्भाम्बरधारिणी रतिलघुप्रालम्बमुक्ताङ्किता । करके जलभाण्डे । विस्रम्भेण कुसुम्भसंभृतजलैर्यात्रासु जग्मे जनैः ॥ [ वर्षाभू ] प्लवे । वर्षाभूमिः सवर्षा भूः प्रावृषं द्योतयत्यसौ ॥ 562 ॥

[ विष्कम्भ ] विस्तारे । विष्कम्भपष्ठभागश्च विष्कम्भत्रिगुणश्च यः । प्रतिबिम्बे । दिशः प्रकाशयत्याशु रविविष्कम्भ--- । नाटकांशे भाव्यर्थसूचकेङ्कखण्डे । शुद्धः संकीर्णो वा द्विविधो विष्कम्भकः प्रयोगज्ञैः c. Bh. N. 18, 35 ॥ [वल्लभ] दयिते । राजीविनीजीवितवल्लभस्य Vik. Ch. 1, 35 । अध्यक्षे । गोष्ठेषु वल्लभकृतातिथिविप्रियेषु । हये । Śi. 5, 56 ॥ [ विस्रम्भ ] द्वयेपि । याचन्ते ये सविस्रम्भमर्थिनः स्वजना इव ॥ 563 ॥

[ वृषभ ] द्रव्यभिद्राशकाख्यः ॥ [ आलम्भ ] स्पर्शने । दुरालम्भा हि विषयाः कण्टका इव वेधिनः । वधे । गवालम्भः कलियुगे विहितोपि न शस्यते ॥ [ आरम्भ ] द्वयेपि । Ra. 1, 15 v. l. ॥ 564 ॥

[ विदर्भ ] जने पुंसि । ततो विदर्भाधिपतेस्तनूजाम् । अभ्यन्तरे पुंस्येव । करकमलविदर्भे वैष्णवी तत्र दध्रे । कुशवियुक्तेनुसर्तव्यम् ॥ [ विप्रलम्भ ] विसंवादे । सश्रद्धमेत्य तृषिता जलविप्रलम्भा दुःखान्प्रयान्ति हरिणा मृगतृष्णिकाभ्यः । विरहे । Kd. 1, 17 । वञ्चनायाम् । कं बाधते न सुजनं खलविप्रलम्भः ॥ 565 ॥

[ किम् ] कुत्सायाम् । Ki. 1, 5 । प्रश्ने । किं किं सिंहतनूरसदृशवपुः । वितर्के । M. M. 178, 5 । प्रश्न एवाक्षेपपर्यवसायिनि । Su. 3451 ॥ [ मा ] लक्ष्म्यामपि । सदा शक्तेर्भर्ता भवसि ननु मां चापि भजसे see 545, C. । प्रमाणे । मेयानुषङ्गिनी मा च ॥ [ लक्ष्मी ] हरिप्रियायाम् । Su. 79 । संपदि । Su. 278 । शोभायाम् । Śā. 19 । ओषधिभिद्यपि निघण्टौ प्रसिद्धा ॥ 566 ॥

[ ब्राह्मी ] वाचि । चतुर्मुखमुखप्रसूतं चतुर्धा ब्रह्मेत्यादौ ॥ [ ब्राह्म ] ब्रह्मभवादौ । ब्राह्मीं कुर्यान्न वा कुर्याच्छैवीं चैव नियोगतः । आदिग्रहणादिदमाद्यर्थे ॥ 567 ॥

[ राम ] मृगभेदे । रामसेविता व्यसनता । कृष्णे । रामेण° Mh. 2, 326 । चारौ । विश्वाभिराम तव नाम सदा स्मराम । सिते । रामो यशोरामः ॥ [ पद्म ] श्र्यब्जयोः । पद्माकरास्तं गता इत्यादौ ॥ 568 ॥

संख्याभेदे निधिभेदे व्यूहभेदे च । असंख्यैः पद्मैर्यो विजितबहुसंख्यः परिवृतः । गजबिन्दुषु । नागजस्य [ sic ] चत्वारिंशद्वर्षदेशीयस्य गात्रे शोणा बिन्दवः पद्मवाच्या उत्पद्यन्ते ॥ [ धर्म ] पुण्ये देवभिदि च । Ki. 3, 4 । तत्साधनोपायै पुण्ये । Pr. P. 18 ॥ 569 ॥

स्वभावे । न शक्तिरस्तीह मनुष्यधर्मणः । न्याये । M. 8, 20 । आचारे । Ra. 1, 13 । सोमपे याज्ञिके । धर्मः स्वकर्मकुशलो नयतीह पारम् । अहिंसायाम् । न° Mh. 2, 319 । उपमायाम् । अवरेट इव ख्यातः शूद्रधर्मा स जातितः ॥ [ जामि ] द्वयेपि । Sp. 2407 ॥ भर्तृभगिन्यां तत्स्वसृत्वात् ॥ 570 ॥

[ काम ] काम्ये अभिलाषे च । Sp. 3241 । स्वैरे । Ku. 1, 50 । मनोभवे । Ra. 16, 50 । अभ्यनुज्ञाने । K. Pr. 98, 5 ॥ 571 ॥

[ यम ] अन्तके । Ku. 2, 23 । नित्यकर्मणि । M. 4, 204 । यौ यमावधिगतौ सुमित्रया इत्यादौ सहजयोः सहजातयोर्द्वयोः प्रत्येकं च तयोर्यमशब्दः । यमस्य यमस्वसुश्चैतौ [ ? ] शब्दावनेनैव निमित्तेन ॥ [ क्षमा ] क्षितिक्षान्त्योः । क्षमस्व बाल्यादुदितं क्षमापते ॥ [ क्षम ] युक्ते । Ki. 1, 45 । हिते । त्वत्° Mh. 2, 310 ॥ 572 ॥

[ श्याम ] हरिति । M. M. 161, 5 । कृष्णे । Me. 18 । निशि । K. Pr. 180, 1; c. V. Ś. III, 1 । कान्तायामप्रसूता भवेच्छ्यामा इत्यादिकृतलक्षणायां नायिकायाम् । Me. 79; c. Sp. 6542 । प्रियङ्गुलतायाम् । Me. 101 । वटभेदे । Ra. 13, 53 ॥ 573 ॥

[ समा ] वर्षे । U. R. 27, 16 ॥ [ सम ] अनुच्चनीचे देशे । क्षणप्राप्तो वेगव्युपरतिमवाप्नोति च समम् । सर्वस्मिन् । यातः समेषामुपजीव्यतां यः । सदृक्षे । Bhag. 12, 18 ॥ [ गुल्म ] सेनाभिदि । न° Mh. 2, 315 । रक्षास्थाने द्रङ्गादौ । ममापि नाम वारणस्य रक्षापेक्षीणि गुल्मकस्थानानि । गह्वरे । अशोकगुल्मे पिहितस्त्वमास्स्व ॥ 574 ॥

[ घर्म ] उष्णे गुणे । Sû. 6 । स्वेदाम्भसि । M. M. 66, 10 । ग्रीष्मे । Ra. 16, 43 । भावभिदि सात्त्विके भावविशेषे रूढ्या वर्तते । Śi. 1, 58 । आतपे । Bâ. VI, 36 ॥ [ तोक्म ] हरिन्मात्रे आर्द्रतोपलक्षके । ब्रह्म° Mh. 2, 317 । हरिते यवे । क्लीवः क्रीणीत तोक्मानि ॥ 575 ॥

| [ सीमा ] अवधौ । M. 8, 6 । स्थितौ मर्यादायाम् । सीमां° Mh. 2, 333 । क्षेत्रे । सीमाः पक्वफला विदन्ति परितः साधुर्यथा सत्क्रियाः । विषये । सीमां यदा याति दृशोः कृशाङ्गी । केशभूषणे । सीमाभूषितसीमन्ताः ॥ [ द्रुम ] वृक्षमात्रे चैद्यकुलोद्भवे च । Śi. 19, 8 । पारिजाते । द्रुममुचखान तृणवत्तदद्भुतम् । ॥ 576 ॥

[ क्षेम ] कुशले । Dhv. 77, 5 । लब्धरक्षणे । क्षेमे सुभिक्षे° Bh. Pâ. 5, 4, 68 vol. II., 438, 9 ॥ [ ग्राम ] संवसथे वसत्यन्नपानादिविशिष्टे स्थाने । Su. 1771 । गेयभेदे । Śi. 1, 10 । एतेनैव निदर्शनेन करणग्रामः समयो गत इत्यादौ वृन्दे समूहे सपूर्वक उत्तरपदीभूतः केवलस्याप्रयुज्यमानत्वात् ॥ 577 ॥

[ भ्रमि ] मोहे । K. Pr. 105, 8 ॥ [ भ्रम ] अतस्मिंस्तद्ग्रहे । Śâ. 137 । मूर्छायाम् । यष्टी° Mh. 2, 323 । तक्षभाण्डे । Ra. 6, 32 । छत्रे । शुशुभे शारदो राजा सिताभ्रभ्रमविभ्रमेण यः [ ? ] ॥ 578 ॥

[ रश्मि ] घृणौ । Śâ. 54 । प्रग्रहे । Ra. 2, 28 । वल्गायामपि ॥ [ उमा ] भङ्गायाम् । समन्ता° Mh. 2, 309 । दुर्गायाम् । Ku. 1, 26 ॥ [ भीम । भीष्म ] रुद्रे । M. St. 28 । राजभेदे । V. S. 21 । भयानके । भीमां भ्रुकुटिमाबध्नन् ॥ राजभेदे । Ki. 3, 19 । गाङ्गेयादिपदपरिहारेण पर्यायवक्रतया भयानकेपि तौ भयानकेभिधेयवल्लिङ्गौ ॥ 579 ॥

[ सूक्ष्म ] अध्यात्मविषये । S. P. 20 । अध्यात्ममन्तरात्मविषयं रूपम् । अल्पे । सूक्ष्माक्षरेक्षणदिवाशयनैश्च नित्यम् ॥ [ हिम ] शीते । Ku. 3, 33 । तुषारे । Ku. 1, 3 ॥ [ भूमि ] स्थाने आश्रयमात्रे । Ku. 5, 45 । पात्रे योग्ये । H. Ch. 18, 13 । दशायाम् । सा भूमिर्दुर्गमा नृणाम् ॥ 580 ॥

[ वाम ] योषिति प्रतिकूले च । वामा अवामा अपि नैव सव्याः । वल्गौ चारौ । Me. 9 । सव्ये दक्षिणेतरे । Me. 93 ॥ [ वामी ] अश्वायाम् । नवामी वामीभिः सदनसविधा भान्ति सुचिरम् । हार्यवस्त्वर्थवाहयुग्मकृते नेतव्यपदार्थप्रयोजनवाहनद्वयसंपादिते गन्त्र्यादौ । Ra. 5, 32 ॥ 581 ॥

[ जिह्म ] कुटिले मन्दके वा । Ki. 1, 8 ॥ [ श्रम ] प्रयत्ने खेदे वा । Ku.

5, 45 ॥ [ क्रिमि ] रोगे क्रिम्युपलक्षिते । मयोष्टकं क्रिमिकरम् ॥ 582 ॥

[ क्रम ] परिपाट्याम् । Ku. 5, 32 । कल्पे न्याये । कोयं क्रमो यत्प-रिगृह्य° Mh. 2, 310 । पादक्षेपे । K. K. S. 1, 1 । परंपरायां प्रवाहे । गुरुपूर्वक्रमाक्रान्तस्मृतिश्रवणशालिनीत्यादौ । आनन्तर्ये । Ra. 3, 7 । पदसंधौ पदमेलनायाम् । नानृषिः कुरुते काव्यं नारुद्रः क्रमपाठकः ॥ [ शमी ] शि-म्बायां फलपूर्णे शाखावयवे । न्यग्रोध° Mh. 2, 330 । द्रुमभिदि । Ra. 3, 9 ॥ 583 ॥

[ कूर्म ] प्राणिनि । Su. 1033 । यमिनामासने । निबध्य कूर्मं निगृहीत-चित्तः ॥ [ नेमि ] नीचैर्ग° Me. 106 इत्यादौ कूपाङ्गे खरटिकायाम् [ sic ] । तिनिशो वृक्षभेदः ॥ 584 ॥

[ शम ] हस्ते । षट्त्रिंशच्छमषड्भागसंमिता वेदिरुत्तमा । निजमण्डलव्यव-स्थायां राज्ञाम् । Bâ. I, 24 ॥ [ आम ] रोगे । Śi. 2, 54 ॥ [ स्तोम ] अध्वरे । अग्निष्टोमादयो यज्ञाः । स्तुतौ । शंभोः स्तोमविधौ समुद्धतधियो धन्या जनाः केचन ॥ 585 ॥

[ मध्यमा ] दृष्टरजस्कायां कन्यायाम् । मध्यमा° Mh. 3, 464 ] [ मध्यम ] गीतस्वरे मध्यमध्ये स्वरन्यासत्वात् । सुप्रतिष्ठौ स्मृतौ ज्ञेयौ द्वौ ग्रा-मौ षड्जमध्यमौ । देहमध्ये । Ku. 5, 20 । देशभेदे । देशोसौ मध्यमः ख्यात-स्त्वन्तरा हिमविन्ध्ययोः । राजभेदे । Ra. 13, 7 ॥ 586 ॥

अन्यूनानतिरिक्ते । द्वयोस्तु तज्ज्ञं प्रवदन्ति मध्यमं° c. Su. 2919 ॥ [ संभ्रम ] भये । पौलस्त्यपीनभुजसंपदुदस्यमानकैलाससंभ्रमविलोलदृशः प्रियायाः । संवेगे त्वरायाम् । ससंभ्रमा सत्त्वसुहृत्समाहितैः । आदरे । सुभ्रु किं संभ्रमेण ते ॥ [ व्यायाम ] परिश्रमे । व्यायामक्षुण्णगात्रस्य Kâś. Pâ. 6, 1, 63; Suśr. II, 139, 12 ॥ 587 ॥

पौरुषे । फलन्ति व्यायामा यदि भवति चैत्रं वशगतम् । कृत्ये चाणक्यल-क्षिते कर्तव्यविशेषे । Bâ. I, 24 ॥ [ विद्रुम ] वृक्षे । वेलातटेषून्नतविद्रुमेषु । रत्ने । Ku. I, 44 ॥ [ नियम ] यन्त्रणायाम् । आकारवांस्त्वं नियमादुपास्यो

न वस्त्वनाकारमुपैति बुद्धिः । प्रतिज्ञायाम् । इति° Mh. 3, 459 । निश्चये । अयं मे नियमो देव यस्यां दिशि स वर्तते । व्रते । Ra. 1, 94 । नियमार्थीयं योग इत्यादौ व्यावृत्तौ यन्त्रणापर्यवसायिन्याम् ॥ 588 ॥

[ विभ्रम ] हेलायाम् । Ku. 1, 4 । भरते हेलाविभ्रमादीनां भेद उक्तः स इह हेलासामान्येन प्रसिद्धत्वा - - लक्ष्यत्वाच्च न गृहीतः । भ्रान्तौ । पुंसोऽपि मृगतृष्णाया यस्यास्ति जलविभ्रमः ॥ [ विक्रम ] शक्तौ । विक्रमोर्जित° Su. 581 । क्रान्तौ । व्यञ्जितक्रम इव त्रिविक्रमः ॥ [ तलिम ] द्वयेऽपि । V. Ś. II, 23 ॥ [ आगम ] शास्त्रे । आगमास्तत्त्वशंसिनः । ग्रहणेऽपि Ra. 1, 15 ॥ 589 ॥

[ अगम ] गत्यभावे द्रुसाधर्म्यादद्रौ च । U. R. 27, 16 । दुर्गे दुर्गमे देशे । अगमशिखरारूढश्चन्द्रः कथं वद जीयते ॥ [ गौतम ] बुद्धे । गौतमेन यदुदस्यताशयं प्रोद्धृतं जगदुपप्लुताशयम् । मुनौ मुनिविशेषे । Ra. 11, 34 ॥ [संगम ] नदीसंभवे । ससंगमो यत्र समुद्रकान्तयोर्विहारवीथी ध्रुवमिन्दुलक्ष्मगः । सङ्गे । संगमविरहविवेके° Sp. 6671 ॥ 590 ॥

[ आश्रम ] ब्रह्मचर्यादौ । Ku. 5, 30 । मठे । आश्रमेषु सततप्रवृत्तान्नमन्त्रेषु । तपस्विनां स्थाने । कुसुमशरमुनिराश्रमब्रह्मचारी ॥ [ निगम ] वणिक्पथे पुरे वा । न खलु निगममार्गे याति साध्वी कदाचित् । वेदे । साम्राज्ये निगमस्य सर्वविषये शंभोरिवोज्जृम्भते ॥ [ नैगम ] वणिजि नागरे वा । पुराणि श्रेणयश्चैव शिल्पिनो नैगमास्तथा ॥ 591 ॥

विप्रे । नैगमाः सानुमन्तः ॥ अतस्त्रिष्विति । त्रिष्वित्येतत्परमशब्दं यावदनुवर्तते ॥ [ सत्तम ] द्वयेऽपि । शृणु त्वं मुनिसत्तम ॥ [ प्रथम ] द्वयेऽपि । इक्ष्वाकुवंशयः प्रथमो° Ra. 6, 71 ॥ उत्कृत्यो° M. M. 173, 2 इत्यादौ क्रियाविशेषणत्वादादित्वमेव गम्यते ॥ [ अधम ] न्यूने गर्हिते वा । Pa. 3508, d ॥ 592 ॥

बुधस्थेऽपि । अधमावस्थितकुशला न जडा उच्चैःपदं यान्ति ॥ [अवम] एवमिति त्र्यर्थम् । न्यूने गर्हिते वा प्रतिषिद्धे । अद्य प्रभृत्यनवमाङ्गि° Ku. 5, 86 । बुधस्थेऽपि । जडैरापूर्यतेम्भोभिरवमोऽसौ किमङ्गु-

तम् ॥ [ अग्रिम ] अग्ये अग्रेभवे । अग्रिमं न परिपीडयेद्भृशम् । प्रधाने । सर्वेषामग्रिमो ब्रह्मा वृणुयात्प्रथमं तु तम् ॥ [ परम ] उत्कृष्टे । परम यो महत्तेजः परमं यो महत्तपः । अभ्यनुज्ञाने । Ku. 6, 35 ॥ 593 ॥

[ ललाम । ललामन् ] नवस्वर्थेषु ललामललामन्शब्दौ । ललामन्शब्दो नान्तोप्यर्थसाधारण्यादिह गृहीतः । उदाहरणमन्वेष्यम् । दिङ्मात्रं तु दर्श्यते। पुच्छे । लीला° Mh. 3, 398 । पुण्ड्रे अश्वस्य स्वाभाविके श्वेते मुखपट्टे । सिन्दूरपूरपरिपूर्णललामभङ्ग्या पत्युः प्रतापमिव दर्शयते वराश्वः । ललामन्शब्दो रत्ने । Ra. 5, 64 ॥ 594 ॥

[ निष्क्रम ] बुद्धिसंपदि । निष्क्रमो° Mh. 3, 458 ॥ [ परिश्रम ] व्यायामे यत्ने वा । साफल्यं भजतु परिश्रमो विधातुः । खेदे । वृथा कृथा मा स्म सखे परिश्रमम् c. Ki. 8, 7 ॥ [ अभ्यागम ] युद्धे । अभ्यागमो° Mh. 4, 214 । आभिमुख्यागतौ । Śi. 1, 23 ॥ 595 ॥

[ उपशम ] शान्तौ । प्रवाते वाते यन्नहि भवति वह्नेरुपशमः । विनीततायाम् । श्रुतमुपशमैकश्रमफलम् c. Sp. 5256, b ॥ [उपक्रम ] चिकित्सायाम् । असाध्योपक्रमा रोगा नारभ्यन्ते चिकित्सितुम् । आरम्भे । उपक्रमः संप्रति निष्फलो भवेत् ॥ नन्दोपक्रमं प्रमाणानीत्यादौ आरम्भ एव । तदाद्याचिख्यासा तु समाससंनियोगशिष्टान्नपुंसकलिङ्गादवगम्यते । चिकित्सायामुपक्रमशब्दो रूढ एव न तूपायपूर्वारम्भत्वोपचाराद्वर्तते ॥ उपधायां धर्मादिना सचिवपरीक्षायाम् । उपक्रमैरस्खलितैर्विशुद्धाः c. Ra. 18, 14 ॥ 596 ॥

[उपगम ] अङ्गीकृतौ । धर्मोपगमशुद्धात्मा । समीपगमने । उप° Mh. 4, 216 ॥ [ यातयाम ] जीर्णे । यातयामं गतरसं पूतिपर्युषितं च यत् । परिभुक्ते । दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः । अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥ 597 ॥

[ ज्या ] मौर्व्याम् । Ra. 6, 40 । भूमावपि । ज्याबद्धबाहुः स च तद्रिपुश्च ॥ [ द्यो ] नाके देवस्थाने मेरुपृष्ठादौ । द्यां नीतपौरा° Ra. 16, 9 । अन्तरिक्षे आकाशे । द्यामालोकयतां कलाः कलयतां छायाः समाचिन्वताम् । द्योशब्द-

स्यैतद्रूपम् ॥ [ गव्य ] ज्यायां गोसमूहे च गव्याशब्दः । गव्योपचारकुशलः शलभानिवारीन् । रागद्रव्ये गोरोचनाख्ये । गव्यकर्पूरकुङ्कुमैः ॥ 598 ॥

गोक्षीरादौ दध्नि । Ku. 7, 72 । आदिग्रहणाद्गवहितादौ ॥ [ अर्य ] द्वयेपि । Su. 487 ॥ [ कल्य ] सुरायां स्त्रियाम् । कल्यपालगृहं गत्वा येन्विषन्त्यासुतीबलम् ॥ 599 ॥

सज्जनीरोगदक्षेषु । कल्यः कलासु च कृती दृढभक्तिराढ्यः ॥ [ काल्य ] अहर्मुखे । काल्यमुत्थाय संस्मरेत् । प्राप्तकाले । नाकाल्यस्तु कदाचन ॥ [भाग्य] शुभे कर्मणि । अस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम् । अशुभेपि । सुखं वा दुःखं वा भवति हि नृणां भाग्यविहितम् ॥ 600 ॥

[ दाय ] यौतकादिधने सुदायादौ । प्रकृतौ° Mh. 2, 357 । दाने । M. M. 106, 8 । पैतृके भोज्ये । M. 9, 158 ॥ [ जन्य ] विवाह्याया ज्ञातिषु । समेन समयं जन्यैर्ब्रह्मदेयां प्रकल्पयेत् । विवाह्याया भृत्येषु । Ra. 6, 30 v. l. । वरस्निग्धेषु । M. M. 197, 4 ॥ 601 ॥

निर्वादे लोकवादे । तत्त्वो° Mh. 2, 353 । जनके । जन्येन तेनाजनि सुप्रतिष्ठः । युद्धे क्लीबे । Śi. 19, 13 । कार्ये उत्पाद्ये त्रिषु । अनन्यजन्यं दौर्जन्यम् । अयमुत्पादितेपि कैश्चिद्दर्शितः ॥ [ क्रिया ] आरम्भे । मन्त्रमूलाः क्रिया राज्ञाम् । निष्कृतौ । महा° Mh. 2, 344 । शिक्षायाम् । Ra. 3, 29 । पूजायाम् । Ra. 2, 16 । संप्रधारणे विचारे । क्रियां विना कोभिजानाति कृत्यम् ॥ 602 ॥

उपाये । सप्त सामादिकाः क्रियाः । कर्मणि व्यापारे । Ku. 3, 35 । चेष्टायाम् । Bh. Ś. 77, c । चिकित्सायाम् । अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् । करणे निष्पादने । Ku. 1, 7 । धात्वर्थे । विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता । आख्याते तिङन्ते धातौ । AK. I, 6, 2 । संस्कारे । Ra. 3, 10 । और्ध्वदेहिके मृतसंस्कारे । Sp. 6592 ॥ 603 ॥

[ गृह्य ] शाखापुरे मूलनगरादन्यस्मिन्पत्तने । गृह्ये श्रीमदवन्तिवर्मनगरे ते भूमिदेवाः स्थिताः । अस्वैरिणि अधीने । स्वा° Mh. 2, 347 । पक्ष्ये तद्वर्गप्रविष्टे । Ki. 2, 5 । गृहासक्ताण्डजमृगे । गृह्यकेलिकलनाकुतूहलात् ॥ गृह्या

एव न ताः पुनः पतिकुलं योग्याः समालम्बितुमित्यादौ बहिर्भवायां स्त्रीलिङ्ग एव निपातितः ॥ 604 ॥

[ रूप्य ] हेम्नि रजते वाहते टङ्करूपतां नीते। मणि° Mh. 2,370 । रजते प्रशस्ते वा । रूप्यभित्तिषु संक्रान्तप्रतिबिम्बाः पुरस्त्रियः ॥ [ माल्य ] पुष्पे तत्स्रजि वा । Ku. 7, 19 ॥ 605 ॥

[ हृद्य ] हृद्भवे । जग्राह रूप्यं व्यवहारयोग्यं हृद्योस्य शोकस्तु न निर्जगाम । हृत्प्रिये सांप्रतिकतुष्टिकरे हृदयहिते परिणामसुखदे वा । Ra. 11,68 । वशीकरणमन्त्रे । हृद्यसाधनविधौ निबद्धधीः ॥ [ सत्य ] शपथे । न पक्षपातेन वदामि सत्यम् N. Ch. 1, 27 ॥ 606 ॥

[ द्रव्य ] भव्ये योग्ये । न शास्त्रमद्रव्येष्वर्थवत् । औषधे । द्रव्यं पीत्वा तु न स्वपेत् । धने । द्रव्यसंचयपरो नराधमः । गुणाधारे । Śi. 5, 38 । गव्यन्वेष्यम् । विशेष्ये । कस्य० Mh. 2, 356 । परमाणौ । अद्रव्यमनेकद्रव्यं च द्रव्यम् ॥ [ तिष्य । पुष्य ] कलौ युगविशेषे भे नक्षत्रे च । तिष्योप्यनर्थकर इत्यतिचित्रमेतत् ॥ द्वयेपि । पुष्ययोगपरिपोषितश्रियः ॥ पुष्यरागेपि मणिविशेषे पुष्यशब्दं केचिदद्राक्षुः । स च भीमो भीमसेन इतिवद्भविष्यति ॥ 607 ॥

[ पुण्य ] धर्मे सुकृतफले । Me. 30 । सुकृते धर्मसाधने कर्मणि । पूर्वपुण्यपरिपाकलभ्यया । पूते पवित्रे मनोज्ञे रमणीये वा । Me. 33 ॥

[ सौम्य ] मनोज्ञे । क्वायं गरुत्मान्क्व च नाम सोमसौम्यस्वभावाकृतिरेव साधुः ॥ 608 ॥

[ अर्घ्य ] त्रयेपि । Ku. 1, 58 । पूजार्थं द्रव्यमुदकतण्डुलादि — र्घरूपमर्घ्यशब्दवाच्यम् । अर्घार्थं चोदकादिभिन्नं - - - ॥ 609 ॥

[ कक्ष्या ] स्पर्धायाम् । स तुल्यकक्ष्यो रिपुणा धनंजयः । काञ्च्याम् । कक्ष्यावबद्धसिचया किमियं नु शेते । गृहान्तरे । Ku. 7, 70 । एवं सप्तकक्ष्यं राजवेश्मेत्यादौ ज्ञेयम् । प्रतिज्ञायाम् । Nâg. 64 । तुलायाम् । वणि° Mh. 2, 341 । पुंसः सारसने कटीवस्त्रग्रन्थनभाण्डे । परिधानाद्बहिः कक्ष्या निबद्धा ह्यशुरीभवेत् ॥ 610 ॥

[ रथ्य ] रथोद्वाहे वाजिनि । हरिरथ्यं रथं° c. Ra. 12, 84 । मार्गे । M. M. 27, 1 । रथसमूहे । अश्वीयरथ्यागजताकुलेस्मिन् ॥ [ काय ] संघातलक्ष्ययोः शाश्वतोक्त्या गृहीतः c. Śâśv. 490. 748 । उदाहरणं त्वन्वेष्यम् । कदैवते । कायं हविर्निर्वपतीह । कः प्रजापतिर्देवतास्येति व्युत्पत्त्या ॥ 611 ॥

[ क्षय ] निलये मृत्यौ च । Su. 44, d । कल्पान्ते । क्षयकालेपि निराकुलः कृती । विशिष्टे रोगे राजयक्ष्मणि । क्षयः क्षीयेत नान्यथा । अपचये । Ki. 2, 9 ॥ [ भव्य ] सति विद्यमाने भाविनि वा । अर्थोयमर्थोत्तरभव्य एव c. Ku. 3, 18 । योग्ये । Ku. 1, 22 । शिवे कल्याणे । भव्यं भव्यमिदं कुतः परिणतं यद्दृश्यते त्वादृश इत्यादौ । फलभेदे । रे भव्य पालेवत रे चिरे रे ॥ 612 ॥

[ प्राय ] मृत्यावनशने वा । Ra. 8, 93 । बाहुल्ये । Ku. 3, 28 । सदृशे उत्तरपदीभूतः । कायं° Mh. 2, 361 ॥ प्रायश्चापं° Mc. 71 इत्यादौ प्रायःशब्दः समासान्तो निपातो बाहुल्यार्थः ॥ [ धिष्ण्य ] स्थाने । Śâ. 83 । दैत्याचार्ये । गोष्ठीषु धिष्ण्यधिषणाविव राजमानौ । वह्निभेदे अग्निविशेषे । ऋत्विजस्तत्र° Mh. 2, 360 ॥ 613 ॥

[ वैद्य ] द्वयेपि । औत्सुक्यमोहारतिदाञ्ज्वरान योपूर्ववैद्याय नमोस्तु तस्मै ॥ [ शय्या ] द्वयेपि । Kâd. I., v. 8 ॥ [ तार्क्ष्य ] द्वयेपि । वृषे सङ्गं बिभ्रद्वसि सततं तार्क्ष्यवहनः c. 545, C. ॥ [ पूज्य ] श्वशुरे । पूज्यागारे° Mh. 2, 362 । सज्जने । सदा सेव्याः पूज्याः प्रचुरतरसंतोषविभवाः ॥ 614 ॥

[ दस्यु ] द्वयेपि । दस्यूदस्यकृपाण° [sic] M. M. 188, 5 ॥ [ वर्य ] द्वयेपि । वर्याश्चाञ्चल्यचर्चायां न कुर्युर्मानसं बुधाः ॥ [ सव्य ] वामे । R. V. 1 । दक्षिणे । Ku. 3, 70 ॥ [ अर्थ्य ] न्याय्ये । Ra. 1, 59 । विपश्चिति । अर्थ्या° Mh. 2, 336 ॥ 615 ॥

[ अन्त्य ] अधमे । अन्त्येषु जन्तुषु च यस्तमसावृतेषु M. M. 39, 8; c. 373, 15 । अन्तभुवि अवसानभवे । अन्त्यगुणमादिना विभजेत् ॥ [ मध्य ] न्याय्ये । मध्ये वर्त्मनि वर्तते नहि खलो दौर्जन्यपण्याश्रयः । अवलग्ने कायस्य

मध्यमे स्थाने । Ku. 1, 39 । अन्तरे । Me. 18 । अनधिकन्यूने । K. K. S. 1, 44 ॥ [ मध्ये ] स्त्रीणां मध्येनुरागो विगलितहृदयान्नैव कस्यापि जन्तोरित्यादौ उद्दिश्यवाचक उद्दिश्यशब्दार्थप्रतिपादकः । मध्येशब्दः सप्तम्यन्तप्रतिरूपको निपातः स्त्रीणां मध्ये स्त्रियः प्रतीत्यर्थः ॥ 616 ॥

[ अन्य ] इतरस्मिन् । अन्या हि सन्ति सखि भाजनमीदृशानां वैरी भवेद्यदि न वेपथुरन्तरायः c. S. K. 27, 14 । असदृशे असाधारणे । अन्यैव काचिल्लिपिः ॥ [ त्रयी ] त्रिवेद्यां वेदत्रयीसमवेते । M. St. 7 । त्रितये । Śi. 2, 3 ॥ [ मन्यु ] दैन्ये । तीव्राभिषङ्गप्रभवेण मन्युना c. Ku. 3, 73 । क्रतौ । न° Mh. 2, 365 । क्रुधि । Ki. 1, 27 ॥ 617 ॥

[ चर्या ] पूजायां व्रतक्रियायां वा । M. M. 343, 7 ॥ [ गेय ] गातव्ये । प्रगे यो गेयानि प्रथयति पुरस्ताद्भगवतः । गायने । साम्नां° Mh. 2, 348 । भव्यगेयेत्यत्र कर्तरि निपातितः c. Pâ. 3, 4, 68 ॥ [ ययु ] अश्वे । ययुयायि ययोयेय इत्यादौ c. D. Ś. 22 । अश्वमेधाश्वे । राजन्यास्ते° Mh. 2, 367 ॥ [ मूल्य ] विनिमये एव द्रव्यान्तरप्रतिदाने । मूल्यं तस्य ससागरा वसुमती सत्यं क्रियद्वर्ण्यते । भृतिविनिमये एव । पञ्चकं मूल्यमस्य । धने । पश्चा० Mh. 2, 367 ॥ 618 ॥

[ काव्य ] ग्रहे । Śi. 2, 2 ॥ [ कुल्या ] नीरप्रणालिकायाम् । उदीर्णे शीतांशौ मकरमुखकुल्याभिरभितः प्रसर्पन्ति स्फीताः शशिमणिरसौघाः प्रतिनिशम् ॥ कुल्यातुल्यं प्रसरति सदा नेत्रयोरस्तु तस्या इत्यादौ नद्यां कुल्याल्पा कृत्रिमा सरिदित्यादौ लक्षितायाम् c. AK. I, 10, 34 ॥ [ कुल्य ] अस्थि । कुल्याभरणभूषिताम् । कुलोद्भवे । Sp. 4102 ॥ 619 ॥

[ चोद्य ] चोदनार्हे । अधीयानोप्यलब्धार्थो न चोद्यः स्यात्कथंचन । चोदने आक्षेपे अद्भुते वा । Śi. 9, 16 ॥ [ गोप्य ] दाससूनुषु । आरोप्यते० Mh. 2, 348 ॥ 620 ॥

[ योग्य ] प्रवीणे । सेवां° Mh. 2, 368 । उचिते । तूष्णीमेवासितुं योग्यं विदुषा वृद्धसंनिधौ ॥ [ योग्या ] अभ्यासे । Ra. 8, 19 ॥ [ संख्या ] एकत्वादौ । H. Ch. 3, 1 । विचारे । संख्यातीतं वेत्ति को वस्तुतत्त्वम् ॥ 621 ॥

[आप्य] द्वयेपि । अनाप्यं जलसंसर्गाद्विरुद्धं खलचेष्टितम् ॥ [याप्य] नेतव्ये । याप्यः कालो भवति विधुरे दैवयोगे कथंचित् ॥ शेषत्वादायुषो याप्य इत्यादौ नेतव्यत्वोपचाराद्रोगे दैर्घकालिके ॥ गर्हिते । M. 9, 4 v. l. ॥ [आस्य] मुखान्तरे । आस्यं° Mh. 2, 337 । आसने स्त्रीलिङ्गः । उपास्या स्यादास्या समवहितचित्तेन विदुषा ॥ 622 ॥

[पथ्या] आद्येषु त्रिषु पादो भवति भवति तु पथ्येत्येवंलक्षणलक्षित आर्याभेदः ॥ [पथ्य] औषधे । पथ्यं° Mh. 2, 360 । अगते पथः । न्याय्ये । Sp. 7131 ॥ [पाक्य] विधुरं तस्य किं यस्य पाक्यं - - - - । पाक्यरसवाक्यविचारणाभिरित्यादौ पाकार्हणे ॥ 623 ॥

[कृत्य] छेदनीये कार्ये च । कृत्यं कुकृत्यं धिषणाशलाकया । विद्विष्टे परैरवमानिते धनादिभिर्भेद्ये । तान्कृत्यानवमन्यते यदि नृपस्तत्स्यात्कृतार्थः श्रमः । यत्कौटिल्यः । क्रुद्धलुब्धभीतावमानिताः परेषां कृत्या इति ॥ [कृत्या] देवतायाम् । कृत्यां देवीमबन्धयम् ॥ [वाच्य] कुत्सिते । न वाच्यस्तेन वर्णितः ॥ 624 ॥

उपालभ्ये । Ra. 14, 61 ॥ [चैत्य] स्तूपे बौद्धदेवताभेदे । चैत्यं वन्देत स्वर्गकामः । उद्देपशादपे प्रसिद्धिहेतौ वृक्षे । Me. 23 ॥ [चय] प्राकारमूलबन्धे संचये च । प्राकारश्चयहीनः सततं विपरीततां वहति । संघे । Śi. 1, 3 ॥ 625 ॥

[साध्य] द्वयेपि । असाध्यां साध्यपदवीम् ॥ [वन्य] वनसमूहे । वन्यां जगाहे वनलब्धवर्णः । वने साधुनि । Ra. 2, 37 ॥ 626 ॥

[छाया] आतपाभावे । Ku. 1, 5 । प्रभायामपि । Kâd. 5, 11 । प्रतिमायाम् । Ra. 2, 6 । गङ्गायाम् । Ra. 13, 2 । संवाहे । छाया° Mh. 2, 351 । येन केनचित्प्रकारेण सेवकसंतोषणं संवाहः । न्याय्ये औचित्ये । यः Mh. 2, 351 । उत्तरपदीभूतः प्रायेणात्र प्रतिबिम्बार्थ एव ॥ 627 ॥

[सह्य] आरोग्ये शाश्वतेनोक्तः c. Śâśv. 485 । उदाहरणं त्वन्वेष्यम् ॥ [वीर्य] बले प्रभावे वीरकर्मणि वा । Ra. 5, 37 । रेतसि । उभे एव क्षमे सोढुमुभयोर्वीर्यमाहितम् c. Ku. 2, 60 ॥ 628 ॥

21

[ जया ] देवीभेदे । तां जयाविजयादानसंमुखीम् । ओषधिर्द्वयोर्द्वयोः स्त्रीपुंसयोः । एका जया अन्यो जयः ॥ [ जय ] भारते । ततो जयमुदीरयेत् e. g. Mahâbhâr. I, 1, 1 ! जयो नामेतिहासोयमिति वचनात् । गणे प्रमथे उत्कर्षे च । तस्मै जयाय निजवर्गजयैककर्त्रे । अभिभवे । Kd. 1, 22 ॥ [ आर्य ] ज्येष्ठे । M. Ch. I, 54, b । ब्राह्मणे । आर्यकर्म न कुर्वीत शूद्रस्तत्कर्म वा द्विजः । सज्जने । Sp. 4811 ॥ **629** ॥

[ आर्या ] छन्दोभिदि । जघनचपलाप्यनार्याः Kuṭṭ. 312, c. 757 ॥ [ चित्या ] चितायाम् । चित्यामा° Mh. 2, 349 । अग्निचयने । चित्य° Mh. 2, 349 ॥ [ सभ्य ] सामाजिके प्रत्ययिते अविसंवादके वा । Ku. 7, 29 । अग्नौ अग्निविशेषे शालाग्नौ । सभ्योग्निरिव पञ्चमः ॥ **630** ॥

[ दूष्य ] इभमध्यबन्धन्यां दूषणीये च । दूष्यो° Mh. 2, 358 । पटगृहे ! Si. 5, 21 ॥ [ सैन्य ] बले सेनायाम् । Ku. 2, 52 । तत्समवायिनि सैनिके । Si. 5, 28 ॥ **631** ॥

[ माया ] बुद्धजनन्यविद्ययोः । मायाजन्मापि° Mh. 2, 366 । वञ्चनायामिन्द्रजाले । Ra. 2, 62 । वञ्चनाविद्याधिष्ठातृदेवतायाम् । मायादेवी° Mh. 2, 366 ॥ [ जात्य ] कुलजे । चतुरगमनो यो जात्यश्वः [ sic ] स गौरिव वाह्यते Su. 283 । कान्ते उत्कृष्टे । M. M. 110, 1 v. l. ॥ **632** ॥

[ आदित्य ] सूर्ये । Ku. 2, 24 । गीर्वाणे । आदित्या व्यत्ययं हित्वा त्वां स्तुवन्ति पुरातनम् ॥ [ श्वशुर्य ] स्याले देवरे च । ज्येष्ठः श्वशुर्यः स्यालो च संमान्यौ गुरुवत्स्मृतौ ॥ [ अहार्य ] द्वयेपि । Ku. 5, 8 ॥ **633** ॥

[ नादेय ] भूमिजम्ब्वादयः प्रायो लताभेदाः । नद्यां भवे । नादेयं° Mh. 3, 482 ॥ [ जघन्य ] पश्चादर्थे । उत्तिष्ठेत्° Mh. 3, 480 । गर्हिते । Su. 2919 ॥ **634** ॥

[ प्रणाय्य ] अभिलाषविनिर्मुक्ते । ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्प्रणाय्याय वान्तेवासिने Chh. U. 3, 11, 5 । असंमते चौरादिके । अत्रामुयादसोप्यचिरेण निग्रहं समं प्रणाय्यैर्यदि संवसेन्नरः ॥ [ आशय ] आधारे । त्रिर्निमज्जेज्जलाशयम् । हृदि । निर्मलाशयतया जितं जगत् । अभिप्राये । कस्याप्यत्र परिस्फुरन्ति विदुषो गूढाशया उक्तयः ॥ [ अश्वीय ] अश्वसंहतौ । अश्वीयरथ्यागजसंकुलेस्मिन्संग्राममूर्ध्नि प्रसहेत कस्त्वाम् c. Mh. 2, 369 ॥ **635** ॥

अश्वहिते । अश्वीयेषु श्वसितबहुला विक्रमन्तेश्वधर्याः ॥ [ अपत्य ] पुत्र्याम् । Ku. 1, 27 । द्वयेपि । M. M. 12, 2 ॥ [ ब्राह्मण्य ] ब्राह्मणत्वे तत्कर्मणि च । जात्याचारकदर्थनाविरहितं ब्राह्मण्यमात्मेच्छया । संघे । दृष्ट्वा ब्राह्मण्यमुत्थेय [ ? ] दक्षिणोद्धृतपाणिना ॥ 636 ॥

[ मलय ] पर्वते । Sp. 4734 । आरामे । एतेलयो मलयवञ्जुलमञ्जरीषु कूजन्ति मञ्जु घनसौरभबद्धभावाः ॥ [ प्रणय ] विस्रम्भे । Sp. 2991, d । याञ्ञायाम् । Ku. 5, 35 । प्रेम्णि । पुष्पैर्मूलफलैः प्रिये प्रणयिनि प्रीतिं कुरुष्वाधुना । संस्तवे परिचये । Ku. 5, 11 ॥ 637 ॥

[ संस्त्याय ] संघाते संनिवेशे वा । संस्त्यायेन चरन्ति हन्त हरिणा हारिण्यामी कानने । गृहे । संस्त्याये नित्रसन्त्युपेतमतिथिं कालेवजानाति कः ॥ [ संनय ] पश्चादवस्थायिनि बले अनुबलाख्ये । संनयोप्यनुमयावसन्नया [ ? ] । द्रव्यमेलने । आ° Mh. 3, 504 ॥ 638 ॥

[ कषाय ] सुरभौ । Me. 31 । स्निग्धे । Ku. 3, 32 । भाविते वासिते । V. A. 64, 9 । रसे रसषट्कमध्यपतिते तुवराख्ये । कषायतिक्तमधुराः पित्तमन्येपि कुर्वते । द्रवे क्वाथरसे । पीतः शी° Mh. 3, 476 । वर्णे वर्णविशेषे । कात्यायन्यवरुद्धा [sic] स्यात्कषायवसनाथ वा c. AK. II, 6, 17 । चित्तधर्मे अभिष्वङ्गभेदे । मृदितकषायेष्वेवं वाच्यं नो कर्मबद्धेषु । अत्रस्नेहे । Ku. 7, 17 । तथा च । कषायापहतस्नेहस्ततः स्नातो यथाविधीति । एषु पञ्चसु पुंलिङ्गः । काञ्चिकमले । न जातु काञ्चिकस्य स्यात्कषाया पृष्ठगामिनी ॥ कषाये तव लोचने Su. 1426 इत्यादावुपमानात् । ईर्ष्याकोपकषायितेन मनसेत्यादौ चित्तधर्मोपचारात् ॥ 639 ॥

[ द्वितीय ] जायायाम् । स° Mh. 3, 481 । पूरणे । Ku. 3, 35 ॥ [ कुलाय ] द्वयेपि । केकान् [ sic ] कुलायाभिरतानुशन्ति मृगपक्षिणः ॥ 640 ॥

[ गाङ्गेय ] कशेरुः किंशुकप्रायः कन्दविशेषः । हेम्नि । गाङ्गेयाभरणप्रभापरिकरप्राप्तप्रकृष्टच्छविः । गणाधिपे । गाङ्गेयमभ्युद्धरता सलीलम् ॥ [ प्रसव्य ] वामे । प्रसव्यमञ्जलिं दद्यात् । प्रतिकूले । प्रसव्यो° Mh. 3, 485 । अनुकूलेपि । प्रसव्योग्निरिव हुतम् ॥ 641 ॥

[ अभिख्या ] शोभायाम् । Ku. 7, 18 । नाम्नि । असौ° Mh. 3, 471 । कीर्तौ । अभि° Mh. 3, 471 ॥ [ क्षेत्रिय ] अन्यदेहचिकित्सार्हे विषादौ । क्षेत्रियं विषमिवातिदुःसहम् । आदिग्रहणाद्भूतग्रहादौ । क्षेत्रजे तृणे दुःशोध्यतृणादौ वा । क्षेत्रिये° Mh. 3, 478 ॥ **642** ॥

असाध्यरोगे । आवेशयति° Sp. 4023 । पारदारिको यो रक्तपतिकायां मिलितस्तद्द्वारेण स्पष्टं हन्तुमशक्यः परस्या अनुपादेयाया मेलनं वारयित्वा तदपदेशेन हन्यते अत एव परक्षेत्रचिकित्स्यः ॥ [ विषय ] ज्ञाते । यौष्माकीणगुणप्रकर्षविषये शक्तिर्न कस्यापि चित् । शब्दादिके । विषयेष्वतिकष्टोयं विषयः स्त्रीति नाम यः ॥ **643** ॥

आधारे । M. St. 2 । न कस्यापि बुद्धिविषयतां यातीति ह्यत्रार्थः ॥ ग्रामसंघेपि । H. Ch. 60, 4 ॥ [ व्यवाय ] व्यवधौ तिरस्करणे । Mh. 3, 494 ॥ [ हृदय ] वक्षसि स्वान्ते मनसि च । Śi. 1, 74 । अभिप्राये । प्राभाकरोक्तेर्हृदयं को वेत्ति निपुणो जनः । अभ्यन्तरेपि । Bh. Ś. 25, c । हृदयसरसिजान्तर्जृम्भते कोपि भास्वान् ॥ अन्तर्भिन्नं° M. M. 178, 4 इत्यादावुण्डुके । अभिप्रायश्चाभ्यन्तरं चोण्डुकं च तत् ॥ **644** ॥

[ विस्मय ] चित्रे आश्चर्ये । M. M. 37, 3 । अदर्पे दर्परहिते पुरुषे । विस्मापयन्विस्मयमात्मसिद्धौ c. Ra. 2, 33 ॥ [ पर्याय ] अर्थसमे तुल्यप्रयोजने । माता पिता स्वसा भ्राता कान्तामित्रपदातय इति मूल्यस्य पर्यायाः । यदेतैः साध्यते तन्मूल्येनेत्यर्थः । यथा चेन्द्रशक्रशब्दयोः पर्यायत्वम् । क्रमे परिपाट्याम् । Ra. 5, 16 ॥ [ निकाय ] निवासे । कायोप्यपायनिचयस्य निकाय एव Dd. 1, 44 । संघे । नाकनायकनिकायकामिनीकोपकम्पकुटिलैर्विलोचनैः c. H. Ch. 21, 7 । राशीकृतौ । गोमयगोलनिकायैः ॥ **645** ॥

[ समय ] शपथे । समयेनापि शापयेत् । आचारे । Ra. 11, 53 । सिद्धान्ते । अस्मद्गुरूणां समयो यतोयम् । संविदि व्यवस्थायाम् । Ki. 1, 45 ॥ [ प्रत्यय ] अधीने आयत्ते । सौराज्यं° Mh. 3, 484 । शपथे । प्रत्ययो वचनमेव साधुषु । ज्ञाने । विकल्पप्रत्ययोत्पन्ना न शब्दास्तत्त्वदर्शिनः । विश्वासे । Ku. 4, 45 । हेतौ । अपेक्षते प्रत्ययमङ्गलब्ध्यै° c. Ku. 3, 18 ॥ **646** ॥

रन्ध्रे । रिपोः प्र° Mh. 3, 483 । शब्दे । Ra. 11, 56 । प्रथायाम् । तुल्यप्रत्ययतान्तेषु संशयादुपसीदति । संवादे । Me. 8 ॥ [ ऊर्णायु ] मेषे । ऊर्णायोर्गृहगस्य किं न कुरुते गोमायुराराद‍पि । कम्बले । मालिन्य० Mh. 3, 474 ॥ [ सौरभ्य ] सौगन्ध्ये । एतस्मिन्मलयानिलोपि तरसा सौरभ्यमभ्यस्यति । रम्यतायाम् । लोकसंमतसौरभ्याः स्त्रियः कं न हरन्त्यहो ॥ 647 ॥

[ पर्जन्य ] सध्वनौ मेघे । रे गर्ज गर्ज पर्जन्य दर्पोयं यदि तेम्भसा । शक्रे । अस्फूर्जन्यं [ sic; c. Mh. 3, 487 ] सौजन्यं यदि भवति पर्जन्य भवतः । मेघदैवते शक्रव्यतिरिक्ते देवताभेदे । पर्जन्यमेघमीरयन् । क्वचित्तु मेघध्वनावपि दृश्यते । तत्र तूपचाराद्व्याख्येयम् ॥ [ हिरण्य ] मानभेदे षोडशमाषके । हिरण्यमेकं गामेकां भूमेरप्येकमङ्गुलम् । हरन्नरकमाप्नोति c. Ujjv. on Uṇ 96, 1 । अकुप्येर्थे । पूर्णा हिरण्यैर्बहुभिः कोशास्तस्य महात्मनः । अकुप्यमुत्कृष्टधनं सुवर्णरजतरत्नादि ॥ 648 ॥

[ प्रलय ] मृत्यौ । सोपि प्रायः प्रलयमुपयात्येव दैवान्नियोगात् । संवर्ते कल्पान्ते । भूयो भूयः प्रलयसमये भक्षयित्वा त्रिलोकीम् । मूर्छायाम् । Ku. 4, 2 । सात्त्विके भावभेदेपि । K. Pr. 105, 8 ॥ [ आतिथ्य ] अतिथ्यर्थे । आतिथेयस्तु सातिथ्यविनीताध्वपरिश्रमम् । आतिथीं तु कतमां विद्मह इत्यादौ स्त्रियामातिथीशब्दः । अतिथौ शाश्वतेनोक्तः c. Śâsv. 247 ॥ 649 ॥

[ अनय ] व्यसनेषु पानस्त्रीमृगयादिषु । अनयेनैव राजश्रीर्दैन्येनेव मनस्विता । अशुभे दैवे । सर्वमेतदनयस्य जृम्भितम् । विपदि । किं न पापमनयेन कुर्वते ॥ [ अत्यय ] क्लेशे । अत्ययो नैव यस्यास्ति शीते वाप्यातपेपि वा । दण्डे । कक्षाहतस्यात्ययः शतं वाक्पारुष्येत्ययः शतम् । दोषे । Ki. 1, 12 । विनाशे । प्राणात्यये सर्वधनापहारे इत्यादौ । अतिक्रमे । Ku. 5, 23 ॥ 650 ॥

[ पानीय ] त्रयेपि । Mh. 3, 488 ॥ [ उदय ] पूर्वाद्रौ । Sû. 1 । उद्गमे । उदयो यो लङ्कायां सोस्तमयः सवितुरेव सिद्धपुरे । वृद्धौ । Ki. 2, 8 ॥ [ स्थानीय ] स्थेये स्थातव्ये । भवद्भिः स्थानीयं नरपतिपुरस्तादवहितैः । स्थानहिते । स्थानीयं सततं घ्नन्तस्तेद्याप्यङ्कुरिताः शिवाः । पुरे । धर्मस्थास्त्रयस्त्रयो मान्या जनपदसंधिसंग्रहणद्रोणमुखस्थानीयेषु व्यावहारिकानर्थान्कुर्युः ॥ 651 ॥

पितृस्थानीयत्वं तत्र भवति को नु प्रतिसर इत्यादावुत्तरपदीभूत [ sic ] उपमानार्थकम् । यद्यपि पित्रा समानस्थान इति स्थाना° Pà. V, 4, 10 इति पितृस्थानीयशब्दो व्युत्पादितस्तथाप्युपमानार्थपर्यवसानादेवमुक्तम् ॥ [ शालेय ] क्षेत्रे । अथाग्रे शालेयैः फलपरिणतिस्फातिसुभगैः ॥ 652 ॥

[ अभय ] भयाभावे । Sp. 485 । निर्भये । अभयाः सन्तु पन्थानः ॥ [ राष्ट्रिय ] द्वयेपि । राष्ट्रियोपि यदि दुर्नयान्वितः सोपि निग्रहमवश्यमर्हति ॥ 653 ॥

[ शीर्षण्य ] विषदे निर्मलमात्रे । शीर्षण्यास्तत्र° Mh. 3, 501 । केशे । जराजरठशीर्षण्यो धन्यो ध्यायति शंकरम् । शिरस्त्राणे । शीर्षण्यानां° Mh. 3, 501 । संज्ञारूपतया रूढः । शिरोभवे । शीर्षण्यान्मुच्यते व्याधेः । तद्धिते शिरोहिते । उष्णं पयो न शीर्षण्यम् । प्रधाने । शीर्षण्ये त्वयि पूर्वपुण्यविभवैर्लभ्ये कुतो मे भयम् । अन्यलिङ्गको विशेष्यलिङ्गः ॥ 654 ॥

[ संचय ] संग्रहे । अतिसंचयशीलानां° Su. 474 । संघे । साहित्यसिन्धुशिशिरांशुरशेषशास्त्रशैवावदातमणिसंचयरोहणाद्रिः ॥ [आत्रेयी ] रजस्वलायाम् । Mh. 3, 473 । अत्र्यपत्ये । त्वमात्रेयि त्राणं भवसि विधुरे स्याः प्रतिदिनम् ॥ [ कैडर्य ] मदनो वृक्षभित् कट्फलं वत्सकत्वक् ॥ 655 ॥

[ ब्रह्मण्य ] श्रितशाखो जटाधारी ब्रह्मण्यो वल्कलान्त इत्यादौ द्वयेपि ॥ [ अन्वय ] वंशे । Ra. 1, 12 । वाक्यपदमेलनायाम् । अन्वयेभिहितानां सा वाच्यत्वादूर्ध्वमिष्यते ॥ 656 ॥

संबन्धे । प्राणः शरीरमिति कस्य कुतोन्वयोयम् । अव्यभिचारे । अन्वयव्यतिरेकौ हि प्रयोगे तदवेदिन इत्यादौ ॥ [ विजय ] गणभेदे प्रमथविशेषे । विजयश्च जयश्चैव जयन्तश्चापराजितः । अर्जुने गतौ च । विजयो विजयोद्यतो यदा ॥ 657 ॥

पराभिभूतौ । Śi. 2, 59 । देव्याम् । आकाशे परमे रमेत विजया दिव्यप्रकाशार्थिनी ॥ [ इन्द्रिय ] हृषीके । Ku. 8, 20 । शेपसि । बाल्यं वृद्धिर्बलं प्रज्ञा चक्षुः श्रोत्रं त्वगिन्द्रियम् ॥ [ हृच्छय ] द्वयेपि । Mh. 3, 506 ॥ [ आम्नाय ] अन्वये । आ° Mh. 3, 473 । श्रुतौ । अधीती चरकाम्नाये सोध्वर्योः [ sic ] श्रेष्ठ उच्यते । श्रुतिर्वेदः ॥ 658 ॥

[ निलय ] द्वयेपि । Ra. 2, 15 ॥ [ निचय ] संघे । स्थानप्राप्तिं तृतीये धननिचयमुदा कल्यकृच्चारिहन्ता । संचये । Sp. 6948 । पर्वतस्य वप्रे तटे । - - - - - । एवं चयशब्दोपि त्र्यर्थः [ c. 625 ] । संघे । Śi. 1, 3 । संचये । चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिषु । वप्रे तटे । M. M. 168, 5 ॥ [ उच्चय ] उञ्छे । विकीर्णनीवारशिलोच्चयेन । संघे । Ki. 3, 29 ॥ 659 ॥

[ प्रचय ] वेदप्रसिद्धे स्वरभेदे एकश्रुत्याख्ये । स्वरितादनुदात्तानां प्रचयस्वर इष्यते । संघे । Vâs. 266, 4 ॥ [ भूरिमाय ] राक्षसे राक्षसभेदे । रे भूरिमाय दृढकाय विचार्यमाशु ॥ 660 ॥

सृगालेपि । भूरिमायाः - - स्वामिन्ननुधावन्ति मे सदा ॥ [ जलाशय ] नलदं मांसी । जलाधारेपि । मालिन्यं परमं जडाशय तव स्वान्ते समालक्ष्यते ॥ [ समवाय ] द्वयेपि । H. Ch. 30, 19 ॥ [ सुरालय ] मेरुस्वर्गयोः प्रसिद्धम् ॥ 661 ॥

देवागारे । सुधाधौतैः सुरालयैः ॥ [ हलिप्रिया ] सुरायाम् । हलिप्रियाघूर्णितलोचनस्य । सीरिप्रियायाम् । हलिप्रिया रूपमवाप भर्तुः ॥ [ उपकार्या ] पटकुट्याम् । Ra. 5, 41 ॥ 662 ॥

[ समुदाय ] रणे संविदि वा । सह° Mh. 4, 231 ॥ [ आतिथेयी ] पूजायाम् । कामातिथेयीं विदधाम इत्यादौ । अतिथिसाधौ । Ku. 5, 31 ॥ 663 ॥

[ संपराय ] युद्धे । Ku. 8, 54 । आयतौ प्रतापे । नृपतेः कर्म कर्तव्यं सर्वदा सांपरायिकम् ॥ [समुच्छ्रय] वैरे । Mh. 4, 231 । उन्नतौ । Sp. 6948 ॥

[स्थूलोच्चय] असाकल्ये । निगीर्णमात्रादवगत्य किंचित्स्थूलोच्चयेनेदमिदं प्रमेयम् । दन्तिनां मध्यमे गते अमन्दावेगित्वगतौ । स्थूलोच्चयेन गजयूथमथाजगाम ॥ 664 ॥

[ समुदय ] समुद्गमे । ज्योतिषां समुदये समर्थिते । संग्रामे । समुदयोदयभाजि जनाधिपे° Mh. 4, 231 । निकुरुम्बे । धनसमुदययोगाद्याति जातिर्महत्त्वम् ॥ [ अनुशय ] दोषे द्वेषे वा । अनुशय° Mh. 4, 220 । पश्चात्तापे । Ra. 16, 45 । अनुबन्धे आसक्तौ । प्रविमुक्तानुशयो यदा मुनिः ॥ 665 ॥

[पौरुषेय] पुंसां संघे । Śi. 2, 4 । तेन पुरुषेण कृतार्थे । M. M. 302, 8। यौ पुरुषेयसृजामित्वमित्यादौ विकारे sic; c. Mh. 4, 227 । तस्य पुरुषस्येति अन्त्ययोः संबन्धः ॥ [धनंजय] हुतभुजि । दीप्तौ धनंजय इवाशु ददाह मोहम्। पार्थे । Ki. 1, 35 ॥ 666 ॥

[रौहिणेय] हलिनि । Śi. 3, 60 । इन्दुजे । रौहिणेयसहिताः शुभग्रहाः । [प्रतिश्रय] सभायां स्थाने वा । दिव्यं प्रतिश्रयमवाप्य गुणप्रकाशं संप्राप्तवान्नु [?] गुणोक्तिविशारदः सः ॥ [प्रतिभय] भयंकरे । Ra. 11, 61 । भीतौ । प्रतिभयचलिताङ्गसंधिबन्धः ॥ 667 ॥

[भागधेय] बलौ राजग्राह्यभागे । शक्तिः Mh. 4, 228 । भागे । Ra. 5, 9 v. l. । भाग्ये । भागधेय° Mh. 4, 228 ॥ [समाह्वय] रणे । तुमुलो बभूव समाह्वयः । द्यूते । धिक्तं येन समाह्वयेषु निधनं नीता निजश्रीर्बलात् ॥ [वासतेयी] रात्रौ । तां वासतेयीं स सुखेन नीत्वा ॥ [वासतेय] वासतेयतरु ‑ नुशायिभिरित्यादौ तत्साधुनि । तत्र वसतौ साधुनीत्यर्थः c. Pâ. 4, 4, 104 ॥ 668 ॥

[परिचय] अभ्यासे । Ra. 9, 49 । संस्कारे । M. M. 163, 2 । मेलने । M. M. 101, 2 ॥ [चन्द्रोदय] द्वयेपि । चन्द्रोदयोद्भासितसंनिवेशे । वितानः करकुक् [ sic ] ॥ 669 ॥

[प्रवचनीय] वक्तरि । साङ्गस्य वेदस्य प्रवचनीयः । वाच्ये । सप्त प्रवचनीयाः स्युः ॥ [वृषाकपायी] श्रियाम् । वृषाकपायी यदि° Mh. 5, 38 । स्वाहायाम् । वन्द्या वृषाकपायीत्यादौ । इन्द्राण्याम् । वृषाकपायीम° Mh. 5, 38 । ऋषिविशेषभार्यायाम् । वृषाकपायी जलसेकवर्धितैर्मनोहरैराश्रमवृक्षकैरिमम् ॥ 670 ॥

[रै] द्वयोरपि । Sû. 11 ॥ [श्री] शोभायाम् । H. V. 1, 1 । समृद्धौ । Ki. 1, 1 । प्रशंसायाम् । Pr. P. 7, d ॥ [पुर्] पुरे । A. S. 129, 10 । गृहे । शीलस्य सत्यस्य च पूस्त्वमेकः । काये । अस्यां मत्पुरि संनिधानविधये बद्धादरेण त्वया दुःखेनैव निवार्यते दृढतरं कोयं प्रकारः प्रभोः ॥ 671 ॥

[ धुर् ] रथावयवे । Sû. 71 । वोढव्यमात्रके । Sp. 2135 ॥ [ द्रु ] द्रुमेऽपि । द्रुभङ्गध्वनिसंरम्भभीतास्ते तु निशाचराः ॥ [ शौरि ] नारायणे । K.K. S. 1, 1 । शनैश्चरे । लिखेत्केतुं ध्वजाकारमालुकां शौरिमादिशेत् ॥ 672 ॥

[ उरु ] महति । K. Pr. 134, 13. 164, 5 ॥ [ चीरी ] झिल्लिकायां कीटप्राये प्राणिभेदे । उच्चैश्चरति चिरं चीरी वर्त्मनि वरतरुं समारुह्य c. Bh. Ś. 26, Su. 912 ॥ [ चीर ] मृगे हरिणभेदे व्रतिवस्त्रे च । एते चीरवृतं वनान्तमुचितं प्रायाः स्वतुल्यं द्विजाः ॥ [ वार ] काले । M. M. 62, 4 । क्रमे । वाराङ्गनासंगमसाभिलाषः । चये । पतिताः शरवारवृष्टयो यदि सोढाः समराङ्गने क्वचित् ॥ 673 ॥

[ छत्त्र ] आतपत्रे । Ra. 3, 16 ॥ [ खुर ] पादे । Ra. 2, 2 ॥ [ शर ] नडे । Me. 45 । शरशब्दो दधिसारे दुर्गेन दृष्टः । इति तन्मतानुसारेणैव गृहीतः । अन्ये तु सकारान्तं नपुंसकलिङ्गमेतदर्थवाचिनं शरःशब्दमिच्छन्ति तत्तु न युक्तम् । कर्कस्यैव तस्याभूस्वाददर्शनात् [?] । लक्ष्ये त्वकारान्त एव । भागुरिरपि द्रप्सं दधिशरं विदुरिति । दध्नो वा सगुडः शर इति च लक्ष्यम् ॥ [ ऐन्द्रि ] वायसे । Ra. 12, 22 ॥ 674 ॥

वालिनि । ऐन्द्रि° Mh. 2, 387 । अर्जुने । मुख° Mh. 2,387 । जयन्ते । ऐन्द्रिणापि° Mh. 2, 387 ॥ [ रुरु ] राक्षसभेदे । ररुव रुरुवद्रौद्रो रिपुस्तव नराधिप । चित्रमृगे । Ra. 3, 31 ॥ रुरुसिद्धान्तसंसिद्धौ इत्यादौ मुनिविशेषे नोक्तम् [ sic ] ॥ [ गुन्द्रा ] एतास्तिस्र ओषधयः । गुन्द्राप्ररोहकवलावयवानुकीर्णमित्याद्युदाहार्यम् ॥ 675 ॥

[ मेरु ] अक्षमालाग्रफलके । मेरुं नैव विलङ्घयेत् c. Sp. 87 । स्वर्णगिरौ । Ku. 8, 22 ॥ [ चुक्र ] आद्यौ ओषधिभेदौ । अम्ले रसे । चुक्रो रस इवोद्रिक्तः पित्तहेतुतया मतः । तद्रसे चुक्रे रसे द्रव्ये काञ्जिकादौ ॥ 676 ॥

[ क्षुर ] रोमच्छेदके । नित्यं संनिहितं पापं तैले मांसे क्षुरे भगे । काण्डेक्षुः । इक्षुभेदः । तीक्ष्णे कर्कशे उपमानाद्रूढः ॥ [ स्वर ] शब्दे । Ku. 1, 45 । उपतापिनि उदात्तादौ च । स्थानभ्रंशाच्छ्रूत्रणविवरं ते स्वरा मर्दयन्ति । वर्णे । स्वरा द्वाविंशतिः प्रोक्ताः । षड्जादिषु । Śi. 2, 72 ॥ 677 ॥

[गौर] अजातरजसि कन्यायाम्। गौरी श्रेष्ठा विवाहे स्यात्। पार्वत्यां पीते च। गौरी चम्पकगौरीयं [ sic ] गजाजिनधरो हरः । पाण्डुनि श्वेते । रोहन्मूलाति-गौरैरुरगपतिफणैरत्र पातालकुक्षौ । अरुणे । चरणौ द्वौ मुखं पुच्छं यस्य श्वेतानि गोपतेः। गौरवर्णस्य तं प्राहुर्नीडं तं वृषमुत्सृजेत् c. Sp. 1475, d ॥ [ राष्ट्र] विषये । Pa. 1407 । उपद्रवे । वाच्यं तस्य न किंचनापि विबुधैर्यो दैव [?] राष्ट्राकुलः c. Mh. 2, 438 ॥ 678 ॥

[ मरु ] धन्वनि । Su. 938 । धराधरे । उत्प° Mh. 2, 435 ॥ [अद्रि] द्रुमे । उत्खाया° Mh. 2, 382 । शैले । Me. 14 । अर्के । अद्रिर्भानुसहस्र-नाशिततमःस्तोमोयमभ्युद्यतः ॥ [ कारु ] कर्णे कटुर्यस्य भवेत्पिकारवस्तं रञ्ज-यन्त्यत्र न केपि कारव इत्यादौ कारके कर्तर्यपि दृश्यते ॥ 679 ॥

[ गोत्रा ] भुवि । गोत्रा त्राससमाकुला मुररिपुं प्राप्ता शरण्यं विभुम् । गो-समूहे । गोत्रात्राणमिषेण दर्शितबलः शौरिः स वो रक्षतु ॥ [ गोत्र ] अद्रौ। Ra. 13, 7 । अभिधायाम् । या गोत्रस्खलितक्रुधं श्रितवती दक्षात्मजाभाषणा-ज्जातिं तत्प्रशमाय मन्मथरिपुस्तां यावदस्मारयत् । कुले । सोयं गोत्रे सवितुरु-दितो वारिधेर्यद्वदिन्दुः ॥ [ चित्र ] तिलके । चित्रकाङ्कितललाटपट्टिका । आ-लेख्ये । Ku. 2, 24 । अद्भुते । Ra. 5, 33 । कर्बुरे । भात्य° Mh. 2, 408 ॥ कर्बुरत्वोपचारान्नानाप्रकारेपि । चित्रं चकार पदमर्धपुलालयेन c. Śi. 5, 10 ॥ 680 ॥

[ चित्रा ] सुभद्रायाम् । चित्रं चित्राहरणचतुरे फल्गुणे [ sic ] स्नेहयोगा-त्क्षान्तिं चक्रे भुवनविजयी सोपि कालेयकारिः । भे नक्षत्रे । Ra. 1, 46 ॥ [ क्षेत्र ] पत्न्याम् । M. 9, 159 । शरीरे केदारे च । न महानयं न च बिभर्ति गुणसमतया प्रधानताम् । क्षेत्रविदममुमुशन्ति जनाः c. Śi. 15, praksh. Śl. 2–3 । क्षेत्रव्यवहारः । ज्योतिःशास्त्रे पटां प्रसिद्धः । तीर्थे । Me. 48 । योग्येपि । क्षेत्रादादाय फलं क्षोदयितुं क्षिप्यते -- यत्र c. Mh. 2, 471, p. 69, 26 ॥ 681 ॥

[ शुक्र ] ज्यैष्ठे मासेग्नौ च । शुक्रस्य किं चित्रमिदं त्रिलोकीं यदक्रमेणा-तत तीव्रतापम् । भार्गवे षष्ठग्रहे । दृष्टिप्रदीपं° Ku. 3, 43 । रेतसि । M. 3, 49 ॥ [ गुरु ] संस्कारके । Ra. 2, 23 । पित्रादौ । Ku. 1, 51 । आदिग्रहणात् । श्रुतमनुमतं दृष्टं वा यैरिदं गुरुपातकमित्यादावुपाध्यायेपि । तत्पातर्गुरुसंनिधौ निगदतस्तस्यैव तारं वधूरित्यादौ श्वशुरयोरपि बोद्धव्यम् ॥ यत्रावलीढ - - - - - - - - - इत्यादौ सुरमन्त्रिणि स्थूले च ॥ 682 ॥

दुर्जरे । अम्लायकरसग्राहि [ ? ] गुरूष्णं दधि वातजित् । अलघुनि द्वि-मात्रके वर्णेपि । धृतगुरुनियमोपि वस्तुबन्धः ॥ गुरुभिर° Ra. 2, 75 । तथा गुरूभयस्मै गुरुणोरुभयोरथ कार्ययोः c. Śi. 2, 6 - - - - - - [ c. Mh. 2, 400 ] ॥ [ क्षुद्र ] अल्पे । क्षुद्राः संत्रासमेते विजहत हरयो भिन्नशक्रेभकुम्भा Su. 2283 । - - - - ॥ 683 ॥

# VARIOUS READINGS AND CORRECTIONS.

## I. TEXT.

C opens with ओं श्रीगणेशाय नमः ओं सिद्धलक्ष्म्यै नमः ओं.

Verse 1. B दुःखबीजच्छिदौ.

2. B निहत्य संगृहत्य. B °विभवात्कश्चन ( ? ).

6. C तत्र तूच्यते.

13. हैमदले B, C, Vi.

17. मण्डूकभीदकौ B, ° भेदकौ C.

22. रागेषु B ( perhaps रागे तु ? ); स्याद्धयोर्नाद्येषु [ ? ] Vi.

23. B यूथीभ्यो, C यूथीभ्या.

24. C पाव्यामैरण्डके.

29. a om. MSS.

35. B करेणुः – धेनुकाः

42. वृक्षे for ना दुर° C.

43. रेणुकौषधि° MSS.

46. शीधुभाजेन B, C. तारक भे C.

48. पर्यस्तिकायां B, C.

56. ° कार्षकौ B, C, S.

57. Comm. on Stutik. IX, 46: भूम्न्युत्तमे द्वयोः

58. C ( and A sec. m. ? ) त्रिष्वथो; B indistinct; S त्रिष्वितौ.

62. S *Twice* ( in text and comm. ) दीक्षाभिदे.

67. S कुल्माशे; broken off in A.

70. S उण्डुकमुत्करे.

71. S शेफालिका वायाभित्.– सौभञ्जनो.

77. S सस्वराः ( but in comm. सस्वनेषु वंशेषु ).

84. शालावृ° B, C. जैवात्रिकः A, B, C, S, Vi.

85. A pr. m. सेवन.° S om. from 85, b to 93.

86. b om. B.

89. A भावदर्शी.

91. After 91, a B and C add भट्टारकः सुरे राज्ञि कथितश्च तपोधने.– A pr. m. and Vi, वाक्कायवर्जिते; A sec. m., B and C वाक्श्रुतिवर्जिते.

96. C and S sec. m. न्युङ्खौ.- C लेखे.

97. उल्लेखे B, C.

104. भगं B. वीर A, S. यत्नर्द्धिकीर्तिषु B, C.

107. पणस्त्रियः MSS.

108. S चरे ( text and comm. ).

114. धूम्याटे B, C ; broken off in A.

115. B, C, S षणे. S om. from 115, b to 146.

117. B वहु.

118. A sec. m. and C इङ्गो; B इङ्गे नेरी°.

119. B शिङसर्पयोः.
124. C कंकुसस्ययोः.
134. B °दिभवे, C and Vi. देशकालपूर्वादिभेदे.
135. C केशरञ्जनभाजने.
140. C, Vi. त्वचि.
144. A, C धान्वन्तरौ.
150. S वलजः.
151. पट्टसूत्रे B ( text and comm. ) and S in comm.
154. S and A pr. m. सूचकाः, C सूत्रिकाः.
156. मायानिश्चित° S. स्यूताङ्गे S pr. m.
158. पतोर्गो C. नाद्यां A pr. m., C, S.
159. स्पष्टं A, B, S, Vi., सृष्टं C.
162. B पटौली C पटले.
165. C and A sec. m. पर्यङ्कवस्त्रयोः, Vi. पर्यङ्कबन्धयोः.
169. C किरौ.
171. A स्पष्टं.
172. खसिते A, B, C, S, Vi. द्विधाभविषु वस्तुषु C.
177. पिचित° B, S.
179. पटोर्णाख्यः C.
180. न पुंस्ययम् S.
184. कुष्ठमौषधरोगयोः B, C and S in comm.
191. a om. C.– तरोः B, S; तरुस्कन्दलते अपि C.
192. °सर्गा° A sec. m.
200. रोगेथौषध° A.
202. चाषोडशात्परः C. After 202 C adds तम्बूलकल्के पुंसि स्याद्दार्पाडः शेखरेपि च.
203. सक्त° A, B, S.
204. °म्लालिष्टयो B, श्लिष्टयोः C.
205. उपोढं गूढमात्रे A pr. m., रूढमात्रे C.
206. म्लिष्ट° Vi.
207. A चाध्यारूढं, B and A sec. m. प्रत्यालीढं, S pr. m. व्यत्यालीढं. MSS. seem to be defective here.
220. B ( and A sec. m. ? ) गवामन्त्रादिभाजने; C and Mh. 2, 144 गवायन्त्रादिभाजने.
225. शकुन्ते A, B.
226. चाथ for स्यात्तु A pr. m.
227. हरिण्येणी C.
235. धर्षणं व्रत° A, B, S.
239. कल्याणे A (?), B.
240. मंगले सूत्रे C.
248. करुणस्त्रिषु C.
250. काश्मीरी A, कस्मारी B, कश्मीरी C.
261. प्रसक्त° A.
262. पतद्र° A, B, S; compare 298 v. l.
264. कालेञ्चिते A, B, S.

265. श्लेष्मादि रसरक्तादि B, C.
269. श्रवणेपि च B.
273. सेनानिवेशे C.
275. a om. C.
281. न्यायो° B, C, S.
288. पाके व्यवस्थितौ B.
292. C. om. from रक्तं to जनितात्यर्थानुरागा ( verse 312 ).
298. पित्सत्पा° A, S; compare 262 v. l.
312. °नुरागायां च योषिति B.
314. निर्धारिते C.
316. om. C.
319. A, C, S लेशिते क्षिते, B लेशितोक्षिते; see commentary.
320. विश्वस्ता S, विश्वस्तं A pr. m.
322. B दौस्स्थ्ये.
324. कृषावसत्येप्यनृतं C.
325. पीडिते स्थिते B. After विप्रे B and S add रदे च.
327. B विदितात्तयोः ( but आर्त्ते in comm. ); C विदितांतयोः.
332. C transposes 332, b and 333, a.
333. लोहितं S.
334. स्यादायतिः शीघ्रतायां C.
340. एकयुक्त्या A pr. m.
341. सुषिरे B, C.
345. गिरिमल्ली C.
350. सप्रत्यये C.
352. रौप्य° S.
357. उपास्थितः प्रतीहारे द्वारदेशे C.
358. पि चूर्णितः B, विचूर्णिते A pr. m. and S sec. m.?
360. विसृतं A, B; विस्तृतं C.
361. पि निन्दिते C, हि निन्दिते S.
368. सृक्का S.
369. प्राप्तनिद्रे C.
379. बुधसर्षपौ MSS.
381. पादयन्त्रक° C.
382. कायस्था C, वयस्था S.
385. पाततन्मुद्र° A.
387. दृषन् C.
393. मांसाशिपक्षिणोः A. सूपकारे C.
394. भ्रमौ C and S pr. m.
396. After हर्षगन्धयोः C inserts अर्बुदो रोगभेदे च संख्यापर्वतभेदयोः.
397. विशदो B, C.
398. कुसीदं B, C.
400. सारावरुदिते C.

401. सत्तवर्णे C.
403. तमोनुदः A, S.
408. प्रभावातिशयः S and A pr. m.
409. पुष्परसं A, C, S ; cfr. comm. on Stutik. VII, 39.—
418. अंशे S and A pr. m.
428. उपाधिर्ना धर्मचिन्ता कु° B. विशेषणोपार्जयोश्च C, S and A pr. m.
429. च for श्री B.
431. विश्वस्तेनुद्भटे C.
432. कुटिलक्षितौ B, C.
433. अविदून° A, अवधूत° C.
435. श्यामः A.
437. रश्मिवे° C.
439. सृक्का B, C, S.
440. मूर्ते निरन्तरे C.
441. नृपे om. B, S; क्षत्रिये तथा C; cfr. comm. on Stutik. III, 14.-
455. तथा चित्तसमुन्नतौ C.
466. उद्धान° C, A sec. m.
467. भेदनं व्यथने C.
468. विलग्नं C.
469. पद्माकरे C.
470. युगदम्पती B, C.
472. वानिन्यौ B, C.
475. संस्कारके भवेत् C, संसारके भवेत् Vi; संस्कारे केतवे A, B, S.
476. करक्तके C, Vi. कदम्बके A pr. m.
478. a om. C.
479. नारिकेलो हलधरो C, नारिकेले हलधरे S.
482. सत्तभूमौ A, B, S.
484. अन्तर्द्वारे A.
489. मल्लकी C; corrected into सल्लकी.
491. निर्वृतौ C.
495. जिगीषायां C. परिदेवनम् S.
499. सूचके B.
501. B and S पूर्वा; A and C indistinct.
502. शकुनः S.
507. शोषणे प्रापणे तयोः A.
508. अवदानं S pr. m.
509. °वार्षुकाब्दा A, B ; °मत्तिभा वार्षुकोब्दो घनाघनः C ; °वर्षुकाब्दो घनाघनः S.
511. मातुण्ड B.
512. अभिपन्नोभि° A, C; °वृतः A.
513. a om. S. आस्कन्दनं for आच्छादनं A, B.
514. स्तनयित्नुस्तु वारिदे C.
516. त्ववागपि A and S. pr. m.
517. भवेदाकलनं B.

519. अग्र्यजन्मा A, C ( cfr. II. Ch. 101, 4 ); अग्रजन्मा B, S.
520. कषाय° C. काषायवस्त्रावनद्धा S (text and comm.).
522. प्रियाले S sec. m.
523. विष्वक्सेना B. सर्वश्च B; क्रतुध्वंसी शिवस्सर्वश्च दानवः C ; क्रतुध्वंसी शिवश्च [pr. m. शवश्च] दानवः S.
525. °सेवयोस्त्रिषु C.
526. S has a gap here extending from 526, b to 534.—
528. a om. A. त्रिलिंगकः B.
533. सत्त्वभिद् A, B; सुराभिद् C ; सुरभिद् Vi.
534. न्यायो B, न्याये C.
535. लेपे लोपन° B.
